
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2404 विषय चंपूकाव्य

नाव चंपूरामायण

लेखक/लिपीकार श्रीलक्ष्मणाक

पृष्ठ .... काळ .... पूर्ण/अपूर्ण

M2404

अथ चंपुरामायणप्रारंभः

श्रीगणेशायनमः॥ ॥पद्य॥ लक्ष्मींतनोतुसुतरामितरानपेक्षमंघ्रिद्वयंनिगमशाखिशिखाप्रवालं॥हैरंबमंबु
रुहडंबरचौर्यनिघ्नंविघ्नाद्रिभेदशतधारधुरंधरन्नः॥१॥उच्चैर्गतिर्जगतिसिद्ध्यतिधर्मतश्चेत्तस्यप्रमाचवचनैःकृत
केतरैश्चेत्॥तेषांप्रकाशनदशाचमहीसुरैश्चेत्तानंतरेणनिपतेत्कनुमत्प्रणामः॥२॥वाल्मीकिगीतरघुपुंगवकी
र्तिलेशैस्तृप्तिंकरोमिकथमप्यधुनाबुधानां॥गंगाजलैर्भुविभगीरथयत्नलब्धैःकिंतर्पणंनविदधातिजनःपितॄणां
॥३॥गद्यानुबद्धरसमिश्रितपद्यसूक्तिर्हृद्याहिवाद्यकलयाकलितेवगीतिः॥तस्माद्दधातुकविमार्गविदांसुखायचंपू
प्रबंधरचनांरसनामदीया॥४॥वाचंनिशम्यभगवानथनारदस्यप्राचेतसःप्रवचसांप्रथमःकवीनां॥माध्यंदिनाय
नियमायमहर्षिसेव्यांपुण्यामवापतमसांतमसांनिहंत्रीं॥५॥गद्य॥तत्रकंचनक्रौंचमिथुनादेकंपंचशरशरानुवि
द्धमपिव्याधेनानुविद्धंनिध्यायतःबद्धानुकंपस्यभगवतोवाल्मीकेर्वदनारविंदाच्छंदोमयीकाचिदेवंनिःससारसरस्व

॥ ॥टिप्पणं॥ ॥अधीनं१॥ ॥वज्रं२॥ ॥वाणी३॥

ती ॥ प० ॥ मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥ यत्क्रौंचमिथुनादेकमवधीः काममोहितं ॥ ६ ॥ ग० ॥ तदनुसम
योचितकृत्यं निर्वर्त्य स्वाश्रममुपगतवति सति भगवति वाल्मीकौ ॥ प० ॥ वाणीविलासमपरत्रकृतोपलंभमंभोजभू
रसहमान इवाविरासीत् ॥ आभाति यत्कृतिरनेकविधप्रपंचव्याजेंद्रजालविधिसाधकपिंछिकेव ॥ ७ ॥ ग० ॥ ततः
परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यमलोकेपि स्वप्रवृत्तं प्रकाशयितुं किल भवंतमेवोपदिष्टमानया
भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यांतरधात् ॥ प० ॥ अथ सरसिजयोनेराज्ञया रामवृत्तं करबद
रसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ॥ शुभमतनुत काव्यं स्वादुरामायणाख्यं मधुमयभणितीनां मार्गदर्शी महर्षिः ॥ ८ ॥
ग० ॥ एनं प्रबंधं प्रयोक्तुं लोके कः समर्थ इति चिंतामुपगतवति सति भगवति वाल्मीकौ ॥ प० ॥ उपागतौ मिलितप
रस्परोपमौ बटू श्रुतौ श्रुतिमधुरस्वरान्वितौ ॥ विचक्षणौ विविधनरेंद्रलक्षणौ कुशीलवौ कुशलवनामधारिणौ ॥
॥ ९ ॥ ग० ॥ एतौ मुनिः परिगृह्य स्वकृतिं अपाठयत् ॥ तौ पुनः इतस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवन

मानीय भ्रातृभिः सह निजचरितं गातुमन्वयुंक्त ॥ ततश्च ॥ पद्य ॥ छंदोमयीनां निलयस्य वाचामंतेवसंतौ मुनिस
त्तमस्य ॥ एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपक्रमेतां ॥१०॥ अस्ति प्रशस्ता जनलोचनानामानंदसंदायिषु को
सलेषु ॥ आज्ञासमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणां ॥११॥ तामावसद्दशरथः सुरवंदितेन संक्रंदनेन वि
हितासनसंविभागः ॥ वृंदारकारिविजये सुरलोकलब्धमंदारमाल्यमधुवासितवासभूमिः ॥१२॥ ग० ॥ अथास्मि
न्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मंत्रिभिः सह मंत्रयमाणे दशरथे ॥ सुमंत्रः प्रहृष्टम-
ना महर्षेरंगदेशसंगता वग्रहनिग्रहशौंडस्य विभांडकसूनोरवश्य — मृष्यशृंगस्य प्रभावात्प्रभवो भविता कुमारा
णामिति सनत्कुमारोक्तं पुरावृत्तमस्मै दशरथाय कथयामास ॥ सोपि सुमंत्रवचनाच्छांताधिः शांताकुटुंबिनं संबं
धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयामिष्टिं विधिवत्कर्तुमारभत ॥ तदनु
हविराहरणाय धरण्यां कृतावतरणाः सर्वे गीर्वाणाः शक्रप्रमुखाश्चतुर्मुखाय दशमुखप्रतापानलग्रीष्मोष्मसं

शोषणमावेद्यतेनसहशरणमितिशार्ङ्गधन्वानंमन्वानाः कृतनानाविधप्रस्तुतस्तुतयः क्षीरांबुराशिमासेदुः॥प॰
संतापघ्नंसकलजगतांशार्ङ्गचापाभिरामंलक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायं॥वैकुंठाख्यंमुनिजनम
नश्चातकानांशरण्यंकारुण्यापंत्रिदशपरिषत्कालमेघंददर्श॥१३॥ क्षीरांबोधेर्जठरमभितोदेहभासांप्ररोहैः
कालोन्मीलत्कुवलयदलाद्वैतमापादयंतं॥आतन्वानंभुजगशयनेकामपिक्षौमगौरेनिद्रामुद्रांनिखिलजग
तीरक्षणेजागरूकां॥१४॥ प्रल्हादस्यव्यसनमभितंदैत्यवर्गस्यदंभंस्तंभंवक्षस्थलमपिरिपोर्यैंगपद्येनभेत्तुं
॥बद्धश्रद्धंपुरुषवपुषामिश्रितेविश्वदृष्टेदंष्ट्रारोचिर्विशदभुवनेरंहसासिंहवेषे॥१५॥ नारायणायनलिनाय
तलोचनायनामावशेषितमहाबलिवैभवाय॥ नानाचराचरविधायकजन्मदेशनाभीपुटायपुरुषायनमः
परस्मै॥१६॥ग॰॥इतिप्रणम्योत्थितानेतान्स्तुतिरवमुखरितहरिन्मुखान्हरिहयप्रमुखानखिलानमरगणानरु
णतामरसविलासचोरैर्लोचनमरीचिवीचिसंचारैरानंदयन्नरविंदलोचनः स्फुटमभाषत॥प॰॥अपिकुशल

ममर्त्यास्त्वागतं सांप्रतं वः शमितदनुजदंभाकिंनु दंभोलिकेलिः॥ अपि धिषणमनीषानिर्मितानीतिमार्गास्त्विदशनगरयोर्योगक्षेमकृत्यैक्षमंते॥१७॥ ग०॥ एवं भगवतः कुशलानुयोगपुरःसरीममृतासाररसरसां सरस्वतीमाकर्ण्य संपूर्णमनोरथासुमनसां संसत्तुं से परस्मै विज्ञापयामास॥ देव कथमकुशलमाविर्भवेद्भवताकृतावलंबानामस्माकं॥ किंतु॥ प०॥ अस्ति प्रशस्तविभवैर्विबुधैरलंघ्या लंकेति नाम रजनीचरराजधानी॥ माणिक्यमंदिरभुवां महसां प्ररोहैस्तेजस्त्रयाय दिनदीपदशां दिशंती॥१८॥ एनां पुराणनगरीं नगरीतिसालां सालाभिराममुजनिर्जितयक्षराजः॥ हेलाभिभूतजगतां रजनीचराणां राजा चिरादवति रावणनामधेयः॥१९॥ यद्वाङ्कुराङ्कुरसनायितशस्त्रधारादिक्पालकीर्तिमयचंद्रमसं ग्रसंते॥ तद्वैरिणां रणमुखे शरणप्रदायी नैवास्ति कश्चिदमुमंतकमंतरेण॥२०॥ अंभोजसंभवममुं बहुभिस्तपोभिराराधयन्वरमवापपरैर्दुरापं॥ तस्मात्समस्तभुवनं निज-

टिप्पणं॥ ॥ बृहस्पतिः१॥ ॥अलब्धस्यप्राप्तिः योगः। लब्धस्यपरिपालनं क्षेमः२॥

शासनस्य लक्ष्मीकरोति रजनीचरचक्रवर्ती ॥ २१ ॥ ग० ॥ तेन वयं पराधीना इव भवामः ॥ तथा हि ॥ सोयं कदाचन क्री
डाधराधरमधिरुह्य सावरोधवधूजनश्चरणाभ्यां ततइतः संचरेच्चेदागमिष्यत्यागु इत्यनाविष्कृतातपो भयेन भ
गवान्सहस्रभानुरपि संकुचितभानुरेव तत्सानूनि नूनं समाश्रयते ॥ एष मृगांकोपि मृगयायासपरिश्रांति वि
श्रांत्यै स संभ्रमं नमज्जन परिहृते मज्जनगृहाभिमुखे निर्जितशातमखे दशमुखे तत्रत्य विचित्रतरशातकुंभ
स्तंभाग्रप्रत्यग्र प्रत्युप्तस्फटिकशिलाशालभंजिका पुंजकरतलकलित निजोपलमयकलशमुखाद च्छाच्छाम
विच्छिन्नपातांबुधारां निजकराभिमर्शादापादयन्नूतस्य प्रसादपिशुनानां शुनासीरचिरकांक्षितानां विंशतिवीक्ष
णानां क्षणमात्रं पात्रं भवति ॥ तेन पुलस्त्य नंदनेन संक्रंदननंदनवनात्स्वमंदिरोद्यानमानीतस्य मंदारप्रमुखस्य छं-
दारकतरुछंदस्य बंदीकृतसुरसुंदरीनयनेंदीवरद्वंद्वात् तत्करारविंदकनककलशाच्च मंदोष्णं स्यंदमानैरंबुभिर्जंबा
लितालवालस्य पचेलिमानां मपि कुसुमानां पतनभयमाशंकमानाः पवमानाः संततं परिस्पंदितुमपि प्रभवो न भ
नां

वंति॥ एतेपिपावकारूढिशांकांकुतवहारव्यांवहंतस्तद्गृहेगार्हपत्यपुरःसराः पौरोगवीं धुरंदधति॥ किंबहुना॥
सएषमानवादवमानआगमिष्यतीत्यमन्वानस्तदितरैरवध्यत्वंचतुराननवराल्लब्ध्वासमुद्धतः संप्रतिसंप्रहा
रसमाक्रांतदिगंतदंतावलदंतकुंतव्रणकिणस्थपुटितवक्षस्स्थलः स्थलकमलिनींवनवारणइवरावणस्त्रि
लोकीमभिभवन्भवदीयानित्यस्मान्नजातुकिंचिदपिजानातीति॥ अथभगवानाकर्ण्यगीर्वाणगणवाणीं॥ प॰॥
इंद्रनीलाचलोदंचच्चंद्रिकाधवलस्मितः॥ वाचमूचेसुधाधारामधुरांमधुसूदनः॥ २२॥ ग॰॥ भवतामपराधवि
धायिनस्तस्ययातुधानस्यनिधनमधुनैवविधातुंशक्यं॥ किंतुसरसिजासनशासनमप्यमोघीकुर्वन्नुवशितलेपु
त्रीयतः सुत्रामभित्रस्यदशरथस्यमनोरथमपिपूरयितुमादृतमानुषवेषः सन्नहमेवतंवधिष्यामीत्युक्त्वांतर
धात्॥ ततः सापरिषदनिमिषाणामुन्मिषितहर्षाणांहृषीकेशादेशात्प्रशमितदुर्दशानिनिर्दशाननानिचतुर्दश

टिप्पणं॥ ॥पुरोगाः १॥

भुवनानि बुध्वा दुग्धसागरान्निरगात्॥ ततस्तानमरान् प्राहस्म पितामहः॥ भवंतस्तावदवतरिष्यतो लक्ष्मीसहाय
स्य सहाय्यार्थमप्सरःप्रभृतिषु युवतिषु वानरभल्लगोपुच्छवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति॥ पुराखलु
मम जृंभारंभे संभूतो जांबुवानिति॥ ततस्ते गीर्वाणास्तथाकुर्वन्॥ अथवैतानाद्दैश्वानरान्नरः प्राजापत्यः सहेमपात्रः कश्चि
दुत्थाय दशरथाय पुत्रीयते पायसममृतप्रायं प्रायच्छत्॥ ततः॥ प०॥ कौसल्यायै प्रथममदिशद्भूपतिः पायसार्धं प्रा
दाद्दर्ध प्रणयमधुरं केकयेंद्रस्य पुत्र्यै॥ एते देव्यौ तरलमनसः पत्युरालोच्य भावं स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां
सुमित्रां॥२३॥ अवभृथे वसिते सरयूतटादथ यथायथमुज्वलिते जने॥ दशरथः परिपूर्णमनोरथः पुरमगा खुरुहूत
पुरोपमां॥२४॥ अपाटवात्केवलमंगकानां मनोज्ञकांतेर्महिषीजनस्य॥ शनैःशनैः प्रौषितभूषणानि चकाशिरे दौर्हृ
दलक्षणानि॥२५॥ मंदमंदमपयाद्वलित्रयी गाधताविषयनाभिगह्वरा॥ कोसलेंद्रदुहितुः शनैरभून्मध्ययष्टिरपिद्व

॥ टिप्पणं॥ ॥ असामर्थ्यात्१॥ ॥ प्रोज्झितानि२॥

ष्टिगोचरा ॥२६॥ न्यग्रोध[1]पत्रसमतां क्रमशः प्रयाता मंगीचकार पुनरप्युदरं कृशांग्याः ॥ जीवातवे[2] दशमुखोर
गपीडितानां गर्भच्छलेन वसता परमेण पुंसा ॥२७॥ अपिच॥ मध्यं तनुत्वादविभाव्यमानमाकाशमासीदसि
तायताक्ष्याः॥ गर्भोदये विष्णुपदापदेशात्कार्श्यं विहायापि विहाय[3] एव ॥२८॥ उच्चस्थे ग्रहपंचके सुरगुरौ सेंदौ
नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुयुते मेषंगते पूषणि ॥ निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेरा
विर्भूतमभूतपूर्वमभवद्यत्किंचिदेकं महः॥ २९॥ अपिच॥ अथ रामाभिधानेन कवेः सुरभयन्गिरः॥ अलंचकारक
कारुण्याद्घृणामन्वयं हरिः॥ ३०॥ तमेव मन्वजायंत त्रयस्त्रेताग्नितेजसः॥ अग्रजं तेनुकुर्वंतस्तैस्तैर्लोकोत्तरै
र्गुणैः॥ ३१॥ भरतस्तेषु कैकेय्यास्तनयो विनयोज्वलः॥ अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ॥ ३२॥ एते वद्ध
धिरे वीराः प्रजाक्षेमाय दीक्षिताः॥ लोकानंदा मुकुंदस्य चत्वार इव बाहवः॥ ३३॥ ग०॥ अथ कदाचिदपरिमेयमायाभ

टिप्पणं॥ ॥वटः गरुडश्च १॥ ॥जीवनरक्षणाय २॥ ॥आकाशं ३॥

यानकयुद्धसमुद्धतदैत्यबलावस्कंदकौंदिशीकवृंदारकानीकप्रतिपाल्यमानमहारथः पैंक्तिरथस्तपश्चर्याजाता
नामाश्चर्याणामायतनं त्रिशंकुयाजिनं भगवंतं पद्यप्रबंधमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्ण
व्यत्यासं बुधमिव सौमसुतं कुशिकसुतमद्राक्षीत् ॥ तदनु यथाविधिपरिगृहीतसपर्येण मर्यादातीतमहिम्नागा
धेतरहृदयेन गाधिनंदनेन सत्रपरित्राणार्थमित्थमभ्यर्थितः पार्थिवोभूत् ॥ राजन्तवकुमारेण विनयाभिरामे
ण रामेण शरासनमित्रेण सोमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षोरक्षोदुरितमुत्तीर्यकृतावभृथो भवितु
मभिलषामीति ॥ एवंविधमाकर्ण्य कर्णपरुषं महर्षिभाषितं ॥ अतिमात्रपुत्रवात्सल्यात्कौसल्याजानिः सशल्यांतः
करणोभूत् ॥ ततस्तस्मिन्बहुप्रकारैरपरिहार्यनिश्चये भगवति विश्वामित्रे दशरथस्तपनकुलहितेन पुरोहितेनैव
मभिहितोभूत् ॥ प० ॥ पर्याप्तकामाय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय ॥ निर्यातुधानां वसुधां विधातुं निर्या

॥ टिप्पणं ॥ भयद्रुतः १ ॥ दश २ ॥ चंद्रः वल्ली च ३ ॥ विश्वामित्रं ४ ॥ आगार्धं ५ ॥ दीक्षांतस्नानं ६ ॥ रक्षोहीनां ७ ॥

तुरामः सहलक्ष्मणेन ॥ ३४ ॥ ग० ॥ एवंवसिष्ठेनप्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेनकुशिकसुतमनोरथमेवपूरयामास ॥ प० ॥ योगेनलभ्योयः पुंसांसंसारापेतचेतसां ॥ नियोगेनपितुः सोयंरामः कौशिकमन्वगात् ॥ ३५ ॥ तत्रसत्रंपरित्रातुंविश्वामित्रोमहामुनिः ॥ सौमित्रिसहितंराममंनयन्नयमवोचत ॥ ३६ ॥ बलेनतपसांलब्धेबलेत्यतिबलेतिच ॥ विद्येतेमयिकाकुत्स्थविद्येतेवितरामिते ॥ ३७ ॥ ग० ॥ ततः परिगृहीतविद्यस्यदाशरथेः प्रदेशमेकंप्रदर्श्यभगवानित्थमकथयत् ॥ प० ॥ अस्मिन्पुरापुरभिदः परमेश्वरस्यफालांतरालनयनज्वलनेमनोभूः ॥ सद्यः प्रपद्यशलभत्वमसुंचदंगंतस्मादसुंजनपदंविदुरंगसंज्ञं ॥ ३८ ॥ ग० ॥ तदनुमानससरः प्रसृतांसरयूमतिक्रम्यवृत्रवधप्रवृद्धवृद्धश्रवः पंकक्षालनलब्धमलदकरूशकनाम्नोर्जनपदयोः सीम्निकृतपदयोर्दाशरथ्योः पुनरप्येवमब्रवीत् ॥ प० ॥ यक्षः सुकेतुर्दुहिणप्रसादाल्लेभेसुतांकामपिताटकाख्यां ॥ सुंदः किलैनांपरिणीयतस्यांमारीच

टिप्पणं ॥ आज्ञयायोगाभावेनच १ ॥ कपालमध्ये २ ॥ पतंगत्वं ३ ॥ ब्रह्मदेवस्य ४ ॥ विवाह्य ५ ॥

नीचंजनयांबभूव॥ ३९॥ ग०॥ एकदातुसुंदेनिहतेमारीचः कुंभसंभवमुनिमभिभूयतस्यशापादवापकौणपतां ताट
काप्यासीत्पुरुषादिनी॥ सेयमाजन्मसिद्धसिंधुरसहस्रप्राणाजनपदविपदं विदधाना व्यापादनीयात्वयेति॥ किंच॥
वैरोचनीं मंथरां वसुंधरापराधधुरंधरां पुरंदरेण निहतां जनार्दनकृतार्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमंदां
सुंदवधूवधचिकित्सामुत्सादयामास॥ प०॥ आश्रुतः श्रुतवृत्तेन तेन सुंदप्रियावधः॥ तमेवान्ववदत्तस्यचापः सिं
जारवच्छलात्॥ ४०॥ तत्कालेपिशिताशनाशपिशुना संध्येव काचिन्मुनेरध्वानं तरसारुरोध रुधिरक्षोदारुणादा
रुणा॥ स्वाधीनेहननेपुरीं विदधतीमृत्योः स्वकृत्यात्यया क्रीडत्किंकरसंघसंकटमहाशृंगाटकां ताटका॥ ४१॥
यथादाशरथेः कर्णमविशत्ताटकागुणः॥ तथाधनुर्गुणस्तूर्णमविशत्तज्जिघांसया॥ ४२॥ ततोभाविनिसंग्रामेब
द्धश्रद्धस्यताटका॥ स्वप्राणैोरामबाणस्यवीरपानमकल्पयत्॥ ४३॥ मुनिः कृशाश्वोपज्ञानि ताटकामाथिने ददौ॥

टिप्पणं॥ ॥राक्षसतां१॥ ॥ राक्षसी २॥ ॥ गजः ३॥ ॥ मौर्वी ४॥ ॥चतुष्पथः ५॥ ॥आद्यं ज्ञानं ६॥

अस्त्राणिजृंभकादीनिजंभशासनशासनात्॥ ४४॥ ग॰ ॥ तत्रकंचनविरिंचिलोकप्रत्यादेशं[1]प्रदेशमेकंप्रदर्श्यावोच
दुपचीयमानपरमहर्षोमहर्षिः॥ प॰॥ प्रतिदिनमवदातै[2]र्ब्रह्मभिर्ब्रह्मनिष्ठैः प्रशमितभवखेदैः सादरंसेव्यमानः॥
बलि[3]नियमनहेतोर्वामनः काननेस्मिन्बलिनियमपरः सन्ब्रह्मचारीचचार॥ ४५॥ अपिच॥ अपहृतविबुधार्ते
र्वामनव्याजमूर्तेरखिलभुवनभिक्षोराश्रमानोकहानां[4]॥ ततिरियमतिनीलाव्याप्तदिग्व्योमसीमास्वयमपिपरिमातुंलो
कमभ्युद्यतेव॥ ४६॥ इतिविविधरसाभिः कौशिकव्याहृताभिः श्रुतिपथमधुराभिः पावनीभिः कथाभिः॥ गलितग
हनकृच्छ्रंगच्छतोर्दाशरथ्योः समकुचदिवसस्तादृशंमार्गदैर्घ्यं॥ ४७॥ ग॰ ॥ ततः सिद्धाश्रमंप्रविश्यविश्वामित्रः स
त्रमारभत॥ तदनंतरमंतरिक्षांतरालादापतंतमंतकानीकभयानकंपलाश[5]गणमवलोक्यपलायमानाः करत
लगलितपलाशसमित्कुशाः कुशिक[6]नंदनांतेवासिनः ससंभ्रममभिलषिताहवायराघवायन्यवेदयन्॥ प॰॥ दृ

टिप्पणं॥ निराकृतिः १॥ विशुद्धैः २॥ दैत्यः ३॥ वृक्षाः ४॥ राक्षससमूहः ५॥ विश्वामित्रः ६॥

लाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नटित्वा मुहुः ॥ सिक्त्वा स्वामसृ-
जा स्त्रजां त्रकृतया बध्वा कचान्खेचरान्दग्ध्वाग्नेः सदृशा दृशा निशिचरा रुंधंति रंध्रं दिवः ॥ ४८ ॥ तत्र ॥ संक्रांत वर्णांत
र गाधिसूनोः संपर्कपुण्यादिव रामभद्रः ॥ क्षात्रक्रमासिप्पलदंडयोग्यः पलाशदंडाद्दतपाणिरासीत् ॥ ४९ ॥ मारीचनी
च मतिराहवमाचरय्य क्षिप्तः क्षणेन रघुनायकसायकेन ॥ मध्येपयोनिधिभयेन निमग्नमूर्तिर्वैषं पुपोष जलमा
नुषनिर्विशेषं ॥ ५० ॥ सुबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा ॥ मुनीनामनभिप्रेतः प्रेतनाथातिथीकृतः ॥ ५१ ॥ वं
शस्पृशात्हृदयहारिफलान्वितेन रामेरितेन रघुनायकसायकेन ॥ स्नेहान्वितेन निरगादनुरागिणीव प्राणावलीत्हृ
दयतः पिशिताशनानां ॥ ५२ ॥ अथ निशिचरघाताच्छांतवैतानविघ्नो मुनिरवभृथकृत्यं विश्वत्हृद्यं समाप्य ॥ अमनु
त जयलक्ष्म्या राममाजौ समेतं यजनजनितमूर्त्यायोक्तुमव्याजलक्ष्म्या ॥ ५३ ॥ ग० ॥ अथ मिथिलां प्रतिप्रस्थि तो

टिप्पणं ॥ राक्षसः किंशुकश्च १ ॥ तैलं प्रेम च २ ॥

विश्वामित्रः काकुत्स्थयोरित्थमकथयत्॥ पुरा खलु कुशोशयासनजन्मा कुशिकाभिधानो राजर्षिः कुशनाभकुशा
म्बप्रमुखैश्चतुर्भिः कौशांबीमहोदयधर्मारण्यगिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव॥ कुशनाभस्तु कन्याशतं
घृताच्यामजनयत्॥ कन्यास्ताः सन्नद्धयौवनाः कामयमानः पवमानः प्रत्याख्यानात्प्रत्यापन्नमन्युरासामवयवे
ष्वैनार्जवमतनुत॥ अथ विदितवृत्तांतेन कुशनाभेन तेन क्षमामेव प्रतिक्रियां मन्वानेन चूलिसूनवे सोमतेयाय
राज्ञे ब्रह्मदत्ताय प्रदत्तास्ताः प्रकृतिस्थाः बभूवुः॥ पुनरपि कुशनाभस्तु पुत्रीयन् पितृप्रसादादगाधसत्वान् गाधि
संज्ञानस्मत्तात तपादानुदपादयत्॥ इत्थं दाशरथिः कौशिकोत्पत्तिकथा निशमनेन निरायामां यामिनीमनुभूय बं
धूकस्तबकबंधुरेण संध्यारागेण प्राचीमुखे शोणीकृते शोणाभिधानं दधानेन दे प्रवर्तितप्रत्यूषःकृत्यः कृतनिय
मेन मुनिना सह गंगामुपतिष्ठमानेन पथा प्रातिष्ठत॥ प०॥ ओँजानपावनक्षीरां द्वैषानंदविधायिनी॥ श्रुतिप्रणयि

टिप्पणं॥ ॥वक्रतां१॥ ॥सरलाः२॥ ॥उन्नतेन३॥ ॥जन्मपर्यंतं वसोच्छिष्टं च४॥ ॥धर्मः बलीवर्दश्च५॥ ॥वेदः कर्णश्च६॥

नींसोयमां[1]पगामापगामिव ॥ ५४ ॥ ग० ॥ अथ भागीरथीकथांश्रोतुकामायरामायभगवानित्थमभाषत ॥ प० ॥
पुरातु मेनका नाम सुमेरोरभवत्सुता ॥ गृहमेधीतयेवासीच्चक्रवर्ती धराभृतां ॥ ५५ ॥ कन्याद्वयममुष्यासीदेका मंदाकि-
नी तयोः ॥ अन्या भगवती साक्षाच्चंद्रचूडकुटुंबिनी ॥ ५६ ॥ तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन् ॥ तपस्यंतीं गि-
रिर्गौरीं देवाय महते ददौ ॥ ५७ ॥ शिवयोर्युंजतोर्वीर्यं धृत्वा धात्र्यासमर्पितं ॥ पावकः प्रतिजग्राह देवतैरनुमोदितः ॥ ५८ ॥
अनपत्यान्यथामर्त्यान्बहुभार्यांश्च मेदिनीं ॥ अकरोदंबिकाकोपः पुत्रालाभसमुद्भवः ॥ ५९ ॥ अथ सेनान्यमिच्छद्भिरुक्तः
सब्रह्मभिः सुरैः[2] ॥ वह्निरेकाय जाह्नव्यां न्यषिंचद्वीर्यमैश्वरं ॥ ६० ॥ सापि सप्तार्चिषाक्षिप्तं तेजस्तत्सोढुमक्षमा ॥ हिम-
वत्प्रांतकांतारे श्रांता शरवणे[3] जहौ ॥ ६१ ॥ तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखांबुजं ॥ तारकध्वांतविध्वंसि सद्यः षा-
ण्मातुरं महः ॥ ६२ ॥ त्रैविध्यं श्रूयतां वत्स सरितस्त्रिदिवौकसां ॥ यथोक्तं हव्यमभ्यंत्यादेवतायाइवाध्वरे ॥ ६३ ॥ पुरीम

टिप्पणं ॥ गंगां १ ॥ झटिति २ ॥ वीर्यं ३ ॥

योध्यामध्यास्त सावित्रः सगरो नृपः॥ केशिनीसुमतिभ्यां च लंघितप्रथमाश्रमः॥ ६४॥ सपुत्रीयन्सपत्नीकस्तपस्तेपे
हिमालये॥ भृगुः प्रीतमनास्तस्मै ददौ दायादसंपदं॥ ६५॥ असमंजसुतं लेभे वैदर्भी केशिनी तयोः॥ षष्टिं पुत्रसहस्रा
णां सुमतिश्च यवीयसी॥ ६६॥ असमंजसचारित्रमसमंजमपास्य सः॥ आरब्धहयमेधः सन्नमुंचत तुरंगमं॥ ६७
क्रव्यादवपुषा सोयमहारि हरिणा हयः॥ ततस्तन्नष्टमन्वेष्टुं सोमतेयाः प्रतस्थिरे॥ ६८॥ सर्वे सपर्वतामुर्वी ख-
नंतः सगरात्मजाः॥ चक्रुर्झर्झरितध्वांतं नागलोकं नखांशुभिः॥ ६९॥ त एते तपसा दीप्ते तमस्तोमप्रमाथिनि॥ का
पिले ज्वलने वीरा लेभिरे शलभोपमां॥ ७०॥ असमंजसुतं पौत्रमंशुमंतमथाब्रवीत्॥ सप्तिं त्वहृत्वा समाधत्तांर्स
मतंतुं भवानिति॥ ७१॥ सोपि गत्वा बिलं तत्र दृष्ट्वा भस्मीकृतान् पितॄन्॥ साश्रुस्तेभ्यो जलं दित्सुश्चिरं लेभे तुरंग
मं॥ ७२॥ मातुलो गरुडस्तेषामेनं तत्रैवमब्रवीत्॥ गंगामिहानयायुष्मन्नेषामेषा गतिः परा॥ ७३॥ ततस्तन

टिप्पणं॥ ॥पुत्रः१॥ ॥निरस्त२॥ ॥अश्वं३॥ ॥यज्ञं४॥ दातुमिच्छुः५॥

यद्वृत्तांतं श्रुत्वा लब्धतुरंगमः॥ समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः॥ ७४॥ अथांशुमानयं राज्यं चिराय परि
पालयन्॥ दिलीपे न्यस्त भूभारस्तपस्तेपे हिमालये॥ ७५॥ दिलीपे पि दिवं याते श्रुत्वा वृत्तं भगीरथः॥ पितॄन्विधा
तुं सुगतीन्विदधे मतिमान्मतिं॥ ७६॥ अमर्त्यसरितं कर्तुं मेने मर्त्यतरंगिणीं॥ ततो गोकर्णमासाद्य तपस्यति भगी
रथे॥ ७७॥ देवो देवापगां वोढुमन्वमंस्त दयानिधिः॥ अथ वीचीचयच्छन्न दिगंत गगनांतरा॥ ७८॥ शशांक शंख-
संभिन्न तारा मौक्तिक दंतुरा॥ तरंगाकृष्ट मार्तंड तुरंगा यासितारुणा॥ ७९॥ फेनच्छन्नस्समातंग मार्गण व्यग्र वास
वा॥ आविःशाखि शिखोन्नेय नंदनद्रुम कर्षणा॥ ८०॥ एकोदक नभोमार्ग दिङ्मूढ दिवसेश्वरा॥ आवर्त गर्त सं
भ्रांत विमान प्लव विप्लवा॥ ८१॥ नील जीमूत शैवाल कृत लेखा हरित्तटा॥ ऐवलेप भराक्रांता सुरलोक तरंगिणी॥
॥ ८२॥ पपात पार्वतीकांत जटामंडल गह्वरे॥ अलब्ध निर्गमा स्वांभोः कैपर्दादमरापगा॥ ८३॥ दधो दूर्वा शिखा

टिप्पणं॥ ॥ जलभ्रमः १॥ गर्वः २॥ जटाजूटः ३॥

लग्नतुषारकणिकोपमां ॥ अदृष्ट्वा तान्नदीं तत्र तुष्टाव परमेश्वरं ॥ ८४ ॥ भगीरथो विधेः क्रौर्यात्परिक्षीणमनो
रथः ॥ गंगासप्ताकृतिर्जाता न्यपतद्धरमूर्द्धतः ॥ ८५ ॥ तेन स्तुत्या प्रसन्नेन क्षिप्ता बिंदुसरस्यपि ॥ तासु प्राचीं गता
स्तिस्रस्तिस्रः प्रोचेतसीं दिशं ॥ ८६ ॥ अन्यापितृक्रियोद्युक्तभगीरथरथानुगा ॥ सैषा भागीरथी जह्नोः सत्रक्षेत्रं स
माप्नुणोत् ॥ ८७ ॥ तां स पीत्वा ततः शांतो जह्नोः श्रोत्रेण वर्त्मना ॥ तया तटिन्या जाह्नव्या प्रापय्य त्रिदिवं पितॄन् ॥ ८८ ॥
भगीरथः पुरं प्राप परिपूर्णमनोरथः ॥ ८९ ॥ ग॰ ॥ अथ दाशरथिराकर्णितभागीरथीकथस्तां सरितं विलंघ्य वि
शालां पुरीं विलोकयन् कस्येयमिति गाधिनंदनमपृच्छत् ॥ सोप्येवमवोचत् ॥ पुरा खलु सुरासुराणां सुधानिमित्तं
मिथो विरोधे प्रवृत्ते मायां विश्वमोहिनीं विश्वरूपः प्रदर्श्य दैतेयनिधनं शतधारपाणिना कारयामास ॥ तेषां तु ज
ननी दितिरतिवेलमभ्युपगतमन्युः शेतमन्युशासनं कमपि पुत्रं लब्धुकामा पत्युर्मरीचेर्वचनात्कुशप्लवने सुचि

टिप्पणं ॥ वारुणीं १ ॥ विष्णुः २ ॥ इंद्रः ३ ॥

रं तपश्चचार ॥ तां कैतवेन शुश्रूषमाणः शक्रः शतधारपाणिः पादकलितकेशकलापामापन्ननिद्रामपवित्रेति निर्व
र्ण्यावगाहितनदीयजठरः सप्तधा गर्भं निर्भिद्य निर्जगाम ॥ दितिरपि विदिततनयकदना तान्यपि खंडान्याखंडलेन
सप्तमरुतः कारयित्वा त्रिविष्टपं प्रविष्टा ॥ ततः ॥ प० ॥ अलंबुसायामिक्ष्वाकोर्जातः कश्चिन्महीपतिः ॥ विशालः
स्वेन नाम्नात्र विशालां विदधे पुरीं ॥ १० ॥ तदनु ॥ ग० ॥ तद्वास्तव्येन सुमतिनाम्ना नृपतिनाकृतातिथ्यः स राजपु-
त्रो विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रतिप्रस्थितः प्रतपसामुत्तमस्य गौतमस्याश्रमं प्रदर्श्य तद्दारानुषक्तां
कथामित्थमकथयत् ॥ प० ॥ अत्रागमद्गौतमधर्मदारानन्नार्यजुष्टेन पथा महेंद्रः ॥ क्रुद्धस्ततो निर्वृषणं वृषाणं भार्याम
दृश्यां च मुनिश्चकार ॥ ११ ॥ वनमेतद्गते रामे शापान्मुक्ता भविष्यसि ॥ इत्युक्त्वा गौतमः पत्नीं हिमाद्रिं तपसे ययौ ॥ १२ ॥ त
तो विदितवृत्तांते देवतानां गणे तदा ॥ पितॄणां प्राभवाल्लेभे मेषस्य वृषणं वृषा ॥ १३ ॥ तदेनामेनसो मुक्तां प्रतिगृह्णातु गौत

टिप्पणं ॥ ॥संबद्धां १॥ ॥निरंडः २॥ ॥इंद्रः ३॥ ॥शिलां ४॥ ॥अवेः ५॥

मः॥ इतितस्याश्रमं भेजेसाकंरामेण कौशिकः॥१४॥ ततः॥ दुःखेसुखेच रजएव बभूव हेतुस्तादृग्विधे महति गौतम
धर्मपत्न्याः॥ यस्माद्गुणेन रजसा विकृतिं गता सा रामस्य पादरजसा [1]प्रकृतिं प्रपेदे॥१५॥ ग॰॥ तस्मिन्नहल्यया कृतमा
तिथ्यं विश्वामित्रः सराजपुत्रः प्रतिगृह्य मिथिलो[2]पकंठभुवि जातं जनकयजनभवनमभजत॥ तदनु जनकेन वि-
धिवदभ्यर्थिते तस्मिन्कुशिकसुते निमिकुलपुरोधाः शतानंदो रघुनंदनमेवमभाषत॥ प॰॥ तिष्ठन्नक्षैत्राहैदृष्टो मु
निरगमदसावाश्रमं ब्रह्मसूनोरातिथ्यं तत्र लब्ध्वा निरवधि सुरभिप्राभवादित्यवेत्य॥ सोनेन प्रार्थितो भूत्तदनु मुनि
वरेणाभ्युपेते च कर्षन्क्रोशंतीं तां तथैव प्रचुरबलजुषा कांदिशीको बभूव॥१६॥ ग॰॥ बकुशस्त्रबलचकितस्य तपो
बलाधिगतविविधायुधनिर्गमस्य सुरभिनिमित्तं भूयोपि समारब्धसमरस्य दिव्यास्त्रपरंपरां ब्रह्मदंडेन निरुंधन्न
रुंधतीजानिरवतस्थे॥ ततो यं जातव्यलीकः क्षात्रतेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दक्षिण

टिप्पणं॥ पूर्वरूपं १ ॥ अंतिक २॥ मृगयाव्यापारः ३ ॥ वेदस्य ४ ॥ वसिष्ठः ५ ॥ दुःखं ६॥

स्यांदिशि तीव्रतरं तपश्चचार॥ अथ सावित्रः क्षत्रियस्त्रिशंकुः सशरीरः स्वर्गसिद्धिं प्रार्थयमानो वसिष्ठेन प्रत्या
ख्यातस्तस्य पुत्रैर्महोदयादिभिर्निर्बंधकुपितैर्दत्तचंडालभावस्तमेनं शरणमभजत॥ असावपि तन्मनोरथपूर्त
ये क्रतुमेकं कर्तुं प्राक्रमत॥ तत्र समागतेषु ब्राह्मणेषु जिगुप्सया त्रिशंकुयजने नागतान्वसिष्ठपुत्रानयं शापेन
श्वभक्षकानकरोत्॥ तत्र क्रतुभुजां वर्गेपि स्वर्गादनवतीर्णे॥ प०॥ अयं महात्मा तपसः प्रभावादारोपयामास दि
वं त्रिशंकुं॥ नीलांबरं निंकृतराजवेषं वर्षानिशीथादविशेषवेषं॥ १७॥ ततः॥ अपातयत्स्वर्गमुपाश्रयंतं संजात
मन्युः शतमन्युरेनं॥ ततोवलंब्यास्य नियोगशंकुं लेभे त्रिशंकुर्गगने प्रतिष्ठां॥ १८॥ ग०॥ ततः सर्वगीर्वाणगणप्रार्थ
नया परित्यक्तभुवनांतरनिर्माणकर्माणं तत्र तपः प्रत्यूहः प्रत्युद्भूत इति पश्चिमायां दिशि पुष्करे पुष्कलं तपश्चरंत
ममुमंबरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीतान्नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः

टिप्पणं॥ कुत्सया १ ॥ त्यक्तः २ ॥

शुनःशेपः शरणमयाचत॥ अयं भगवान्निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो ह
विष्यंदादिभ्यः शापेन वसिष्ठपुत्रदशां दत्वा गाथाद्वयप्रीताभ्यामिंद्रोपेंद्राभ्यामंबरीषं शुनःशेपंच परिपूर्णमनोर
थौ कारयामास॥ ततः तपस्यंतमेनं मेनकासंगतस्तपोभंगश्चिरमंगीचकार॥ ततः पश्चात्तापाभिभूतोयमुत्त
रे भूभृति कौशिकीतीरे घोरं तपश्चचार॥ तत्र जंभारिप्रहितां रंभां शैलीभवेति शप्त्वा पूर्वस्यां दिशि निरस्त निश्वा
सं तपश्चरत्यमुष्मिन्भूभ्रमणात पोग्नेरुद्विग्नमानसस्तामरसासनः सन्निधाय जितेंद्रियत्वात् त्वं ब्रह्मर्षिरसि वसि
ष्ठोप्येवं व्याहरतु भवंतमित्यभाषत॥ प०॥ असौ वसिष्ठनिर्देशाद्ब्रह्मर्षित्वमविंदत॥ यथौपनयसंस्काराद्द्विज-
न्मा ब्रह्मवर्चसं॥९९॥ इति जनकपुंरोधःश्लाघितो गाधिसूनुः सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा॥ विधिवदर्द्द
शदर्घ्यपुष्पदर्भापगर्भसरसिजदयितायज्योतिषे छांदसाय॥१००॥ ग०॥ तदनु जनकराजधानीं रामलक्ष्मणनिरी

टिप्पणं॥ ॥ब्रह्मदेवः१॥ ॥व्रतबंधः२॥ ॥पुरोहितः३॥ ॥सूर्याय४॥

क्षणकौतुकादनवरतपातितेनविकचकुवलयनिचयोपचीयमानमेचकमरीचिवीचिमलिम्लुचेनपौरनारीजनविलोचनरोचिषाकवचितनरपतिपथां विश्वामित्रःप्रविश्यदशरथतनयाविदमभाषत॥ अस्यांखलुनगर्यामारब्धयज्ञस्यराज्ञोजनकस्यभागधेयात्सीतानामधेयभाजनमजीजनत्कन्यारत्नंरत्नगर्भाभगवती॥ तस्याःपुनःकिंपरंकिमपिमाहात्म्यं॥ यतः॥ प०॥ यस्याः पृथ्व्यावसनमुदधिःपीठिकाहाटकाद्रिर्हारःसिंधुःसगरतनयस्वर्गमार्गैकबंधुः॥ क्रीडाशैलःपरमपुरुषक्रोडदंष्ट्राचतस्याःसीतामातुर्जगतिमिथिलांसूतिकागेहमाहुः॥१०१॥ अत्रसीताविवाहार्थममरैरपिदुष्करं॥जनकःकल्पयामासधनुरारोपणंपणं॥१०२॥ ततोमहर्षिर्जनकस्यराज्ञःसभांसुधर्मासदृशींप्रपेदे॥ तौचापतुभ्यापविलोकलोलौसचापलौकोसलराजपुत्रौ॥१०३॥ तत्रविधिवदभ्यर्चितःकथितदशरथतनयवृत्तांतःकौशिकप्रमुखेरमरैरस्मत्कुलेमहत्तरेदेवरातेनिक्षिप्तंविशेषतःसीताशुल्कार्थमया

टिप्पणं॥ ॥नीलाः१॥ पृथ्वी २॥ हेमाद्रिः ३॥ गंगा ४॥ वराहः ५॥ अरिष्टं ६॥ सतृष्णौ ७॥

रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणे राममादिदेश ॥ प० ॥ रामे बाहुबलं वितन्वति धनुर्वंशो गुणा
रोपणं नाभूत्केवलमात्मनातिलकिते ——— वंशेपि वैकर्तने ॥ आकृष्टं नितरां तदेव न परं सीतामनोपि द्रुतं भंगस्त
स्य न केवलं क्षितिभुजां दोस्तंभदंभस्य च ॥ १०४ ॥ रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रौद्रोरुधा दृप्तक्षत्रयशः सिं
तच्छदकुले जीमूतनादायितं ॥ वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं मैथिल्याः किल मानसे परिणये मां
गल्यतूर्यायितं ॥ १०५ ॥ रवः कठिणकर्षणत्रुटितचापजन्मा क्षणाद्दिशां द्विरदफीत्कृतैः कृतहरित्पतिस्वागतः ॥
जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यंगनाप्रयाणपटहध्वनिं प्रथयतिस्म तारध्वनि ॥ १०६ ॥ ग० ॥ तत्र सीतापरि
णयकृतनियमजनकप्रहितदूताद्भूतः पुरोहिताभ्युपगमान्मिथिलामुपागमद्दशरथः ॥ प० ॥ यत्कीर्तिस्तिलकाय
ते सुरवधूसंगीतगोष्ठीमुखे येनाद्यः पितृमान्पुमान्वसुमती येनैव राजन्वती ॥ इंद्रः संगरसंकटेषु विजहौ वीरस्य

टिप्पणं ॥ ॥ द्यावापृथिवी १ ॥ राजहंसः २ ॥ मेघः ३ ॥ नञ्जानिशब्दैः ४ ॥

यस्योन्मुखप्रेंखत्स्यंदनकेतनांबरदशासंदर्शनादुर्दशां॥ १०७॥ ततः॥ जनकः स्वकनीयांसमाजुहाव कुशध्वजं॥ हृत्वायुधिसुधन्वानं सांकाश्यस्थापितं पुरे॥ १०८॥ तदनु ताभ्यामभ्यर्चितः सपुरोहितो दशरथस्तत्र पुत्राणां गोदान मंगलं निर्वर्तयामास॥ प०॥ जग्राह जनकात्सीतां तातादेशेन राघवः॥ आम्नायशासनेनार्चयजमानादिवानलः॥ १०९॥ ग०॥ आश्चर्यमेतत्॥ प०॥ गुणमनिमिषत्वापेक्षं चिदारोप्य सीतां कुशिकतनयवाक्यादग्रहीद्रामभद्रः॥ तदनु तदनुजन्मा मैथिलेंद्रस्य चित्ते निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोपि॥ ११०॥ ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः॥ मांडवी श्रुतिकीर्तिभ्यामभूतां ग्रहमेधिनौ॥ १११॥ ग०॥ अथ दशरथः स्वतनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानो दुर्निमित्तदूयमानांतरंगः संवर्तसमयसमुज्जृंभितहुतवहदुःसहरोषभीषणं दुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वंकषपरश्वधधाराधीनरुधिरधारापरिकल्पितपितृतर्पणं दर्पवतामग्रेसरं समुदयमान

टिप्पणं॥ ॥कनिष्ठं १॥ केशांतकर्म २॥ वेदः ३॥

तापंतपःसमुचितवल्कलमयवसनंवसानमपिवासनावशादनतिपरिमुषितयुद्धश्रद्धंमध्येमार्गंभार्गवंमुनि
मन्विष्टराममभद्रमद्राक्षीदप्राक्षीच्च॥तन्निरीक्षणादेवप्रक्षीणहर्षोपिमहर्षिभिःसहविधायसपर्यामार्यशीलः
कुशलमन्वयुंक्त॥प०॥अथदशरथवाणींतामशृण्वन्प्रसन्नांभृगुपतिरिदमूचेप्रस्थितंराममभद्रं॥अवजिगमिषु
रासंजीर्णचापात्तकीर्तेरविदितपरशोस्तेदोर्मदंकार्मुकेस्मिन्॥११२॥आदायतत्सगुणमाशुविधायतत्रसंधा
यबाणमवधार्यतपोधनत्वं॥तज्जीविताय दयमानमनामनीषीसंभूतघोरसमराद्विररामरामः॥११३॥तावु
भौचभृगुवंशसंभवौचापदंडजमदग्निसंभवौ॥[१]प्रंक्कभावमवलंब्यकेवलंराघवार्पितगुणौबभूवतुः॥११४॥युग
पत्प्राप्तगुणयोश्चापभार्गवयोस्तयोः॥ऋजुतावक्रतांप्रापवक्रतापितथार्जवं॥११५॥ग०॥ततस्तत्क्षणममोघेनरा
घवः शरेणभार्गवस्यस्वर्गगतिंरुरोध॥स्थानेहितत्॥प०॥नूनंजनेनपुरुषेमहतिप्रयुक्तमो[३]गः परंतदनुरूप-

टिप्पणं॥ ॥नम्रत्वं १॥ विनयः मौर्वीच २॥ अपराधः ३॥

फलं प्रसूते ॥ कृत्वा रघूद्वहगतेः क्षणमंतरायं यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥ ११६ ॥ ग० ॥ अथ संक्रांतया जामदग्न्यशा-
क्ति संपदा संपन्नं पन्नगपरिवृढभोगभुजाभिराममविरलपुलकमालिंग्य मूर्ध्न्युपाघ्राय दशरथः परिखयेव परि-
सरंत्या सरयूसरितानुविद्धामयोध्यां दारकान् सदारान् सादरमवलोकयंतीनां पौरपुरंध्रीणां नीरंध्रिनगवाक्षैः क-
टाक्षैः सौंदर्यवंचिततापिच्छैः पिच्छातपत्रायमाणधवलातपत्रः प्रविवेश ॥ प० ॥ तत्र ॥ लज्जावशादविशदस्मरवि-
क्रियाभिस्ताभिर्वधूभिरनिवेलमवाप्तसौख्यान् ॥ इक्ष्वाकुनाथतनयान्प्रथमो रसानां तारुण्ययोगचतुरश्चतुरः सिषे-
वे ॥ ११७ ॥ विद्यंयवत्त्रयीदृश्यादर्भपत्राग्रधीः सुधीः ॥ राजपुत्र्या तया रामः प्रपेदे प्रीतिमुत्तमां ॥ ११८ ॥ ॥ इति श्री
विदर्भराजविरचिते चंपूरामायणे बालकांडः समाप्तः ॥ ॥ अथ द्वितीयकांडप्रारंभः ॥ ॥ प० ॥ गच्छता दशर-
थेन निर्वृतिं भूभुजामसुलभां भुजाबलात् ॥ मातुलस्य नगरे युधाजितः स्थापितौ भरतलक्ष्मणानुजौ ॥ १ ॥ अथ द-

टिप्पणं ॥ ॥ वियातं १ ॥ ॥ श्रेष्ठः २ ॥ ॥ चतुःसंख्याकान् ३ ॥ सुखं ४ ॥ दुर्लभां ५ ॥

शरथः पुत्रं रामं स्वतस्त्रिजगत्पतिं स्वविषयमहीमात्रे कर्तुं पतिं विदधे मतिं ॥ भुवनभरणेकेल्पं फल्याणभूधरमादरा
त्स्वगृहपटलीधुर्यस्तंभं विधातुमनाइव ॥ २ ॥ ग० ॥ तदनंतरमसौ संमंत्र्य मंत्रिभिः सह पौरवृद्धान्वृद्धश्रवः पुरोध
सः समान्पुरोहितान्समाहूय समादिदेश ॥ विदितमेव हि भवतां शिवतातिमेव मतिं दधानाः सुपथा सुसंचरमाणाः त्रा
णिनां दयमानमानसाः मानधनाः अयशः संसरणि संमार्जनजागरूकाः जनोपतापमार्जनपराः परां निर्वृतिमुपे
त्य दैवभूयं गताः सर्वे नः पूर्वपुरुषा इति ॥ तस्मादस्माभिरप्यैते षां सरणिमनुसरमाणैरेतावंतं कालं परिपालिताः
किल सकलाः प्रजाः प्रमाणमत्र परिपालनक्रियामनुभवंतो ननु भवंतः ॥ एवं भवतामभ्युपगतानां निगमानां वा
मतीपगामिनीं पदवीं न प्रैत्येति खलु लोकस्तदस्ति किंचिदभ्यर्थनीयं ॥ प० ॥ ममसुरनरगीतख्यातिभिर्हेतिभिर्वा
दिविभुवि न समानप्रक्रमैर्विक्रमैर्वा ॥ नियतमपरिहार्या याजरा सामदंगे विकचकमलखंडे चंद्रिकेवाविरासीत् ॥

टिप्पणं ॥ ॥ धारणे १ ॥ समर्थे २ ॥ कल्याणकरीं ३ ॥ मार्गे ४ ॥ देवत्वं ५ ॥ पूर्वपुरुषाणां ६ ॥ विश्वसिति ७ ॥ शस्त्रैः ८ ॥ आरंभः ९ ॥

॥ ३ ॥ ग० ॥ तस्मात्समस्तक्षत्रवर्गगर्वपाटनपटुधारापरश्वधभरणभीषणवेषभार्गवभंगादपरिच्छिन्नतरशौ-
र्यशालिनि सौजन्यभाजने जनानुरागनिलये निर्मत्सरे मत्समेवत्सेऽस्मिन्विश्वंभराभारं चिरकालधार्यमाणमा-
र्यैरमात्यैरनुमतः सन्नवतार्य विश्रांतिसुखमनुभवितुमभिलषामीति ॥ ततः प्रावृषेण्यपयोवाहव्यूहस्तनि-
तनादाकर्णनसमुदीर्णनिरतिशयाल्हादनिसर्गनिरर्गलनिर्गलत्केकालापिनः कलापिन इव जनाः प्रमदभव-
कलकलरवमुखरितहरिन्मुखा बभूवुः ॥ प० ॥ आनंदबाष्पविसरो नयने प्रजानामाविर्बभूव मकरंद इवारविं-
दे ॥ रामस्य कांतिमभिषेकदिने भवित्रीं प्रक्षाल्य चक्षुरिव वीक्षितुमादरेण ॥ ४ ॥ ग० ॥ राजापि तेषां संपत्स्यमान-
महोत्सवोत्सुकजनसंमर्दजनिष्यमाणरजोराजिभ्रांतपरिजिहीर्षयेव रोमांचप्रपंचेन कंचुकितांगानां प्रमाणा-
तीतां प्रीतिं प्रपन्नानां हर्षप्रकर्षेण द्विगुणीकृतमानंदमंतर्नियम्य सुमंत्रप्रमुखान्मंत्रिमुख्यानेवमाचख्यौ ॥ प०

टिप्पणं ॥ ॥ नाशनं १ ॥ कुठारः २ ॥ अपरिमितं ३ ॥ श्रवणं ४ ॥ अपरिमितः ५ ॥ निष्प्रतिबंधं ६ ॥ हर्षः ७ ॥

अस्मान नाश्रित तपोवन भूमिभागानुन्मुच्य मार्गपरिपालनजागरूकान्॥ अम्लान मौग्ध्यमचिरादवलंब्य रा
ममेवंविधः कथमुदेतिजनानुरागः॥ ५॥ ग०॥ तेपिनियमितनिजमनोरथायदशरथायसविनयमेवंव्यजिज्ञ
पन्॥ प०॥ देवेस्थितेपिननयंतवराम भद्रंलोकस्स्वयंभजतुनाम किमत्रचित्रं॥ चंद्रं विनातदुपलंभनहेतुभूतं-
क्षीरोदमाश्रयतिकिंतृषितश्चकोरः॥ ६॥ ग०॥ तदनतरं तत्वरेतत्वविदांवरस्यवसिष्ठस्यशासनादभिषेकोपक
रणाहरणायसामात्यः पौरवर्गः॥ प०॥ आहूयरामंविनयाभिराममाविः प्रमोदप्रभुरेवमूचे॥ तवोत्तमांगेमुकु
टंविधातुमज्ञायतिष्येदिवसेयतिष्ये॥ ७॥ ग०॥ अथदशरथमनोरथंकौसल्यायैनिवेद्यस्वभवनमुपगतस्यराम
स्यभगवान्वसिष्ठः संजातकौतुकः कौतुकमंगलंनिर्वर्तयामास॥ प०॥ आपूरयन्मंगलतूर्यघोषैराशावशावल्ल
भकर्णतालान्॥ उज्जृंभितः कोपिगिराम भूमिरुन्मस्तकः पौरजनातिमोदः॥ ८॥ तत्र॥ यामेवाङ्कुर्निशिचरकुलो

टिप्पणं॥ ॥मस्तके १॥ ॥पुष्ये २॥ ॥दिग्गजाः ३॥

न्मूलने मूलहेतुं यस्याश्चित्तं प्रकृतिकुटिलं गात्रमिवं बभूव ॥ अंभोजिन्याः शिशिरसरितः कौसरी वाच्छमंभः केकेय्याः सा-
हृदयमदयं मंथरा निर्ममंथ ॥ ९ ॥ अलघुचलितझंझा[2]वातनिष्पेषदोषाद्दशनिरिव कठोरः शीतलांभोदपंक्तौ ॥ अपरहृ
तजनसौख्यान्मंथराभेदवाक्यादपि भरतजनन्यां हृतदौर्जन्यमासीत् ॥ १० ॥ ग० ॥ सैषा मंथराभिधानपिशाचिकावेशप
रवशा निजाशया पूर्वं दंडके वैजयंतपुरवास्तव्यशंबरासुरसंगरसंगतवेदनापनोदनवेतनार्थमात्मने वितीर्णवराय-
दशरथाय वरद्वयं न्यवेदयत् ॥ प० ॥ तयोरेकस्य संरंभो भरतस्याभिषेचनं ॥ अन्यस्य वन्यवृत्त्यैव वने रामस्य
वर्तनं ॥ ११ ॥ तस्मिन्क्षणे वरयुगं क्षणतप्ततान्त्रनाराच[3]वेधपरुषं श्रवसी[4] विदार्य ॥ सत्यप्रहाणचकितस्य नृपस्य काम
मूर्छां चकार हृदये पुटपाकरीतिं ॥ १२ ॥ तदनु तनयवार्तामात्रसंतप्यमानादथ दशरथचित्ताच्चेतना निर्जगाम ॥ दव
हुतवहरोचिर्ज्वालया लिह्यमाना झटिति गहनगुल्मादुज्जिहाना मृगीव ॥ १३ ॥ अथ दशरथः कथमपि लब्धसंज्ञः

टिप्पणं ॥ ॥महर्षी १॥ ॥सवृष्टिकवायुः २॥ ॥बाणः ३॥ ॥कर्णौ ४॥ ॥अंगीचकार ५॥

केकेयीमभाषत॥ प०॥ रामः काममुपाश्रयिष्यति वनं त्यक्त्वा धृतं कौतुकं लोकस्त्यक्ष्यति कौतुकं चिरधृतं तस्याभिषे
केकथं॥ धर्मापायभयेन वत्सविरहं द्रक्ष्यामि वक्ष्यामि किं यावत्कल्पमकीर्तिरार्तिजननी जायेत जायेत व॥१४॥ व
त्सं कठोरहृदयेन नयनाभिरामं रामं विना न खलु तिष्ठति जीवितं मे॥ धातुर्बलादु[1]पयमस्त्वयि जातपूर्वः केकेयि मां[2]मुपय
मं नयतीति मन्ये॥१५॥ ग०॥ तदनु निजमनोरथैकपूरणे कृतादरा केकेयी सोपहासमवादीत्॥ प०॥ सत्यविप्लवमप
त्यसंगतः संगतं भृशमपत्रपतस्तव॥ आश्रुतस्य विफलत्वमस्ति चेदाश्रुतस्य रचितोयमंजलिः॥१६॥ किं नागतस्ते
श्र[3]वसोः सकाशमरिंदमः सत्यगिरां पुरोगः॥ श्येनामिषीभूतकपोतपोतजी[4]वातवे शस्त्रनिकृत्तगात्रः॥१७॥ किंच॥
अभ्यर्च्य कस्मै चिदुपाश्रिताय वितीर्य विप्राय विलोचने स्वे॥ आपूरयत्कश्चिदलर्कसंज्ञः प्राज्ञः प्रतिज्ञां प्रथितप्रभावः
॥१८॥ असुरसमरवेलाजातबाधावसाने वरयुगमदिशस्त्वं प्रीतिपूर्वं यथा मे॥ अशिथिलगुणबंधाः सत्यसंधानरेंद्रा-

टिप्पणं॥ ॥विवाहः १॥ ॥यमसमीपं २॥ ॥कर्णयोः ३॥ ॥जीवनार्थं ४॥

जलल्लिपिरिति कामं संगिरंतां गिरंतां ॥ १९ ॥ किंबहुना ॥ सत्योद्यां गिरमिह निर्वहस्व मा वा सन्मानं भुवि न सहेय राममालु-
॥ संस्थास्ये विषमुपभुज्य पश्यतस्ते सन्नाहं त्यजसि न चेत्त्रवर्तमानं ॥ २० ॥ ग० ॥ एवंवादिनीमेनां भूयोपि भूपतिरवदत् ॥ अयि
कठिनहृदये किमुक्तं मुक्तलोकमर्यादया दयापेतयालयेति ॥ प० ॥ नैवा भव स्त्वमिह शीलवतीषु गण्या नैवागमस्ति तृमतां ग-
णनां स रामः ॥ नैवापमात्मजसुखान्यहमप्यनार्ये नैवापमंबु भरतेन न मे प्रदेयं ॥ २१ ॥ किंच ॥ वासस्त्वचां भवतु किंचनतीर
वीणां छायाद्रुमाश्च भवनानि भवंतु वन्याः ॥ कैकेयि तस्य शयनानि कथं भवेयुस्त्वच्चेतसोपि कठिनानि शिलातलानि ॥ २२ ॥ ए-
वं भर्त्रा भर्त्सिताप्याई चिन्ताना भूद्देषा मंथराक्रांतवृत्तिः ॥ राकाचंद्रे राजमाने निशायां वीरुच्छन्नाचंद्रकांतस्थलीव ॥ २३ ॥ ग० ॥
तदनुमुहूर्तमात्रमपि राममुखावलोकनसुखमनुबुभूषुर्दशरथः कुमारमानयेति सुमंत्रमादिदेश ॥ तेन सत्वरं राजभवनं
प्रवेशितस्ततो रामः कृतप्रणामः पितरमयथाभूतमुखविकासमारादालक्ष्य चकितमतिः किमिदमिति कैकेयीमन्वयुंक्त ॥ सा

टिप्पणं ॥ ॥ तरुसंबंधिनीनां १ ॥ ॥ पूर्णिमा २ ॥ ॥ लता ३ ॥

पिपापाशयाप्रत्ययवादीन्॥ वत्सप्रतिश्रुतवरद्वयनिर्वहणे निंपुणेतरस्तातस्ते संप्रति सानुशयस्तनयवात्सल्यात्सत्यच्युत्या
सत्रासाच्च गाढमगाधशोकसागरे निमज्जतीति॥ वरद्वयं तावत्तव वन्य इत्येव वने वर्तनमवनेरवनं भरतस्य चेति॥ राम
स्तदाकर्ण्य प्रमुदितहृदयः कृतांजलिरेनामभ्यजिज्ञपत्॥ प०॥ भीतो भू भरतः किमंब भरतः किंवावनात्सावनात्त्रस्तोहं सग
रान्ववायकेकुदस्तातः कुतः शोचति॥ दिव्यायाः सरितो निर्वापकरणालब्धां प्रतिज्ञामिमामावाभ्यामिह पूरयिष्यति नन्वेतुर्वी
कथंस्यादयं॥२४॥ वनभुवि तनुमात्रत्राणमाज्ञापितं मे सकलभुवनभारः स्थापितो वत्समूर्ध्नि॥ तदिह सुकरतायामावयोस्त-
र्कितायां मयि पतति गरीयानंब ते पक्षपातः॥२५॥ किंच॥ तातः स्ववाचा व्यवहृत्य स्वयं वत्साभिषेकोत्सवमंगलं मे॥ प्रणा
मसंज्ञस्य मयार्पितस्य किंपूर्णपात्रस्य न पात्रमासीत्॥२६॥ ग०॥ तत्क्षणमशनिहत इव पर्वतः सर्वतः परीतदव दहन इव
वनस्पतिर्दिवस्पतिपदभ्रंशविधुर इव नहुषः पपात निःसंज्ञः पंक्तिरथः॥ ततः सा पितृनिदेशविन्दारमचिरमान्दरेतिराम

टिप्पणं॥ ॥असमर्थः १॥ ॥पश्चात्तापसहितः २॥ ॥पृथ्वीसंरक्षणं ३॥ ॥श्रेष्ठः ४॥ ॥पितृदानं ५॥ ॥वज्रं ६॥ ॥दशरथः ७॥

मादिदेश॥ सएषः॥ प०॥ मातुराज्ञांवहन्मूर्ध्नामालामिवमहायशाः॥ वनायरामोवव्राजजगतामवनायच॥ २७॥ ग०॥
असौसमासाद्यकौसल्यासदनमभिषेकप्रतिबंधंकैकेयीनिर्बंधमात्मनश्चवनवासंप्रणामानंतरंतस्यैन्यवेदयत्॥ एत
दाकर्ण्यविदीर्णहृदयाविषदिग्धमुखशिलीमुखविद्धश्रवणयुगलेवसहसाभूम्यांनिपत्यविललाप॥ पद्यं॥ रे-
खारथांगसरसीरुहशंखचिह्नेक्षेमंकरेतवकरेजगतांत्रयाणां॥ कांतारकंदखननंरचयेतिनूनमाबद्धवान्भ्रांतिसरंभ
गवान्वसिष्ठः॥ २८॥ ग०॥ तत्रसौमित्रिरतिमात्रप्रवृद्धमन्युःशांतमन्युसमानमेनमग्रजमकथयत्॥ आर्यनकार्यमिदं
लोकगर्हणीयायाःकैकेय्यावचसाजरसाचसमाक्रांतस्तांततयाहृत्याकृत्यविवेकमूकस्यराज्ञःप्रज्ञाशैथिल्यान्निःसृ
तेनवचसासंत्यज्यराज्यमटवीपर्यटनंविधातुं॥ किंतु तुभ्यमनभ्यर्थयमानायप्रथममेवपित्राप्रदत्तानुपृथ्वी॥ क्षत्र
धर्मोपिसत्यास्पथःप्रमाद्योपिवर्णाश्रमरक्षणतःसमीचीनःप्रायेणपुरुषंनिःश्रेयसेनियोजयेत्॥ नियतंनियतेर्बल-

टिप्पणं॥ ॥लिसं१॥ ॥मंगलसूत्रं२॥ ॥इंद्रः३॥ ॥दैवस्य४॥

मतिलंघ्यपौरुषमेवपुरुषस्यधीरस्यपुरुषार्थान्समर्पयेत्॥ प॰॥ माभूत्त्वत्पदपद्मयोररुणिमाकांतारसंचारतः पाणौपाट-
लिमामनाक्प्रसरतुज्याकर्षणादेवमे॥ कैकेयीपरिभूततातवचनेनक्षोभवान्भास्मभूत्किंवामामकमार्यशौर्यजलधेनम्रंधनु
र्वर्ततां॥ २९॥ ग॰॥ एवमाचक्षाणंलक्ष्मणंरामः सांत्वयन्नेवावोचत्॥ वत्ससर्वत्रवंशजातानां पितृनिदेशएवदेशिकः स
र्वकर्मसु॥ बहवः खलुपितृवचनगौरवात् गोहत्यामपिमातृवधमपितारुण्यविनिमयमपिमृकंडुरेणुकेयपूरुप्रभृतय
कुर्वाणास्तेपिनिर्विचारमाचारवतामग्रगण्याइतिगण्यंते॥ तस्मादवश्यंवश्यएवपितुरवगाहेगहनमिति॥ तत्रवि
स्तृतपुत्रवात्सल्याकौसल्यातेनसहगंतुमभिलषंतीकृतप्रणामेनरामेणसविनयमेवमभिहिता॥ प॰॥ कांतारभाजि
मयिकेकयराजपुत्र्याः कार्कश्यकंदलितयादलितस्यवाचा॥ तातस्यशोकदहनग्लपितंशरीरंमातस्त्वयानतुकदाचिदुपे
क्षणीयं॥ ३०॥ ग॰॥ ततः सातनयस्यस्वैस्त्ययनायसमस्तदेवताकीर्तनपुरःसरीमाशिषमाचचक्षे॥ रामस्तामभिवंद्यनि

टिप्पणं॥ ॥ दुर्गममार्गः१॥ ॥ कल्याणाय २॥

क्रांतः प्रक्रांतनेपथ्यायाः सीतायाः प्रासादमाससाद ॥ प० ॥ कल्याणवादसुखितां सहसैव कांतां कांतारचारकथया कलुषीचकार ॥ अंभोदनादमुदितां विपिने मयूरीं संत्रासयन्निव धनुर्ध्वनिना पुलिंदः ॥ ३१ ॥ ग० ॥ अयमेनामुपगंतुमुपक्रांता मकथयत् ॥ प० ॥ प्रियेजनकनंदिनि प्रकृतिपेशलामीदृशीं कथंग्लपयितुं सहे तव शिरीषमृद्वीं तनूं ॥ गृहीनहरिणीगणत्रिकविसारिनानाशिराक्षतिक्षरितशोणितारुणवृकाननेकानने ॥ ३२ ॥ ग० ॥ तदनु नानाविधप्रयत्नशतेनाप्यनुन्मिषदनुजिगमिषाशैथिल्यायां मैथिल्यां लक्ष्मणेप्यनवसितानुगमनव्यवसाये वासिष्ठाय सुयज्ञाय भूषणमशेषं नागसहस्रेण सह शत्रुंजयाह्वयमतुलं मातुलदत्तं हस्तिनमगस्त्यकौशिकाभ्यां च महार्हाणि च रत्नानि वितीर्य निर्जराराति वीर्यमुषी धनुषी निरपायत्राणकर्मणी वर्मणी निर्मर्याद शिलीमुखकृतानुषंगौ निषंगौ निर्वर्तित वीरपाणौ कृपाणौ वरुणेन जनकसदसि दत्तमेतत्सर्वमादाय मामनुगच्छेति सौमित्रिमन्वग्रहीत् ॥ सीतापि निजाभरणगणं सुयज्ञपत्न्यै विदधे ॥ सौमित्रि

टिप्पणं ॥ ॥ हृष्टां १ ॥ ॥ किरातः २ ॥ ॥ स्वभावः ३ ॥ ॥ अनुगमने च्छा ४ ॥ ॥ श्रेष्ठवस्तूनि ५ ॥

रपिस्वधनेनकंचित्कौसल्याश्रितमुपाध्यायमतोषयत्॥ तत्रसकुटुंबायत्रिजटाभिधानायद्विजातयेस्वहस्ततलनिक्षिप्तदं
डदेशावधिकंगोधनंकौसल्यादिभ्योद्विजातिभ्यश्चरघुपतिर्वित्तानिविविधानिविततार॥ ततस्तेपौरनारीणांविश्वासान्नि
श्वासजृंभानिलचलदधरकिसलयानामश्रुसलिलासारेणशोकपावकेनचवपूंषिमनांसिचसिक्तादग्धानिचनिषिद्धपरि
जनानुगमनतयाप्रकाशितप्रवाससिद्धांताच्छुद्धांतान्निश्चक्रमुः॥ तत्र॥ प॰॥ सीतापुरागगनचारिभिरप्यदृष्टामाभू
दियंसकलमानवनेत्रपात्रं॥ इत्याकलय्यनियतंपिदधेविधाताबाष्पोदकेननयनानिशरीरभाजां॥ ३३॥ रुद्धापियां
तमनुगच्छतिमैथिलीमांवत्सोजहातिनकदाचनलक्ष्मणोपि॥ इत्येतयोरनुगतिंप्रतिबोध्यगंतुंभूयोपिराजभवनंप्र
विवेशरामः॥ ३४॥ ग॰॥ तस्मिन्सुमंत्रेणविज्ञाप्यदर्शितेदाशरथौभूपतिर्भूताविष्टइवविष्टरान्निपत्यसदारःसदारश्चित
परिदेवनोत्कंठांस्वयमप्यकरोत्॥ तदासुमंत्रःकैकेयीमब्रवीत्॥ देविविरमविरमरामाभिषेकसमुन्मिषितात्ल्हादांकु

टिप्पणं॥ ॥ददौ १॥ ॥अंतःपुरात् २॥ ॥नेत्रगोचरं ३॥ ॥निश्चित्य ४॥

रावग्रहा[1]दाग्रहात्॥ पुराखलु ब्रह्मणो वरप्रसादादवगतसकलप्राणिभाषणतया पर्यंकपर्यंतपरिसरत्पिपीलिकालापेक्षणसहासं तं वपितरं हसनकारणं पृष्ट्वा तद्विवरणं पत्युर्मरणहेतुरित्यवेत्यापि भूयसो निर्बंधात्कुपितेन राज्ञावज्ञाताया: मातुस्ते मार्गं मा कुर्वस्थाइति॥ ततः॥ प०॥ छतासमंज निर्यासंसगरं केकयात्मजा॥ निदर्शनेन निर्दिश्य निरबध्नान्निजं पतिं॥ ३५॥ तत्र॥ सिद्धार्थको महामात्यस्तत्परित्यागमब्रवीत्॥ सरयूपतितानेकप्रजामरणकारणात्॥ ३६॥ ग०॥ अथदशरथेन रामः सपरिच्छद एव गच्छेति निर्दिष्टः केवलं खनित्रपिटके वल्कलयुगुलं च प्रार्थयत्॥ प०॥ सुखोचितानां सुव्यक्तदिव्यलावण्यसंपदां॥ त्रयाणामपि केकेयी वल्कलादीन्युपाहरत्॥ ३७॥ अथ रघुकुलनाथो मध्यमां बानियोगाद्गुणवतिपरिधाने मंगलार्हे निराशः॥ अधिकुचतटवल्गज्जानकीबाष्पसेकादपगतखरभावं वल्कलं पर्यधत्त॥ ३८॥ ग०॥ तत्र ये चिरीयंतः सर्वे निर्विकारवदनलक्ष्मीकमिक्ष्वाकुकुलाध्यक्षमध्यक्षयंत स्तेषामेव शोकशंकुसंकीलितमानसानामाननेषु पारं पर्येणास्फुरद्विका

टिप्पणं॥ ॥अवर्षणं १॥ दृष्टांतेन २॥ बद्धं ३॥

रः॥ प०॥ सवल्कले दाशरथौ विषादादामीलिताक्षोयदभूद्वसिष्ठः॥ तदेवजातंकरणंमहर्षेः काकुत्स्थयाथार्थ्यविलोकनस्य ॥३९॥ अस्यपीतांबरत्यागे किंजाताविक्रियापुरा॥ इतिप्रत्यक्षदृशांश्रेष्ठोवसिष्ठोनातिविव्यथे॥ ४०॥ ग०॥ सोयंमैथिलीवल्कलधारणमरुणदरुणसारथिकुलगुरुः॥ तत्र॥ प्रयाणायप्रणिपतंतींस्नुषामाश्लिष्यकौसल्यागद्गदमवदत्॥ प०॥ घर्मे[1] निदाघकिरणस्यक्रूरैः कठोरैः कांतारमध्यपदवीषुनखंपचासु॥ त्वांवीक्ष्यनिस्तुलपदां[2] वनदेवताभिर्निर्दिष्यते नियतमेवनिमेषहानिः॥ ४१॥ ग०॥ अथमैथिलीनाथः सलक्ष्मणः सप्रदक्षिणंराजानंजननीजनंचप्रणम्यप्रतिषिद्धप्रतिहारचक्रोनिश्चक्राम॥ रथोदशरथाज्ञापरतंत्रेणसुमंत्रेणद्वारिसमानीतः॥ प०॥ प्रारब्धयात्रस्यरघूद्वहस्यप्रागेवसीतारथमारुरोह॥ औनीलरथ्यंरथमारुरुक्षोरक्ष्णांप्रभोरग्रसरीप्रभेव॥ ४२॥ ग०॥ दाशरथीचरथमारुरुहतुः॥ प०॥ यथायथाराघवराजधनींविहायसीताविपिनोत्सुकाभूत्॥ तथातथाजायतयातुकामालंकांविनाराक्षसराजलक्ष्मीः॥ ४३॥ आबालवृद्ध

टिप्पणं॥ सूर्यस्य १॥ अनुपमे २॥ हरिततहयं ३॥

मनुगच्छति रामभद्रमेषा पुरी तदिह मा खलु निर्गुणा स्यात्॥ इत्यादरादिव धरा बहुधा विधाय धूलिच्छलान्निजतनुं तमनु प्रत
स्थे॥ ४४॥ नृपसुखविमुखेन स्वेन कांतेन साकं दुहितरि विधिपाकात्का ननाय व्रजंत्यां॥ अकुशलमिति मत्वा नूनमक्रोय धात्री
परिजनमुखबाष्पं पांसुभिः पर्यहार्षीत्॥ ४५॥ रामानुसारसहनिर्गतपौरवर्गासंस्थानमात्रगृहचत्वरराजमार्गा॥ निर्मुक्तभो
गभुजगत्वगिव क्षणेन लघ्वी बभूव रघुपुंगवराजधानी॥ ४६॥ ग०॥ अथ दशरथः सांतःपुरजनः पुरान्निर्गत्य गत्यंतराभावा
त्तमेव रामं सुचिरमवलोकयन्नालोकपथमतिक्रांते सुमंत्राक्रांतस्यंदने रघुनंदने स्यंदमानबाष्पप्रवाहो मोहमुपगम्य भूम्यां
पपात॥ ततः परिजनकृताश्वासाल्लब्धसंज्ञाय राज्ञे कौसल्यासदनमरोचत॥ दाशरथिरप्यहमहमिकया संमूर्छन्महाज
नौघदुरवगाहतया मंदायमानस्यंदनवेगः सकलजनकिवेककोकनदं मुकुलयन्मोहतमसा तमसातटमुपागमत्
॥ चरमगिरिशिखरमपि सहस्रदीधितिः॥ प०॥ आविःप्रलापमटवीं भजतो जनस्य काकुत्स्थपादविरहासहमानसस्य

टिप्पणं॥ दैवं १॥ झटिति २॥

॥आस्तीर्णपर्णशयनान्यभवन्गृहाणिमूलस्थलानितमसातटभूरुहाणां॥ ४७॥ ग०॥ अथनिशीथेदाशरथिःसुमंत्रेणसंमंत्र्य वंचितजनसंहतिरतिविनतानंदनेनस्यंदनेनवेदश्रुतिगोमतिनिष्यंदिनीनामनदीत्रयपरिष्कृतामिक्ष्वाकवेमनुनादत्तां वसुमतीमतीत्यविविधवनगहनवीरुत्तृणपटलपिहितरथतुरगखुरमुद्रयापदव्यागंगातरंगसंगतमूलंगगनगंगालिंगित शृंगंशृंगबेरपुरालंकारमिंगुदीपादपमुपागमत्॥ तत्र॥ प०॥ दृष्ट्वाराममनेकजन्मरचितैर्दृश्यंशुभैःकर्मभिःश्रुत्वामातृव रद्वयादुपगतांवृत्तिंचवै[1]खानसीं॥ अत्युज्जृं[2]भितहर्षशोकजनितैर्बाष्पैर्निषाधाधिपः शीताशीतगुणान्वितैरविरलैःसंप्रे[3]-क्तवक्त्रोभवत्॥ ४८॥ ग०॥ सोयंसुहृत्समासाद्यगुहःकृतांजलिरंजसारघुनाथमनुनाथितवान्॥ देवपितृनियोगप्र-वणांतःकरणमपिभवंतंविज्ञापितुमज्ञातजानपदरीतिर्भा[4]रतीमांमुखरयति॥ अस्त्येतदनिवार्यवीर्योद्भटभटव र्गदुर्गयुक्तमनुषक्तभोज्यजातमंथरंमंथरात्हृदयतोदा[5]वेहमस्मदीयंराज्यं॥ तदिदमनिशंप्रथमप्रवृत्तंपरिगृह्यकिंचि

टिप्पणं॥ तामसीं १॥ वृद्धिंगतः २॥ सिक्तं ३॥ वाणी ४॥ यथाकरं ५॥

दनुगृह्यपरिजनयोग्यभाजनमसुंजनमसुंचन्नेवताता देशेनदेशेस्मिन्विस्मयनीयानुभावमुनिवृंदमंदाकिनीसंदर्शने
नमंदायमानजननीजनदुर्दशश्वतुर्दशदशरथकथिताः समाः समापयतु भवानिति॥ प०॥ तस्मिन्नित्थंप्रार्थनाभाजिस
ख्यौ प्रत्याचख्यौ रामभद्रः प्रियोक्त्या॥ मातुर्वाक्याद्वल्कलेनावृतं मे गोत्रं क्षात्रं प्रक्रियांनार्हतीति॥ ४९॥ ग०॥ ततस्तुतद-
नुरोधेनरोधस्तरारधस्तात्सुमंत्रनियंत्रितरथ्ययोर्दाशरथ्योरातिथ्यं समधुपर्ककर्तुमिव मंदमंदमरविंदवृंदस्यंदमान
मकरंदबिंदुसंदोहवाहिनिवाहिनीतरंगमरुति वातिकाननगमनावस्थांकाकुत्स्थस्य प्रेक्षितुमक्षमायामिव क्ष्मोभृतिच
रमेतिरोहितायामह्नामधिदेवतायांसंध्यांबरमांरामः समाप्यतस्यां तरुमूलभुविलक्ष्मणकल्पितं पर्णतल्पमभजत॥ प०॥
रामे विदेहसुतयातरुमूलसंज्ञमंतः पुरं विशति लक्ष्मणसोविदल्लम्॥ निध्यायतं नियमितामितबाष्पवृष्टिर्निद्रांनिरस्य
निषसाद निषादनाथः॥ ५०॥ ग०॥ व्यतीतायां विभावर्यामर्यममरीचिवीचिमालाहारिणिपूर्वोर्वीधरमूर्ध्नि विरचितजय
टिप्पणं॥ संवत्सरान् १॥ वपुः २॥ अस्ताचले ३॥ मनोहारिणि ४॥ उदयाचलमस्तके ५॥

वंधोसहसीतयादाशरथी भागीरथीकच्छ[1]मागच्छतां॥ तत्ररामः प्रहृष्टचेताः सीतामाचष्ट॥ प०॥ मेध्याश्वमार्गपरिमार्गण
दुर्नयस्य दिव्यौषधिं कपिलकोपमहाज्वरस्य॥ तातानुतर्पणपचेलिमभागधेयां भागीरथीं भगवतीं शरणं भजामः॥
॥५१॥ ग०॥ तदनंतरं रामः सांत्ववचननिवारितसुमंत्रः ससौमित्रिर्मंगलानिप्रार्थयमानया तया मैथिल्या सह गुहेनानीतां
नावमारुरोह॥ स एष निषिध्य निषादाधिपतेरनुगमनमपि तूर्णमेवावतीर्णसुरसरित्पुरः संपूर्णसस्ये मत्स्याभिधाने जनप
दे कृतपदश्चलल्लक्ष्यवेधनचतुरश्चतुरो[2] मृगान्निहत्य कुत्रचिद्वनस्पतिमूले निशामनैषीत्॥ अन्येद्युर्वन्येन पथा प्रयाता
स्ते प्रभाते प्रतीयमानहोमधूमप्राग्द्वारं भारद्वाजाश्रममाश्रयंतस्त्वाभिवंद्य तममंदहर्षमहर्षिजनेनादिष्टवर्त्मना वैकर्तनी[3]
पूरोपप्लवं प्लवेन वैणवेन निस्तीर्य शर्ममधनजनसंनिधानशमितशात्रवसत्त्वचारित्रं विचित्रं चित्रकूटमचलमभजंत॥ प०॥
अनुजरचितपर्णागारलद्धासु माद्यत्परभृतकुलवंचत्पंचमैरंजितासु॥ जनकदुहितृयोगाज्जातसौकेतसौख्यश्चिरमरमत रा

टिप्पणं॥ जलप्रायं १ ॥ चतुःसंख्याकान् २ ॥ यमुना ३ ॥ मुनिः ४ ॥ अयोध्या ५ ॥

मश्चित्रकूटस्थलीषु ॥५२॥ ग०॥ अथ मां वनवासवैरस्यादपि रामः समाक्रयेदिति प्रत्याशया परतंत्रः सुमंत्रः कानिचिदहानि गु
हसकाशे नीत्वा निराशस्ततः प्रतिनिवृत्तो निवृत्तोऽस्त्व वा मयोध्यामासाद्य निर्दशरथिः सारथिरिति शोकातिरेकात् पौरजनजनि
तदीनाक्रंदमंदीभूतनेमीघोषादवरुह्य रथाद्दशरथं प्रयाणोन्मुखप्राणं प्रैणंसीत्॥ एतद्दर्शनेन विसंज्ञो दशरथः कौसल्यासु
मित्राभ्यां समाश्वासितः कथं प्रयातं रामेण कथं कथितं मैथिल्या किं वृत्तः सौमित्रिरिति मुहुर्मुहुरश्रुकुंठितकंठः सुमंत्रमन्वयुं
क्त॥ सोपि राज्ञे व्यजिज्ञपत्॥ देव कथं ब्रवीमि कठिनहृदयोऽहं॥ प०॥ सेवारसानुगतपौरमनोरथस्य पारे रथस्य च सुतौ तव
वर्तमानौ॥ भूत्वा विदेहदुहितुर्नवसौ विदग्धौ भागीरथीतटवने पथिकाव भूतां॥५३॥ किंतु॥ देव त्वत्तनयस्य कुंतलभरं क्षी
रैः स्वधेनूद्भवैः सेक्तुं नालमरुंधतीपतिरभूत्तस्याभिषेकोत्सवे॥ सिक्तोऽहं स एष मैथिलसुता बाष्पोदकोत्पादकैर्न्यग्रोधक्षरि
तैर्जटां रचयितुं क्षीरैर्निषादाहृतैः॥५४॥ तस्या विदेहदुहितुः पदयोर्नखेषु लाक्षां विनाप्यरुणिमा सहसा बभूव॥ वन्ये पथि

टिप्पणं॥ प्रणनाम १॥

प्रियतमेन सह व्रजंत्या वैवर्ण्यमाविरभवन्न कदापि वक्त्रे ॥५५॥ सीतापतेः किसलयैः परिकल्प्य तल्पं संचार्य सत्वदमना
यनिशासु दृष्टिं॥ धन्वी तदंघ्रिभजनादिव पुण्यलभ्यादस्वप्न एव वनवर्त्मनि लक्ष्मणोभूत्॥५६॥ ग०॥ एवं सुमंत्रनिवेदित
पुत्रचरित्रश्रवणमगिरिशिखरजुषि निगमवपुषि ज्योतिषि त्वदयलग्नशोकशल्यां कौसल्यामाश्वास्य नरपतिरित्थमकथ
यत्॥ पुरा खलु सरयूरोधसि विविधतरुनिवहपिहितविवस्वति वेतस्वति मृगयास्पृहया कमपि समयमगमं॥ तत्र॥ प०॥
तोयादाननिदानपुष्करगजभ्रांत्या तपस्वी मया विद्धः कश्चन शब्दवेधनविदा पाथः सरय्वा हरन्॥ तत्पित्रोर्जरदंधयोरनुमृ
तिं कर्तुं चितां चिन्वतोः शापो मय्यपतत्त्वमपि सुतप्रेम्णा प्रणश्येदिति ॥५७॥ अहं वैश्यस्य शूद्रायां जातस्तस्मान्न संभवेत्॥
ब्रह्महत्येति मामुक्त्वा स्वर्गतो दुर्गतो मुनिः॥५८॥ ग०॥ तदवश्यं वश्य एवास्मि मृत्योरिति नरपतिः श्रुतिमार्गगतराम एव वि
रराम॥ प०॥ मुनिशापकृतोत्पत्तिर्विपत्तिर्निष्प्रतिक्रिया॥ यतो दशरथायाभुद्दिदेशदशमीं दशां॥५९॥ किं बहुना॥ नाकं

टिप्पणं॥ ॥वेद १॥ करिशुंडाग्रं २॥ जलं ३॥ दरिद्रः ४॥ कर्णमार्गः ५॥ अंत्यां ६॥

तंत्रिदिवंपरैः सुमनसां कांतानबंदीकृतानाकीर्णपुरुहूतशासनधरैः सोकेतबाह्यांगणं ॥ नादिष्टाःसचिवाश्च भूतलप-
रित्राणायययद्यप्यसौ नाकं शोकवशादगाद्दशरथो नास्थां वहन्वाहने ॥ ६० ॥ ग० ॥ अथदशरथप्रशंसामांसलैः कैकेयी
निंदाकंदलितैरामगुणकीर्तनद्विगुणितैरवरोधवधूजनपरिदेवनारवैर्मुखरितेषु दिङ्मुखेषु ॥ प० ॥ अभूदराजकम्ला
नसद्मगणंगगनांगणं ॥ आलोक्येवतथाशांतमशेषंनमहीतलं ॥ ६१ ॥ ग० ॥ ततः प्रभातेवसिष्ठवचसातैलद्रोण्यांनरपतिंनि
क्षिप्य क्षिप्रमेवभरतमकथितदशरथकथमेवआनयतेति दूतान्केकयेषुप्रेषयामासुः ॥ तेपिजितपवनजवनयव
नह्यसंकोचितपथास्तुरगपतिपुरेदुःस्वप्नदर्शनदूयमानमानसंभरतमभिवंद्यगुरुनिदेशंव्यजिज्ञपन् ॥ सोयंमातामह
हेनयुधाजिताचानुज्ञातः कतिपयैरेवदिनैरतिनिमित्तसंभूतसातंकः साकेतमाससाद ॥ प० ॥ अतिचकितमतिः पुरैवपश्य
न्पुरमयथापुरचारपौरवर्गं ॥ न्यविशतभरतःपरीतदूतःपितृभवनेपितृकाननादनूने ॥ ६२ ॥ सपितरमनवेक्ष्यतत्रमातुः

टिप्पणं ॥ अयोध्या १ ॥ कटाहे २ ॥ स्मशानं ३ ॥

सदनगतः प्रणिपत्यतामपृच्छत् ॥ क्वनुममगतवान्पितेतिसैषापरुषतरं भरतायवाचमूचे ॥ ६३ ॥ वनचरइवसाकंमैथिलीलक्ष्मणाभ्यांपितृविधिमभिरोद्धुंप्रस्थितोरामभद्रः ॥ तदनुतवपिताभूत्कालधर्मानुकूलस्त्वमनुभवयथेच्छंनिःसपत्नांधरित्रीं ॥ ६४ ॥ मयूरीवमहानागंकेकयाकेकयात्मजा ॥ भारत्याभरतंचक्रेपरिक्षुभितमानसं ॥ ६५ ॥ ग॰ ॥ तदनुभरतश्चिरतरंविलप्यविलुप्यमानविवेकः कैकेयीमकथयत् ॥ प॰ ॥ परिणतिपरुषाणांपाप्मनांसन्निपातो नहिभवसिनतुर्णांसात्वमस्माकमंबा ॥ तदिहतनयवत्यः संलपिष्यंतिकामंश्रुतिपुटरचितार्तैस्त्वांसवित्रीमकीर्तेः ॥ ६६ ॥ ग॰ ॥ तदनुतन्मुखादाकृष्टदृष्टिरनुजमिदमवादीत् ॥ प॰ ॥ अविकलमिनवंशंदग्धुमाश्रित्यतापंजननमनसिकिरंत्यांहंतसत्यांभवत्यां ॥ अनुसवनमपापैर्दैवतापूज्यमानावहतिकथमिदानीमाश्रयाशाभिधानं ॥ ६६ ॥ अविरततृषितार्तैवत्समालोक्यधेनोरपितनुजशतानांमातुरस्रंबभूव ॥ तदिहतनयशोकंसंतरेदेकपुत्राकथयकथमिदानींकोसलेंद्रस्यपुत्री ॥ ६८ ॥ अपिबदियममंत्रेकालयोगान्नरेंद्रे वरयुग-

टिप्पणं ॥ पंक्तता १ ॥ राज्ञि विषवैद्येच २ ॥

रसनाभ्यां घ्राणवायुं तदीयं॥ अपनगरममुष्यावर्तनं युक्तरूपं पितृवनवसुमत्यां क्वापि वल्मीकवत्यां॥ ६९॥ एषा निकृष्टमतिरात्म
गुणोचितेषु वंशेषु सत्सु बहुधा पिशिताशनानां॥ मौकंदशालिनि वनं विषवल्लरीव हा हंत केकयकुले कथमाविरासीत्॥ ७०॥
जननीति विहीनामे जननीति स धर्मवित्॥ निरयान्निरयादीरो निरयादिवसानुजः॥ ७१॥ ग०॥ ततः सामात्यः पत्युश्चितारोह
णमभिलषंतीं कौसल्यां भरतः शपथशतैर्निवार्य वसिष्ठाधिष्ठितेन पथा दशरथाय यौयज्नूकाभिप्रेतं प्रेतकृत्यमशेषमक-
रोत्॥ प०॥ ताते पितृवनं याते यातुं भ्रातृवनं तथा॥ भरतः प्रार्थयामास प्रांजलिः प्रकृतीः कृती॥ ७२॥ ग०॥ ताभ्यां सुमि
त्राकौसल्याभ्यामंतःपुरजनेन च सह भरतो भवनमभजत॥ अथ यथाविधिविहितौर्ध्वदैहिकं गमितचतुर्दशादिवसं
दिवसकरकुलहितकरैर्नगरवृद्धैः सार्द्धममात्याः समुपेत्य मुकुटाभरणाय भरतं प्रार्थयामासुः॥ ततस्तान्निर्बध्नतः सोयं
प्रत्यवादीत्॥ प०॥ बहुभिरिह किमुक्तैस्त्यक्तसौमित्रिवृत्तिर्मुकुटमथ वहेयं युष्मदाज्ञा हि पूज्या॥ मम परमवकाशः पर्णशा

टिप्पणं॥ राक्षसानां १॥ आम्रः २॥ इज्याशीलः ३॥ स्मशानं ४॥ सूर्यः ५॥

लानुकूलः क्वचिदपिविपुलायांनास्तिनेदंडकायां ॥ ७३ ॥ ग० ॥ इत्युक्त्वारामसेवोत्सुकमनानिश्चक्राम ॥ प० ॥ अनवधिरचयि
त्वासतथेपांसुलत्वंभुवननयनसौख्यप्रातिकूल्यंचकृत्वा ॥ नरपतिगृहमध्याच्चूर्णसुद्धूर्णमानाकुटिलगतिरुदस्थान्मंथराना
मवात्या ॥ ७४ ॥ ततः ॥ केशहस्तंसहस्तेनगृहीत्वानद्धोद्यतं ॥ कौसल्यावारयामासक्रुद्धंरामानुजोनुजं ॥ ७५ ॥ ग० ॥ ततः ॥
सांतःपुरएवपुरान्निर्गत्यशिल्पिवर्गसमीकृतसरणिर्भरतःपुरतःप्रसृतनरगजरथतुरगचरणक्षुण्णक्षोणीतलसमुत्कीर्णे
नरेणुनिकुरंबेनजंबालयन्नंबरगंगांगंगांचसुमंत्रभणितगुणनिवहगुहानुमत्यानिस्तीर्यदूरादेवाश्रमद्वारिनिवेशितबल
भारोभरद्वाजाभिवंदनमकरोत् ॥ सोयंप्रीतमनामुनिर्भरतंतज्जननीजनमपिप्रत्येकमालोक्यसेनामप्याहूययथोचित
मातिथ्यमकुरुत ॥ प० ॥ तथातिथ्यंचक्रेभरतबलभाजांतनुभृतांभरद्वाजःसोयंभृकुटिभटकल्पाखिलसुरः ॥ तपस्तस्याघो
रंदिविसुमनसस्तत्फलभुजोयथातेषांतोषंक्षणमभिलषेयुर्मुनिकृतं ॥ ७६ ॥ ग० ॥ इतिदिनंदिनशातकल्पंतत्रनीत्वामुनेर्नि

॥ टिप्पणं ॥ अमर्यादं १ ॥ सदोषत्वंसरजस्कत्वंच २ ॥ वक्रगतिः ३ ॥ केशकलापं ४ ॥ शत्रुघ्नं ५ ॥ मार्गः ६ ॥ चूर्णितं ७ ॥

देशेनसर्वेपिचित्रकूटवनोद्देशमविशन्॥ तत्रसन्यस्तसैन्यस्ततइतोगुहेनसहराममन्विष्यन् हव्यगंधिनागंधवहेनहोमधूमे-
नचदूरादेवविभाव्यमानमचपलमृगगणमदृश्यरूपाभिर्वनदेवताभिरवकीर्यमाणबलिकुसुममशेषितपिशिताशनपिशा
चोच्चाटनमंत्रायमाणलक्ष्मणचापघोषश्रवणसमुचितसामीप्यप्रदेशंनूतनपरिकल्पितपर्णशालावास्तव्यवै[1]खानसकुटुंबिनीनि
बिडितभूभागमनोकहशाखावलंबमानवल्कलाजिनममुंतरुशाखारचितैरंबरचरपतिसेनागणकरकिसलयविमुक्तैरभि
नवपल्लवभंगशबलैः कुसुमनिकरैरभ्यर्च्यमानजानकीनिवासतरुमूलवेदिकमालक्ष्यमाणखड्गकार्मुकनिषंगमतिथिजनस
पर्यापर्युत्सुकसौमित्रिसमाहृतकंदमूलफलकल्पितैकदेशम[2]विनाभूतजनकदुहितृचरणनलिनविन्यासमपहसितसाके
तरामणीयकंरामाश्रमंभरतःससंभ्रममभजत॥ प०॥ अथावासंशांतेरकृतसुकृतानामसुलभंनवांभोदश्यामंनलिननयनंव
ल्कलधरं॥ जटाजूटापीडंभुजगपतिभोगोपमभुजंददर्शश्रीमंतंविपिनभुविसीतासहचरं॥ ७६॥ ततस्तस्योपांतेजनकयज

टिप्पणं॥ तापसः १॥ अविरहितः २॥

नाधीनजननांववंदेवैदेहींरजनिकररेखामिवनवां॥ अरण्यानींपुण्यात्पदकमलमुद्रापरिचयाद्योध्यासंश्रीचीं[illegible]कलमवि
कलमवस्थांविदधतीं॥७८॥ स्वतःसिद्धंयस्मिन्नितरदुरवापंविजयतेसुमित्रापुत्रत्वादपिजगतिरामानुजपदं॥ यदीया
क्षिद्वंद्वप्रतिनिधिभवेदंबुजयुगंनिशीथेनिर्निद्रंयदितमपिसाक्षादकृतसः॥७९॥ ग०॥ तदनंतरंमरुपथेप्रथिततरग्रीष्मो
ष्मणिदैवात्कृतोपलंभमंभोरुहतटाकंसुधाधारापूरितापंभूरितापःसतृष्णइवकृष्णसारःसरभसमुपेत्यनिपत्यपादयोश्चि
रतरंरुदन्दशरथकथामपिकथित्वामैथिलीसहितायसलक्ष्मणायरामायशोकमूर्छांप्रायच्छत्॥ जननीजनोपितत्रनिपत्य
सुचिरमरोदीत्॥ प०॥ वेलोल्लंघनमेतेषांशोकोदन्वतितन्वति॥ अगस्त्यायितमेतस्मिन्वसिष्ठेनात्मवेदिना॥ ८०॥ ग०॥ ततःप्र
पद्यसंज्ञामनुज्ञयागुरोरमरसरितिविरचितसमुचितनिवापकृत्यंप्रणिपत्यराममसकृत्प्रवर्तयितुंभरतःप्रार्थयत्॥ विकर्त
नकुलस्ययदनुकूलंगुणगणस्ययदनुगुणंयशोरूपस्ययदनुरूपंसमाचारस्ययत्समुचितंप्राचीनभाग्यस्ययद्योग्यंलोकगर्हणी

टिप्पणं॥ सदृशीं १॥ विकसितं २॥ अगस्त्यवदाचरितं ३॥

यायदनर्हं श्रुतस्य वायस्तद्दशां नादशमाशयं प्रकाशयंतीभरतोपज्ञा विज्ञापना॥ तत्क्षणं क्षणप्रभाभंगुरलक्ष्मीसमावेश
लक्ष्मणि क्षोणीपतिशत धृतोज्झितेमुकुटे विघटिताशांरामं प्रणिपत्यसादरं मां पादुकाभ्यां परिष्कुरु तं युवामिति रघुवरचरणद्वयं
स्वयमेव प्रार्थ्य परिरचयितुं स्थंडिलशायि चरितमिव बभार भरतस्योत्तमांगं॥ तथाहि॥ प०॥ त्वया मया च कर्तव्यं सत्यवाचः
पितुर्वचः॥ इति प्रत्यादिशाद्रामो भारतीमपि भारतीं॥ ८०॥ ग०॥ जाबालिप्रार्थनायामपि व्यर्थायाम्॥ प०॥ भरतस्तदनु प्रार्थ्य
लेभेलाभविदांवरः॥ काकुत्स्थपादुकाकारं मेहर्घं मुकुटद्वयं॥ ८१॥ स एष सानुजः प्रायादयोध्यां भ्रातृशासनात्॥ अटवीं पि
तृसंदेशाद्ययौ रामः सलक्ष्मणः॥ ८२॥ विलंघ्य विविधान्देशान्भरतो धृतवल्कलः॥ विषयं समुपाश्रित्य विषयेविमुखो भवत्
॥ ८३॥ ग०॥ ततश्चायं यावदार्यस्य प्रत्यागमनं तावदयोध्यां नाध्यास्ते॥ तस्मिन्नवधिमतिक्रम्य चिरायति स एवाश्रयांश
माश्रित्य प्राणानपि निंदिष्यामीति नंदिग्रामसंज्ञमाश्रममशिश्रयत्॥ दाशरथिरपि शमधनजनकथितनिशिचरगणरचित

टिप्पणं॥ शास्त्रश्रवणस्य १॥ विद्युल्लता २॥ मस्तकं ३॥ महामूल्यं ४॥ देशं ५॥ इंद्रियार्थे ६॥ अग्निं ७॥ मुनिजनः ८॥

कदनपरिहरणाय गहनजठरमवजगाहे॥ प०॥ विस्तीर्णाक्षैर्विपिनहरिणैर्वञ्चितभीतिप्ररोहैर्दर्भग्रासेष्वकृतरुचिभिः सस्पृहं
वीक्ष्यमाणः॥ रामः प्राप्य प्रकृतिमहितं स्थानमत्रेर्महर्षेर्जग्राहास्य प्रमुदितधियः प्रेमपैर्यैसैपर्यां॥८४॥ ग०॥ सीतामप्यनसू
याभिधानास्य पत्नी स्वभूषणैरतोषयत्॥ प०॥ खंडनाय वसुधावधूमनःपुंडरीकतुहिनत्विषां द्विषां॥ दंडकावनमवापरा
घवश्चंडभानुरिव मेघमंडलं॥८५॥ ॥ इति विदर्भराजविरचिते चंपूरामायणे श्रीमदयोध्याकांडः समाप्तः॥ छ ॥

अथारण्यकांडः॥ ॥प०॥ प्रविश्य विपिनं महत्तदनु मैथिलीवल्लभो महाबलसमन्वितश्च्वलितनीलशैलच्छविः॥ निशाचरद
वानलप्रशमनं विधातुं शरैश्चचार सशरासनः सुरपथे तडिल्वानिव॥१॥ ग०॥ ततः॥ कंडूलापनयनपटुशुंडालकपोलक
षणविषमितानमितविकटविटपसालखंड निर्यातनिर्यासगंधानप्यात्तगंधान्विदधानैश्चाकुतिगंधैर्धूमस्तोमैरनुमीयमाना
विनाभूतजलाशयानाश्रमभागानभितश्चरतो रातिथ्यशमितमार्गश्रमयोर्दाशरथ्योरध्वानं तरसा रुरोध विराधाभिधानो या

टिप्पणं॥ पूजितं १॥ युक्तां २॥ पूजां ३॥ सूर्यः ४॥ बाणैः जलैश्च ५॥

तुधानः॥ सएषरोषभीषणस्त्रिशिखशिखरावतंसितविविधमृगशावशतः शतह्रदातनयः सीतामपजहार व्याजहारच दाशर
थी॥ कौ युवां युवानौ कुतस्त्यौ वामाचारवत्प्रति भाति मे वामाचारः॥ चीरं वपुषि जटाः शिरसि करे च चंडकोदंडः कायमाकल्पः
कनककल्पलताकल्पेयमनल्पाभरणा तरुणीति॥ दाशरथिरपि कथितनिजान्वयो विराधांके वेपमानां विदेहराजदुहित
रं विलोक्य सकोपः सौमित्रिणा साकं रक्षोवक्षसि शिलीमुखान्निजघान॥ ततः॥ पद्यं॥ विशिखे विशिखे तत्र विधातृवरवर्मणि
॥ सीतां निक्षिप्य चिक्षेप शूलं रक्षो रघूद्वहे॥ २॥ तदनु शूलमखंडयदंजसा शितशिखं रघुनायकसायकः॥ नियतमेव विरा
धविरोधिनां हृदयशूलमपि त्रिदिवौकसां॥ ३॥ ग०॥ विराधोपि क्रुधा सरभसमभिपत्य स्कंधे निधाय रामलक्ष्मणौ गतिनिरोधा
पराधपरिहरणायैव मिहि[1]रहिमकरौ प्रस्थे[2] वहन्विंध्य इव प्रतस्थे॥ रामस्तत्र विराधवधोद्युक्तं सौमित्रिमेवमभिदधे॥ प०॥ यातुनः
पदवीसेयं यातुनश्चास्य लक्ष्मण॥ यातुकामं तयैवेदं यातुकामं न हन्यतां॥ ४॥ अयिकुवलयमाम मूविमूंचेत्यतिकरुणं रुदती

टिप्पणं॥ सूर्याचंद्रमसौ १॥ सानौ २॥

मवेक्ष्यसीतां॥ अरमरन्वयतामुभावसिभ्यांपिशितभुजंभुजभारहीनमेनं॥ ५॥ ग०॥ ततस्तीक्ष्णतरक्षुरप्रप्रहरणगवाक्षितवक्ष
सारक्षसानपरित्यक्तेषुप्राणेषु॥पराक्रम. विषयपराक्रमौ प्राक्रमेतामेतौ तदंगगलितरुधिर धारासेकेनखननक्षमायांकाननक्षमायांराक्षसशवोचितंविकटमवटमुत्पादयितुं॥तत्क्षणमेवक्षणदाचरोपिसंजातप्रत्यभिज्ञः सन्रामंव्यजिज्ञपत् आत्मनोगंधर्वकुलसंभवंरंभापरिरंभंतच्छ्रवणकुपितवैश्रवणदत्तरक्षोरूपिणींशापव्यापदं तस्यास्तथाविधमवसानंच॥ प०॥
रक्षोवधःप्रैंकृत इत्ययमेवशंसेत्स्वर्गायगायकपदंगमितोविराधः॥ नागालयायवपुरस्यवदेदितीवभ्वैभ्रेतदाक्षिपदिषुमहतंसरामः॥ ६॥ ग०॥ तदनुनाकलोकभजनायपुरुहूतेनसमाहूतस्यभगवतःशरभंगस्याश्रमपदंरघुपतिरभजत
॥तत्र॥ प०॥ दशाशातनयनेपिवीक्ष्यमाणेदशरथपुत्रसिषेविषेवजाता॥ मनसिजशरभंगकारिदृतेर्मनसिमुनेःशरभंगनामभाजः॥ ७॥ ग०॥ समुनिराश्रमस्थंकाकुत्स्थमातिथ्येनसमाराध्यतत्सान्निध्याच्छुद्धांमंत्रपूतामाहूतिमिवआत्मनस्त

टिप्पणं॥ आलिंगनं १॥ आरब्धः २॥ गर्ते ३॥

नुं तं नून पाति पातयिता शाश्वतं पदं समाश्रितवान् ॥ ततः सुतीक्ष्णतपसः सुतीक्ष्णस्य तस्य निदेशाद्देशात्तस्मादुच्चलितः स
लिलनिधिपानसंभावितजीवनाभावशंकयाशरणाश्रयणायलंबमाननीलांबुदकुटुंबसंदेहावहेन नानानोकहनिवहेन
पिहिताभोगमगस्त्याश्रममाससाद ॥ अकथयच्च मैथिलीं ॥ प० ॥ तस्येदमाश्रमपदं सरसीरुहाक्षि संख्याविहीनमहिमै
कनिकेतनस्य ॥ भर्ता समस्तसरितां कुपितस्य यस्य हस्तारविंदमकरंददशामवाप ॥ ८ ॥ इह समदगजेंद्रन्यस्तहस्ताति
भारात्पथि विनमितशाखः सल्लकीवृक्ष एषः ॥ अभिनयति निकामं संगतो छायहानिर्मुनिवरकरपाताद्भुग्नविंध्याद्रि
मुद्रां ॥ ९ ॥ अस्मिन्महापथधिया वदनं विगाह्य निर्गंतुमक्षमतया जठरे लुठद्भिः ॥ वन्यैर्गजैरजगराः पिशिताशनेभ्यो
वातापिदानवदशामुपदेशयंति ॥ १० ॥ तत्र ॥ चुलकगतसमुद्रास्वादने कुंभयोनेरितरकरनिरस्ताभक्षिकोत्साररीत्या ॥
गगनगतिविहीना ये घनाः पल्वलांते विपिनमहिषवेषैः केवलं ते वलंते ॥ ११ ॥ ग० ॥ एवं विपिनविलोकनविस्मि-

टिप्पणं॥ जातवेदसि १॥ कृष्णमेघः २॥ समूहेन ३॥

तमतिस्तदुटजनिकटमासाद्य रामः शिष्यैः प्रवेशितः सकललोकवंद्यमानचरणारविंदमरविंदभवमिव वृंदारकवृंदैः परि
वृतं कोपहुंकारनिरहंकाराय नहुषाय भुजंगभावदूषिताय दत्तभुजंगभावं खगगतिनिरोधकल्पवैपुल्ययोर्दुरवगाह
महावनयोर्विंध्यशैलसिंधुराजयोर्गाधतागाधतातस्कर करोदरमुदरजातजातवेदोजितवातापिदानवावलेपं लो
पामुद्रावल्लभं सकलसरिद्वल्लभनिःशेषीकरणवाडवं ब्राह्मणश्रेष्ठमपास्तसमस्ताशमभ्युपगतदक्षिणाशां दृष्टैकतान
जन्मानमपि कुंभजन्मानं भगवंतमगस्त्यमपश्यत् ॥ प॰ ॥ प्रभामिवार्कः शितमसां निहंत्रीं ब्राह्मीं दधानं नियमेन लक्ष्मीं ॥
तपोनिधिं शौर्यनिधिः प्रपन्नः स्वनामसंकीर्त्यननामरामः ॥१२॥ ग॰ ॥ ततः परमहर्षेण महर्षिणा प्रणीताभिराशीर्भिः सह मु
रशासनं शरासनं सरसिजासनास्त्रं सौत्रामणं तूणीरयुग्मं रुक्ममयकोशं खड्गं च प्रगृह्य तदाज्ञया गोदावरीतटप्रकटितां पंचवटी
मसेवत ॥ तत्र विस्तृतपक्षद्वंद्वमप्यप्रतिद्वंद्वशौर्यं शौर्यावस्था प्रत्ययाय स्तुतापरोक्षमिव तार्क्ष्यं महामहीध्रकल्पं गृध्रराजम-

टिप्पणं ॥ पर्णशाला १ ॥ गर्वं २ ॥ वडवाग्निं ३ ॥

द्राक्षीत्॥ प०॥ पानेन हीनजलमब्धिमपास्य नूनं मैनाक एष मुनिमाश्रयतीति जातां॥ शंकामिमां रघुपतेः कथितात्मवंश-
स्त्वत्तातमित्रमहमित्यहरज्जटायुः॥ १३॥ ग०॥ रामस्तु दशरथमिव तं पश्यन् काश्यपकुलसंभूतं संपातेरनुजमनुजरचि
तपर्णशालः पंचवट्यां कंचित्कालं गमयामास॥ अथ कदाचिदुपचीयमानमनोभववैभवः पाककपिशकलममंजुमं
जरीपुंजपिंजरीभूतकेदारप्रपंचः पंचबाणप्रयाणोचितवीरपाणवत्पत्रपुटपात्रदश्यावश्यायबिंदुसंदोहश्चंद्रातपे
निरानंदतां चंदनानुलेपने निर्लोलुपतां चंद्रशालायां निराशतां चंद्रकांतस्थले निरास्थतां वातायनसेवने निरुत्सुक
तां वापीकूपोपकंठे निरुत्कंठतां वासरावसाने निरादरतां वारिविहारे निराकांक्षतामुत्पलमालायामुपेक्षतामुपवन
भजनेष्वुद्विग्नतां जनानां जनयन् गंभीराभोगगर्भगृहस्य च घनेष्टकारचितभित्तिश्लक्ष्णतिरस्करिणीपटलस्य च शशोद
रलोममृदुकंबलस्य च कालागरुधूमस्य च काश्मीरांगरागस्य च निर्धूमांगारभरितहसंतिकायंत्रस्य च सुभगंकरः करे-
णुकरनिकरवर्त्मकणायमानतुषारधूलिधूसरवासरः सरसीरुहगहनदावपावकस्तुहिनव्रणितलासिकाधरदूरीकृतवं

शकलस्सः॥ प्रक्षीणतारुण्यपण्यांगनांगवल्लयातसौभाग्यप्रपासन्निवेशस्तालवृंतविश्रांतिकरः॥ कामिनीस्तनभरगिरिदुर्ग
सीम्नि निर्भयनिलीननिदाघभावो दिवाभीतव्रातस्याप्यनतिभयंकरदिवाकरश्चकोरनिकरस्याप्यनतिक्षेमंकरनिशाकरः
कादंबकदंबस्याप्यनतिप्रीतिकरकमलाकरः करयुगकृतस्वस्तिकाबंधनतयानीहारांतकशंकयाल्हृदयकमलमिवगो
पायंतमभ्रांतहंतवीणाव्यापारवेपमानाधरपुटतयाशीतिकापिशाचिकानिर्हरणायनिपुणंमंत्रजपमिवकुर्वंतमविरल
पुलकपालीकंकंबलितकलेबरतयासकरुणविधिवितीर्णरोमकंबलकृतांगरक्षमिवभिक्षामटंतंदुर्गतेवर्गंनिर्घृणाक
दाचिदपिकमलानालोकयतीतितस्यैसासूयइवतदीयावासतामरसकोशंनाशयन्नंगजमतंगजकरपुष्करोत्थितशीकर
निकराकारैरतिपरुषस्मरशरजाततापप्रतप्तगगनांगनांगस्वबल्वेदबिंदुसदृक्षैरक्षीणमहिमहिमप्रसारैरध्वगांतःकरणानि
सीमंतयन्हेमंतसमयःसमुदजृंभत॥ प०॥ यत्रकांतानपश्यंतिक्लांताविरहवह्निना॥ निशावसानवेलांचवेलांचव्यसनांबुधेः॥

टिप्पणं॥ दरिद्रसमूहं १॥

॥१४॥ ग०॥ तत्रपर्णशालामध्यमध्यासीनं लक्ष्मणाग्रजमुपससर्पशूर्पणखा॥ प०॥ तस्मिन्नुज्जृंभितोष्णस्तनतटदयिताही
नसंहारकालेकाले प्रालेयधाराकवचितगगनाभोगदिक्चक्रवाले॥ कामांधाराक्षसीसापतिमतिमतनोन्मैथिलीप्राणना
थेलक्ष्मीलीलारविंदेनवपिशितधियंतन्वतीश्येनिकेव॥१५॥ ग०॥ ततस्तेनजानिकीजानिरितिजानीहिजनममुंमभानु
जमतिमनुजबलमबला वियुक्तंयुक्तमाश्रयितुंतवेतिरामेण प्रत्याख्यातासौमित्रिमुपेत्ययथामनीषितमभाषत॥तेनापिभ
द्रेतस्यार्यस्य दासोहंदासभार्यापदमनार्यमार्यायाः कुलसंभूतायास्तस्मात्तमेवभजेथाः॥ किंच॥ क्रूरसत्वभयानककाननसंचारा
चतुरांविहायवैदेहींतत्रभवतीमेवासौपरिग्रहीष्यतीतिलक्ष्मणेनाभिहिता विहितंहितमितितदीयंवचनममनुत॥ प०॥ दशरथा
त्मजयुग्मनिरीक्षणक्षणसमाकुलबुद्धिरियंदधौ॥उभयकूलसमुत्थितशाड्वलभ्रमगतागतखिन्नगवीदशां॥ १६॥ दूषस्यं·
तीदूषस्कंधंराघवंरावणानुजा॥ भूयःशूर्पणखाभेजेशूर्[1]पकारातिबाधिता॥१७॥ ग०॥ तदनुजनकदुहितुरनितरयुवति

टिप्पणं॥ कामपीडिता १॥

योग्यं भाग्यं रामस्य रामणीयकं निरूप्य पुनरेवमचिंतयत्॥ प॰॥ लावण्यांबुनिधेरमुष्य दयिता मे नाभिवेनंजनं कस्मान्मासृ
जदस्मदन्वयगुरोरुत्पत्तिभूः पद्मभूः॥ आस्तामेतदरण्यवासरसिके हा कष्टमस्मिन्नुजने कांतिं काननचंद्रिकासमदृशां
किं निर्ममे निर्ममे॥ १८॥ सीतामाहर्तुकामा मसुलभविषयप्रार्थनो द्राम कामां सौमित्रिः शस्त्रपाणिर्दशमुख भगिनीं तामना
र्यं निवार्य॥ कामक्रोधाधिकानामहमहमिकया प्रेंखतामायतानां तस्याः श्वासानिलानामकुरुत तरसा मार्गविस्तारकृ
त्यं॥ १९॥ ग॰॥ ततस्तस्या निकृत्तकर्णनासिकायाः कनीयस्याः परिभवं वदनेव वचनेन च दृष्ट्वाश्रुखान्नजनस्थानवर्ती समर
मुखमुखरः खरश्चतुर्दशसहस्रसंख्यश्चतुर्दशाध्यक्षर क्षितं रक्षोबलं रामलक्ष्मणौ जिघृक्षुः प्रेषयामास॥ अथ दाशरथि
निरीक्ष्य दिक्षु रक्षोगणमुपसर्पंतमपसर्पभूतया तया शूर्पणखया निदर्शितसरणिमरणिमिव मंथनात्मागनाविष्कृततेजः
प्रसरं सीतारक्षणे लक्ष्मणमादिश्य यातुधानवधं तथाविधमतनुत॥ तपोधननिधनकरकरनिकुरंबमिदं परुषभाषण

टिप्पणं॥ ममताशून्ये १॥

स्पृहयालु तालुजालमिदं परदारनिरीक्षणनिरपत्रपनेत्रद्वंद्वमिदमिति निशिततरशरशतशकलितनिशिचरावयवानाद्द
त्याद्दत्यप्रत्युटजं दर्शयद्भिस्तपोधनाध्वशुद्धिं विधध्वमिति गृध्रराजनिदेशादिव देशांतरादापतद्भिः पतद्भिः कंकश्वाची
कश्यायैरनवकाशमभूदाकाशं॥ तत्र निकृत्तशिरसि त्रिशिरसि विस्रगंधिना शरीरस्रुतवसास्रोतसा प्रेत्यापि क्रियमाणास्र
मदूषणे दूषणे रोषभीषणवीक्षणखैरः खरः राघवमाहवायाह्वयत॥ तत्र विपश्चिद्भिरप्यनिश्चीयमानजयापजयमनि
मिषैरप्यननुसंधीयमानशरसंधानमोक्षमभूदभूतपूर्वं द्वंद्वयुद्धं॥ तत्र खरोगृहीतकोदंडस्त्वसकृदनुभूयमानमनोन्मना
यासः समरसमापन्नचतुरश्चतुराननास्त्रसंधानार्हदाशार्हशरासनं ग्राहयितुकाम इव रामहस्तात्प्राक्तनं चापं शरैरपजहा
र॥ सोपि कोपपावकपावकिताननः कुंभसंभवदत्तं धनुराधत्त॥ प०॥ खरपरुषि शरासने गृहीते खरकिरणान्वयशेखर
रेण तेन॥ खररघुवरयोरणं समासं खरनखरायुधयोरिव क्षणेन॥ २०॥ खरवधपरिशुद्धे दंडकारण्यभागे मुनिभिरभिहि

टिप्पणं॥ दुर्गंधिना १॥ भयंकरः २॥ व्याघ्रः ३॥

तानामाशिषां तादृशीनां॥ स्वयमं[1]बरमपात्रं स्वैर्गुणैर्मथराभूत्तदनु मनुकुलेंदुः सानुजः शौर्यराशिः॥ २१॥ तथाहि॥ प्राग्मंथ
रेतिमहिषीति वरदृयीति धर्मव्ययव्यथितभूपतिभारतीति॥ काकुत्स्थकाननकथेति च संतिसंज्ञाः पौलस्त्यभीतभुवनत्र
यभाग्यपंक्तेः॥ २२॥ ग०॥ अथ शूर्पणखा लंकामपि जनस्थानमिव विजनस्थानं काकुत्स्थेन कारयितुं दशकंठोपकंठेह्लत्ये
वनिपत्य रामलक्ष्मणयोर्याथातथ्यं वैदेह्या देहसौंदर्यं खरप्रमुखैः साकमनीकस्य चतुर्दशसहस्रसंख्यस्य पंचताकरण
कारणभूतामात्मावज्ञां च विज्ञापयामास॥ प०॥ स दंडकायां कृतदंडकायां स्वसारमेनां प्रथितस्वसारः॥ नि[2]शाम्य राम
स्य निशाम्य वृत्तं चक्रे रुषं राक्षसचक्रवर्ती॥ २३॥ ग०॥ ततः प्रस्थाप्य जनस्थाने राक्षसानष्टौ नष्टमतिरयं ताटकेयं हाट
कमृगं पुरस्कृत्य सीताकृयां हरिणीं ग्रहीतुं तस्यावसथमाससाद॥ मारीचोप्याकर्णितरावणमतिः प्रयत्नशतैरप्यनिवा
र्यमाणे तस्मिन् रावणे सुबाहुमेव बहुमन्यमानो गत्यंतराभावात्तदभ्यर्थनामभ्युपेत्य जा[3]तरूपमयमृगरूपं गृहीत्वासी

टिप्पणं॥ प्रथमभाजनं १॥ दृष्ट्वा २॥ सुवर्णमयं ३॥

तां वंचयितुं पंचवटीमगाहत ॥ दशमुखोपि जलधरपथस्थापितरथो दाशरथिविघट्टने कृतास्थस्तस्थौ ॥ प० ॥ विपिनमव
गाहे राक्षसानां करोटीरसकृदसकृदाविर्बाष्प्यमालोक्य शोचन् ॥ कृतरुचिरिव वर्त्मन्यंकुशानां कुशानां पथिकचरणला
विन्यंकुरैर्न्यंकु[1]रेषः ॥ २४ ॥ तदनु जनकपुत्रीयाचया तज्जिघृक्षुर्हरिणमनुजगाहे चापमादाय रामः ॥ समय इति च भेजे
पाशमात्तस्य मृत्युः कुशिकसुतमखाजौ भ्रष्टमेनं जिघांसुः ॥ २५ ॥ आकृष्य दूरमुटजादथ दर्शितांगः क्रव्याद एष रघुना
थशरेण विद्धः ॥ का[2]र्तस्वरेण तनुतां विजहौ हतोस्मीत्यार्तस्वरेण सह रामवचोनिभेन ॥ २६ ॥ ग० ॥ एतदाकर्ण्य विदी
र्णहृदया हृदयदयितप्रेम्णा कर्तव्याकर्तव्यमजानाना जानकी जानीहि भ्रातरमिति सौमित्रिमादिदेश ॥ ततश्चार्ये
ण कार्यमिदमादिष्टं दिष्टदोषान्मिथ्याप्रतीतिः पराभवति भवतीं परं त्रिभुवनैकधनुर्धरस्य शौर्यराशेः रामार्यस्य कः श्र
द्दधीत कौणपघुणनिमित्तां विपत्तिमिति प्रणिपत्य प्रत्याचक्षाणं हृदयतोदकारिण्या वाण्या मोहविकुला सा वङ्क तर्जयत् ॥

टिप्पणं ॥ मृगः १ ॥ सुवर्णं २ ॥

भूयोपिलक्ष्मणःपरुषभाषणभाषिणींप्रजावतीमेवमभाषत॥ प०॥ सुमुखिममसुमित्रासत्यमंबायदासीत्तदभजम
वितर्कमातृसंपर्कसौख्यं॥ अहहविधिविपाकाद्याहरंतीदुरुक्तिंखमसिविपिनमध्येमध्यमांबाहिजाता॥ २७॥ ग०॥ इत्यु-
क्त्वाभ्रातृजायां भ्रातृसमीपगामिनिलक्ष्मणेतत्क्षणमेववरंध्रान्वेषीदशकंधरःस्यंदनंविहायविहायस्थलादवतीर्यनि-
जांतःकरणस्थमांतंरागंबहिःप्रकटयन्निवधृतकाषायपटसन्यासिवेषःपर्णशालामाससाद॥ प०॥ रामाश्रमाद्विग
तलक्ष्मणसन्निधानात्सीतांजहारचपलःपिशिताशनेंद्रः॥ मालांमहोत्पलमयींपललभ्रमेणदेवालयादिवनिरस्तजना
द[1]लर्कः॥ २८॥ हानाथक्वनिरायसीतिबहुशोव्याक्रुश्यबाष्पाविलंचक्षुर्दिक्षुविमुंचतींदशरथस्याद्यामवेक्ष्यस्नुषां॥ रे
रेरावणमावधूंप्रतिरुधामुंचेतिगृध्राधिपोरुध्वाध्वानमनल्पकोपमकरोदग्रेवणंरावणं॥ २९॥ समभूत्समयेतस्मिन्स
मरंसमरं[2]हसोः॥ मिथोमथनसंक्रुद्धगृध्रराक्षसराजयोः॥ ३०॥ दशमुखरथमाशुध्वस्तरथ्यंविसूतंशिथिलतरवरूथं

टिप्पणं॥ सारमेयः १॥ पराक्रमः २॥

[1]शीर्णच्चक्रंसच्चक्रे॥ गरुदभिहतशक्तिप्रासबाणासिखड्गत्रिशिखविशिखतूणीपाशकुंतः शकुंतः॥ ३१॥राक्षसासि
क्षतः क्षिप्रंपपातपतत्[2]तांवरः॥ मैथिलीपक्षपातेनपक्षपातमवापसः॥ ३२॥ग०॥ लक्ष्मणमन्यरथाधिरूढेनरावणेन
भूयोपिनीयमानाजानकीऋष्यमूकशृंगेसंगतप्लवंगपंचकेपंचचूडाधरइवक्ष्माधरकुमारेकस्मिंश्चित्सुग्रीवसा
त्कृतदशग्रीवप्रतापानलसदृशंवालिविनाशपिशुनंमहोल्कापातप्रतिमंरामसाहाय्यप्रोत्साहनायपुत्रमभिपतत्पतं
गबिंबशंकावहंकनककपिशकौशेयमयोत्तरीयांतरितमाभरणभारमपातयत्॥ तत्पतनमपिस्वतेजः पतनमिव
नपश्यन्लंकालंकारभूतामशोकवनिकांमैथिलीमनयदनयज्ञोदशग्रीवः॥ प०॥ अशोकवनिकालेभेराक्षसीपरि
वेष्टितां॥ सीतांमारुतियालाग्निस्तंभनार्हामिवौषधिं॥ ३३॥ काकुत्स्थोप्यथरक्षसामधिपतेर्वाग्वागुरावेष्टितेत्कृत्वाहा
टकताटकेयहरिणेशार्दूलविक्रीडितं॥ आगच्छन्ननुजेनतत्रगदितामाकर्ण्यवार्तांततः सीतासंगमलालसस्तदुटजं

टिप्पणं॥ विच्छिन्न १॥ पक्षिणां २॥ सूर्यः ३॥

रामःप्रतस्थेद्रुतं॥ ३४॥ अयंकथंस्यादितिबाष्पगर्भमालोक्यमानोवनदेवताभिः॥ विलोकयन्केवलपर्णशालांविली-
नचेताविललापरामः॥ ३५॥ हाकष्टमत्रनहिसाकिमिदंप्रवृत्तमालोकयामिचंदुलामिहपादमुद्रां॥ मांवीक्ष्यनूनमगृही
तमृगंमुहूर्तमंतर्हितातरुषुरोषवतीवसीता॥ ३६॥ त्वदभिलषितपूर्त्यैवंचितःपंचवट्यामचरमचरमोहंमोहभाजांप्रजानां॥
तदिहसरलबुद्धेनैषरोषस्यकालःसुमुखिममदुःखंकिंसोढसीतावियोगं॥ ३७॥ यद्यस्तिकौतुकमपूर्वमृगेमृगाक्षिचांद्रं-
हरामिहरिणंममसंनिधेहि॥ यावन्नमुंचसिमयाहृतमेणमेनंतावद्दधातुतववक्रतुलांमृगांकः॥ ३८॥ सप्राणाचेज्जनक-
तनयाकिन्नतिष्ठेतमर्त्यंहिंस्रैःसत्वैर्नकिलविहतारक्तसिक्तानभूमिः॥ गोदावर्याःपुलिनविहृतिंरामशून्यानकुर्याद्युक्तं
नक्तंचरकवलनात्संस्थितासर्वथासा॥ ३९॥ लोकांतरप्रणयिनंश्वशुरंप्रणंतुमाज्ञप्तकालमतिलंघ्ययदिप्रयासि॥ विज्ञा
प्यमामपिसमाह्वयसाध्वितस्मैसौमित्रिरेवभरतेनिदधातुराज्यं॥ ४०॥ इत्थंविलप्यदयितांविपिनेविचिन्वन्रामोनतत्र

टिप्पणं॥ सुंदरां १॥ प्रथमः २॥

धृतिमान्नलक्ष्मणोपि॥ तादृग्विधामपिदशांकथयन्स्ववाचावल्मीकजन्ममुनिरेवकठोरचेताः॥ ४१॥ ग०॥ तत्रप्रारभ
माणप्रयाणान्प्राणानवष्टभ्यजटायुः क्रियमाणसीतान्वेषणंसलक्ष्मणंराममालक्षयन्नवोचत॥ आयुष्मन्मांखड्गविक्षत
पक्षतिंक्षितितलेनिक्षिप्यक्षिप्रतरंजहारमैथिलींरावणइति॥ प०॥ स्वयमपिशरभंगस्वीकृतांभंगहीनांसपदिगतिम
वाप्तः संदृतायुर्जटायुः॥ नयनसलिलमिश्रंरामहस्तेनदत्तंदशरथदुरवापंप्रापनैवापमंभः॥४२॥ग०॥अथदक्षिणा
रण्यानींप्रस्थितेकाकुत्स्थेराक्षसीकाचिदयोमुखीनामसौमित्रिमभिभूयतदीयेनशस्त्रेणशूर्पणखासिद्धिमभजत॥
तदनुक्रौंचारण्यसरण्याप्रयातावेतौमहर्षेस्थूलशिरसःशापात्कौणपतांप्रपन्नःपन्नगपतिभोगभीषणाभ्यांभुजाभ्यां
बबंधयथार्थनामाकबंधः॥ तदनंतरमनश्रुपात्रेषुराक्षसीनेत्रेषुसदोत्पादितवारिभ्यांतरवारिभ्यांरामलक्ष्मणयोः
कबंधबाहुयुगलंकदलीलावमिवालूयत॥ प०॥ तदनुदनुकबंधेनादरादर्थितौतौगिरितटभुविदेहंदेहतुस्तस्यभीमं॥
टिप्पणं॥ शरीर १॥ छेदनं २॥

अकथयदथशापापायतुष्टः सरामंतपननतनयमैत्र्यामेथिलींप्राप्नुहीति॥४३॥ ग०॥ तस्मिन्दृश्यमूकमार्गमुपदिश्यस्व
र्गंगतेमतंगाश्रमवासिन्याशबर्याकृतांसपर्यांरामः परिगृह्यतदनुज्ञया मनोज्ञकूजितविहंगमृगगणविहारमनोहरं
गहनपदमवगाह्यव्याकोशकुशेशयपरिचयकषायैर्वनदेवतालतादोलानुकूलैः कूलायतलीलापरवशवशावल्लभ
मदांबुचुंबिभिः शंबराराति शरधिसदृशतटसहकारशिखरविसरदासवासरसीकरशेखरैर्विविधलतालासिकाला
स्योपदेशदेशिकायमानैः कायमानसमानाभोगलतागृहकेलिलुब्धलुब्धकपुरंध्रीशिथिलधम्मिल्लमल्लिकागंधमां
सलैर्मल्लिकाक्षपक्षविक्षोभक्षोदीभूतपाथः पाथेयैस्तटवनपवनैरनुकंप्यमानः पंपामभजत्॥ ॥इतिश्रीमद्वि
दर्भराजविरचितेचंपूरामायणेश्रीमदरण्यकांडःसमाप्तः॥ ॥अथकिष्किंधाकांडः॥ ॥प०॥सतांसैतांबुद्धिमिव
प्रसन्नांपंपांवियोगज्वरजातकंपः॥ विलोकयन्लोकनिविष्टकीर्तिरार्तिरघूणांप्रवरः प्रपेदे॥१॥ ग०॥ ततस्तस्यास्तटवने

टिप्पणं॥ उदकं १॥ शंबलैः २॥ साधूनां ३॥

नानानोकरुहनिवहपरिष्कृते निभृतेतरपरिभ्रमणपरभृतव्रातचंचूमयविपंचीसमुदंचितपंचमांचितासंतताकुंचितपंचशरशरासनशरासारवंचितसंचारपथिकप्रपंचाप्रमदचंचलचंचरीककुलकंचुकितमाधवीमाधवीभूतिरुदजृंभत॥ प०॥ यत्र कांतैर्वियुक्तानां युक्तानामपि सुभ्रुवां॥ दोलाकर्म वितन्वंति मनांसि च वपूंषि च॥ २॥ करतलैरुपचायमथेक्षणैरपचयं च वनेषु जनेषु च॥ सुमनसां मनसामपि यद्दिने विरचयंति विलोलविलोचनाः॥ ३॥ ग०॥ तस्मिन्नसमशरसमरसमये पंपां समंतात्पर्यट ... न्पर्याकुलहृदयो हृदयदयितां हृदि लक्षयन्लक्ष्मणमिदमभाषत॥ प०॥ आधौ सिद्धौषधिरिव हिता केलिकाले वयस्या पत्नीत्रेतायजनसमये क्षत्रियाण्येव युद्धे॥ शिष्या देवद्विजपितृसमाराधने बंधुरार्तौ सीता सा मे शिशिरितमहाकानने कानजाता॥ ४॥ मलयगिरिचरोयं मन्मथाधोरणाज्ञामथितपथिकवर्गो मारुतव्याजहस्ती॥ विरचयति मदीये शैत्यसौरभ्यमांद्यत्रिविधमदसमृद्धो मानसे वप्रलीलां॥ ५॥ ग०॥ एवं दुःसहविरहक्लेशानुक्लेशानुभावं भावसंधुक्षणविचक्षणलक्ष्मणवचनधार्यमाणधैर्यं राघवमग्रतः सुग्रीवो विलोक्य वालिप्रणिहितापसर्पधिया सुदूरमपससर्प॥ स तु

संमंत्र्य मंत्रिभिस्तयोराशयमवजिगमिषु रांजनेयं प्रभंजनसंजातं प्राहिणोत् ॥ प० ॥ तपनपवनयोर्यः प्राप्तवान्पुत्रभावंश्रा
तमखकृतवाणीविद्ययाजन्मनाच ॥ सतनुदशमुखकीर्तिस्तोमसोमस्यपक्षश्वरमइवतनूमान्प्रापरामंहनूमान् ॥ ६ ॥ ग० ॥
सएवस्वीकृतभिक्षुकवेषः सविनयमेतावावभाषे ॥ भवंतौ कतरौ कांताकारौ कांतारं कथमिदमवातरतां विचित्रनर
जिष्णुकोदंडमंडितावपि दिनस्यास्य सुदिनत्वाद्भवंतौ नजीमुतौ जटावल्कलयुतावपि जंगमत्वाद्भवंतौ न कल्पवृक्षौ त
मोपहालोकललितावपि योगपद्यभास्करसान्निध्याद्भवंतौ न पुष्पवंतौ ॥ प० ॥ कुशास्तंभेपि संभूतं सौरभ्यमिव भासते ॥
तपोवेषेपि सौंदर्यं युवयोर्युवयोगिनोः ॥ ७ ॥ युष्मद्वार्तासुधास्वादलुब्धयोः श्रोत्रयोः सुखं ॥ स्वयमेवग्रहीतुंमे जिह्वाप्रह्वा
प्रवर्तते ॥ ८ ॥ ग० ॥ कश्चिदस्ति समस्तवानरपतिः सुग्रीवइति तेन भ्रातृभयादृश्यमूकमुपाश्रितेन युवाभ्यां सह सख्य
मिच्छता प्रेषितं हनूमदभिधानं दधानं भिक्षुरूपप्रतिच्छन्नं वानरमिममांजनेयं प्रभंजनसंजातं जानीतमिति ॥ ततस्त

टिप्पणं ॥ शिष्यत्वंपुत्रत्वंच १ ॥ दिवाकरनिशाकरौ २ ॥

दीयंवचनमाकर्ण्य कर्णयुगलसुधावर्षि देवर्षिप्रतिमो दाशरथिस्तद्दर्शितेन पथा तमुपाश्रित्य विरचितभुवनसौख्यं सख्यं तप
नतनयेन साकमग्निसाक्षिकमकरोत्॥ प०॥ योगं वितन्वति हनूमति राघवस्य वैवस्वतेन हरिणा[1] समवर्तिना च॥ मेने विधि
र्घटयितुं हरिमिंद्रपुत्रं वैवस्वतेन हरिणा[2] समवर्तिना च॥ ९॥ ग०॥ ततस्तत्क्षणं संभृतविस्रंभाय प्रतिश्रुतवालिवधाय कथि
तनिजदशाय दाशरथये सुग्रीवो दशग्रीवनीयमानसीतापातितानि कानिचिदाभरणान्यदर्शयत्॥ प०॥ प्रत्यर्पितानां क
पिपुंगवेन रामः स्वकांताधृतभूषणानां॥ संस्कारहान्या परिधूसराणां प्रक्षालनं बाष्पजलैश्चकार॥ १०॥ ग०॥ ततः सौमि
त्रिभणितनिर्बंधसंधुक्षितधैर्येण रामेणानुयुक्तो वालिवैरकारणं भानुसूनुरित्थमकथयत्॥ पुरा खलु निखिलरिपु
कुलतिमिरनिचयमरीचिमालिनं वालिनं मायावी नाम दानवः कश्चन दुंदुभेर्भ्राता युद्धाय रुध्वा तद्बलचकितधृतिरुरग
नगरकुहरमवागाहत॥ तदनुगाहमानेन मानशालिना वालिना बिलमुखपालनाय निहितस्तस्योत्थानवेलां प्रतिपालय

टिप्पणं॥ वानरेण १॥ यमेन २॥

न्नहंनिरकालेप्यतीतेफेनस्यानंमांसनिःसृतमसृग्पूरमवेक्ष्य भ्रातामेनिहतइतिनिरचिनवं॥ तदनुविपुलोपलपटलपि-
हितबिलमुखःसवलीमुखबलस्तस्मैदत्वास्वयमुदश्रुरुदकंनैवापम वापंशोकांधःकिष्किंधां॥ अथविदितवृत्तांतैरमा
त्यैरभि षेचितंमयिमायाविनंनिहत्यखरतरभुजपरिघविघट्टितबिलवदनपिधानस्तरसारसातलान्मुखुरंप्रविष्टोती
वरुष्टःप्रभ्रष्टाशयंबकुशः प्रणिपतंतंप्रतिपादितयाथातथ्यंमांनगरान्निरागसमपिनिरकासयत्॥ तदनुतदनुधा
वनात्कांदिशीकस्यममपर्वतेस्मिन्नकुतोभयसंचारकारणमाकर्ण्यतां॥ पुरेकदावालिनमतुलभुजबलमखिल
कुलाचलचलनचतुरंचतुरर्णवलंघनजंघालंदुंदुभिर्नामदृप्तदारकारिर्लुलायकायःपरिभूयसमरंरसमतिष्ठत॥ निह
तस्यतस्यशावंबाकुबलावलेपेनवालीसकललोकविलयविलोलदनिलबलचलितलघुतूललीलयामतंगाश्रम
क्षितोक्षिप्रमक्षिपत्॥ प०॥ तत्रवालिकरनुन्ननिष्पतदुंदुभिप्रसृतरक्तबिंदुभिः॥ पाटलंतदभवन्मुनेर्वनंतस्यव
क्रमपिरोषपाटलं॥ ११॥ ग०॥ ततोमतंगशापबलादवालिवश्यमृश्यमूकंविमृश्यास्मिन्विस्मृतपुरनिवाससुखसु

न्चिरं निवसति सति मयि ॥ प० ॥ अयमसुखयद्देवं देवधीमान्हनूमान्त्रिपुरितिभवतो पित्रस्तमस्तोजसंमां ॥ दवकृतवहधू
मस्तोमइत्यंबुवाहाच्चकितमिवमयूरंमारुतोवारिशीतः ॥ १२ ॥ ग० ॥ श्रुत्वाथरामः शोकोदग्रां सुग्रीवगिरं ॥ यद्येवंम-
हाभाग माभैषीर्मम शिलीमुख एव वलीमुखस्य तस्यासून्कालक्षेपमपास्य पास्यतीत्युक्त्वा तत्प्रत्ययार्थं पादांगुष्ठेन प्रे
रितदुंदुभिकलेवरस्तत्कर्मणाप्यतृप्तस्य सुग्रीवस्य प्रार्थनया सप्तभुवनभवनस्तंभसंभावनया किल सप्तधा धात्रा
वर्धमानपरिणाहरोहान्सप्तसालानप्यविधेययातुधानकुलविविधवधविधायकेन सायकेन विव्याध ॥ सोयं साय
को निकटगिरिकटकमपि पाटयामास ॥ प० ॥ निर्भिन्नसालकटकोस्मियथा तथा त्वं पौलस्त्यसालकटकं युधि पाटये
ति ॥ ऊचे शिलादलनजातरवेण नूनं तस्मै बलीमुखवराय शिलीमुखः सः ॥ १३ ॥ ग० ॥ ततस्तत्प्रत्याहृतेन पुरुहूततनुजे
न सार्धं तस्य तलातलयुद्धे प्रवृत्ते सति सज्जनदुर्जनयोर्भेदं रूपतोपि विवेक्तुमक्षमतया मनसि विचारयन्सदसि वानं

टिप्पणं ॥ वालिनः १ ॥

यमतामुपेतइववाग्मीतयोरप्येकवेषकर्मणोर्भेदमनवगच्छन्नमुक्तशरोभूद्दाशरथिः॥सुग्रीवस्तुवालिबलासहनतया
लब्धदैन्योर्वदान्य[1]इवमार्गणा[2]पातमार्गेसदाचक्षुर्विक्षिपन्नपगतधृतिरतिंदूरमपासरत्॥तमेनमृश्यमूकेमूकवत्रप
यानिषण्णंविषण्णहृदयंदयालुरालोक्यत्रैलोक्यैकधन्वीरामस्तच्चेदमवगंतुकामःकामप्यभिज्ञानमालांसुग्रीवग्रीवायां
बाणनिवारणनिपुणांसिद्धौषधिमिवबध्वाभूयोपिवालिनमाह्वाययेतितमादिदेश॥पुनरप्यवाप्यकिष्किंधांपर्जन्य
इवगर्जतितस्मिन्सुत्रामपुत्रस्ताराभिहितांहितोक्तिमतिक्रम्यदुरतिक्रमतयानियतेः[3]समारब्धसमरोदाशरथिशरश
कलीकृतवक्षस्थलःक्षितितलेसहसापपात॥अथविदितवृत्तांतासंलताश्रुनिष्यंदकलुषिततारातारानगरान्निर्गत्य
वारिवारितंवारणयूथपतिमिवसुग्रीवनिर्भयनिरीक्ष्यमाणमुन्नतग्रीवमुत्थातुमक्षमतयाक्ष्मातलार्पितकूर्परयुगलंम
लगलदसृक्पूरशारशरीरंशरासनशिखरविन्यस्तहस्तेनसन्निकर्षस्थितेनकाकुत्स्थेनकृतसल्लापमपेताडंबरमिवां

टिप्पणं॥ दानशौंडः १॥ बाणःयाचकश्च २॥ दैवस्य ३॥

बुधिमस्तोन्मुखमिवमयूखमालिनंवालिनमालिंग्यस्वांकोन्तंसितंतदुक्तमांगारघुनाथमित्थमकथयत्॥ ग०॥ कारुण्यंनि
रवधियत्तवप्रसिद्धंशीतांशोः सहजमिवार्तिहारिशैत्यं॥ तत्सर्वमनुकुलनाथरम्यकीर्तेमत्पापात्कथयकथंत्वयानिरस्तं॥
॥१४॥ एवंविधेप्रियतमेप्यनपेतजीवांमांराक्षसीतिरघुपुंगवसाधुबुध्वा॥ बाणंविमुंचमयिसंप्रतिताटकारेश्रेयोभवेद्द
यितसंगमकारिणस्ते॥१५॥ साधारणीक्षितिभुजांमृगयेतिपूर्वमुक्तंत्वयैवजनसंसदिसत्यवादिन्॥ शाखामृगींतदिह
मारयमांशरेणकोनामराममृगयुर्दयतेमृगीणां॥१६॥ संत्रस्यपूर्वममुतस्तवबंधुरेषभेजेयथाद्रिमकुतोभयमृश्यकू
कं॥ भर्तामिमायमपिराममशेरेरभेद्यंप्राप्तोमदीयहृदयस्थलमद्रिदुर्गं॥१७॥ नाहंसुकेतुतनयानचसप्तसालीवालीनचत्रि
भुवनप्रथितप्रभावः॥ तारास्मिवज्ररहृदयाविशिखैरभेद्याधन्वीकथंभवसिराघवमामविध्वा॥१८॥ क्षितिप
तितनयानांहंतगर्भेश्वराणांकिमुनिरवधिमोघ्यंशौर्यवज्जन्मसिद्धं॥ ममहृदिनिरपायेवर्तमानेकपींद्रेरघुवरय
दमुष्मेतिष्ठसेचापपाणिः॥१९॥ ग०॥ एवंविलपंत्याहारायिताश्रुधारायास्तारायाः परिदेवनरवैर्बाष्पांबुकणाभ्युक्षणे

रक्षीणश्वासानिलैश्चक्लताश्वासद्वलब्धसंज्ञो वालीभिजनंदनमिक्ष्वाकुनंदनेसमर्प्यांगदमंगसंगिनीं कांचनकांचन
मालांशोकावनतग्रीवायसुग्रीवायदत्वानिजभुजबलप्रशांतासुरः प्रशांतासुरभूत्॥ तत्रहासकलभुवनबहुमतबाहु
बलानलशलभायिताहितबलललितगंधर्वगंधसिंधुरपंचताकरणपंचाननदशमुखभुजभुजंगभोगनिरोधायाहि
तुंडिकायितवालवलयवालिन्विलयंकथंगतोसीतिबाष्पाविलमुखावलीमुखास्तस्यराजाज्ञयायथाभिप्रेतंप्रेतकृत्यं
सर्वेनिर्वर्तयामासुः॥ प॰॥ अभिषिक्तेतुसुग्रीवेरामश्यामपयोमुचा॥ अभिषेक्तुंस्थितामेघास्तन्महींमहिषीमिव
॥२०॥ आर्यार्यान्वेषणाकार्याशारदीत्युक्तसंविदा॥ कपींद्रेणार्थितोरामः किष्किंधावर्तनंप्रति॥२१॥ नयोग्यानगरप्रा
प्तिरित्युक्तवतिराघवे॥ सुग्रीवप्रार्थनाप्यासीद्भरतप्रार्थनासमा॥२२॥ दृत्तोर्जुनविकासेनधौर्तराष्ट्रान्निरस्यता॥ तेनजी-
मूतकालेनदेवकीनंदनायितं॥२३॥ तत्र॥ आस्माकींरूपलक्ष्मीमसत्कृदपहरत्यात्मकांत्यातदास्तांभर्तारिंनः सुरेंद्रंकिम

टिप्पणं॥ वृक्षः पार्थश्च १॥ हंसाः धृतराष्ट्रपुत्राश्च २॥

पिनगणयन्वालिनंग्राग्जघान॥ इत्थंमत्वेवंवैरंभ्रुठितिघनघटाराघवस्याहवोत्थामोंशामोंशाश्वरुध्वास्तनितमिषमहासिंहनादंततान॥ २४ ॥उपनितजीवनधारासत्पथभाजोनिरस्तसंतापाः॥ भूपाइवनवमेघाःपौलस्त्यमहाबलाकुलिताः॥ २५॥ ग०॥ तेनकिलरघुपतिरतिमात्रप्रवृद्धमन्युःशतमन्युशरासनशोरतरतारापथांघनतरघनरवमुखरितहरिन्मुखाभोगांकदंबवनपवनाकंपननिराडंबरकोदंबकुडुंबामंबुदकदंबकवलितांबरांशिलींध्रसंबंधबंधुरवसुंधरांविकचकुठजनिचयकवचितमहारण्यांप्रावृषेण्यांप्रक्रियांप्रेक्षमाणोलक्ष्मणमिदमभाषत॥ प०॥ अयंकालःकालप्रमथनगलाभैरभिनवैरहंयूनांयूनामपहरतिधैर्यंजलधरैः॥ स्मराधाराधारापरिचयजडावांतिसहसानभस्वंतःस्वंतःकथमिवविियोगःपरिणमेत्॥ २६॥ महासमरसूचकप्रतिदिशंमनोजन्मनोमयूरगलकाहलीकलकलःसमुज्जृंभते॥ पयोदमलिनेदिनेपरुषविप्रयोगव्यथांनरेषुवनितासुवादधतिहंतकेकाइति॥ २७॥ अंभोदरोदरवि

टिप्पणं॥ इच्छां १॥ दिशः २॥ शबलः ३॥ कलहंसाः ४॥ अहंकारवतां ५॥ वायवः ६॥ मनोभवस्य ७॥

निर्गतवारिधारासंमर्द्दमांसलसमीरसमीर्यमाणैः॥ आमोदवीचिनिचयैः कुटजप्रसूनैराकाशमेतदवकाशविहीन
मासीत्॥ २८॥ घनश्यामलपत्रस्य व्योमन्यग्रोधशाखिनः॥ प्ररोहा इव लक्ष्यंते वारिधाराधरां गताः॥ २९॥ अंभोधिपा
नेसलिलेनसाकमापीतमौर्वाग्निशिखाकलापं॥ तस्योदरावारिधरावमंतिविद्युल्लतोन्मेषमिषेण नूनं॥ ३०॥ ग॰॥ इत्थं
प्रवृत्तेषु घनदिनेषु दाशरथिना कथमपि नीतेषु तदाकारकांतिविजितमिव शनैः शनैर्मेघमंडलं पांडुरमभूत्॥ तस्य चा
पस्य व्यापारवेलायां न सन्निधातव्यमित्यंतरिक्षांतरादंतर्हितं किल पाकशासनशरासनं॥ प॰॥ रघुपतिचापघोषस
मयो भवितेति भियाप्युपरतसुद्भटं घनघटाजनितं स्तनितं॥ श्वसितमरुद्भिरभ्रविजितः किल शांतिमगात्परिचितके
तकीकुटजनीपवनः पवनः॥ ३१॥ तापोपशांतिनटनाकृतलोकहर्षा वर्षानटी गगनरंगतलात्प्रयाता॥ अंभोदवा
द्यमचिरेण शशाम सर्वं निर्वापिताश्च सहसैव तडित्प्रदीपाः॥ ३२॥ ग॰॥ क्रमेण वाहिनीजातं सकलं भाविनीं वानर

टिप्पणं॥ वटः १॥

वाहिनीपूर्तिमसहमानमिवतनिमानमभजत॥ दुर्दिनापायेलंकायामपिराजहंसनिःशंकसंचारः संभविष्यतीतिम-
त्वाकिलभूम्यामपिसमजनिराजहंसनिःशंकसंचारः॥ एवंप्रोषितायामपिप्रोषितजनशेमुषीमुषिप्रावृषि॥ प०॥ काम
क्षिप्तष्टषत्कभिन्नहृदयच्छिद्रप्रणालीगलन्मैत्रीसारलघोप्रतिश्रुतगिरंनिर्वोढुमप्यक्षमे॥ सुग्रीवेचिरसंस्थितांशमयि
तुरागांधतांतादृशीं किष्किंधांद्रुतमापकोपकलुषोरामाज्ञयालक्ष्मणः॥ ३३॥ ग०॥ तत्रसौमित्रिरतीवरुष्टः प्रविष्टइत्यंग
देनविज्ञापितोप्यनंगसंगरसंगतपरिश्रमादजातजागरः सुग्रीवस्तद्दर्शनत्राससंकुलितसकलप्लवंगकुलकिलकि
लायितेनप्रबुद्धः सचिवयोः प्लक्षप्रभावनाम्नोः प्रभावेनप्रकृतिं प्रपेदे॥ ततस्तस्मिन्सुग्रीवेराघवरोषस्यकारणंनिरूपयति
सतिमुखरितहरिन्मुखोभून्लक्ष्मणज्याघोषः॥ प०॥ तत्रासनंद्रुतमपास्यपतिःकपीनांतत्रासनम्रवदनोघनचापघोषा-
त्॥ संतोषपोषमिवभूरिभजन्भुजंगः संतोषनाशपिशुनात्तरुणाभ्रघोषात्॥ ३४॥ ग०॥ ततः प्रतिश्रुतकार्यस्यप्रोत्साहना
टिप्पणं॥ बुद्धिः १॥ शरः २॥ जलनिर्गममार्गः ३॥

यप्रणयकुपितेन भ्रात्राप्रेषित एष इति मारुतिना धार्यमाणधैर्यः सुग्रीवः सौमित्रिं सांत्वयितुं तारां प्रेषितवान्॥ प॰॥ द्वा
र्वारुणीभजननिकृतराजतेजो निष्क्रांततारमुपशांततमोविकारं॥ पूर्वाशया विशति सत्पथभाजि मैत्रे सत्वं निशांतस
ममस्य निशांतमासीत्॥ ३५॥ ग॰॥ सा तु रामा रामानुजमासाद्य चैवमब्रवोचत्॥ प॰॥ प्राचीनं व्यसनं सुरेंद्रतनयाज्जातं व
ने भ्राम्यतः सुग्रीवस्य निराकृतं खररिपोर्बाणेन सालच्छिदा॥ अद्यास्य व्यसनं तु पंचविशिखाद् आसीदुपेंद्रात्मजात्सौ
मित्रे तदपि प्रशांतमभवज्ज्याघोषमात्रेण ते॥ ३६॥ ग॰॥ तदनंतरं तारासांत्वनप्रशांतकोपेन सौमित्रिणा साकं तपनतन
यः सविनयमाश्रित्य दाशरथिं प्रांजलिर्व्यजिज्ञपत्॥ देव कपिबलमखिलमखिलकुलाचलनिलयमनिलतनयेनाहूतं
पुरुहूत इव पुलोमजापहारिणं बलाभिधानमनुल्हादं रावणं रणे हनिष्यतीति॥ ततः॥ प॰॥ ककुभि कुलिशपाणेर्मैथिलीं
तां विचेतुं विनतमथ दिशायां मारुतिं प्रेत भर्तुः॥ वरुणदिशि सुषेणं यक्षराजान्वितायां हरिरतिशतबलिं च प्राहिणोद्वानरेंद्रः॥

टिप्पणं॥ मदिरा पश्चिमदिशा च १॥ सूर्ये सुहृदि च २॥ मंदिरं ३॥ ॥३७॥

ग॰॥ तदनु दिनेषु केषुचिद्गतेषु॥ मासातिपातनासहो नियतमुदस्य दंडः सुग्रीवद्विषि सखरमितरेषु दिगंतरप्रेषितेषु नि
वृत्तेषु प्लवंगबलेषु पितृपतिहरिति प्रेषिता मारुतिजांबवदंगदनलनीलप्रभृतयो प्यलब्धसीतोपलब्धयस्तनयनाश
कुपितकण्वशापनिःशेषितचराचरमपरचितचारप्रांतारं कांतारं तीर्त्वा कांतारे कस्मिंश्चिदसुरमेकं निरीक्ष्य रक्षःप
तिरिति रिति बुध्या युद्धाय सन्नद्धा बभूवुः॥ प॰॥ निशिचरपतिरित्यवेक्ष्य रोषाद्दशनिनिपातनिभेन ताडनेन॥ अंसुर
हितमसुं प्रदत्यदेत्यं सुरहितमेव चकार वालिपुत्रः॥ ३८॥ ग॰॥ ततस्तारेयवचनात्ततद्दृतो विचिंत्य निकटगिरि
सानुशयाः सानुशयाः सलिलाशया जलचरपतंगपतनोत्पतनानुमीयमानपल्वलोपशल्यं किमपि बिलकुहरमवगा
ह्य कंचन कांचनमयं मयमायानिर्मितं पिहिताशानभोभागं विहिततपोभंगायै सुरांगनायै हेमायै दुहिणेन वितीर्णमि
रुसावर्णिदुहित्रा स्वयंप्रभया कृतावनं वनोद्देशं अविशन्॥ ततः कृतातिथ्यायाः स्वयंप्रभायाः प्रभावेन बिलादुत्ती

टिप्पणं॥ दक्षिणदिशि १॥ रावणः २॥ दैत्यहितं प्राणरहितंच ३॥ पश्चात्तापयुक्ताः ४॥

र्णानां समयातिपातेन पतिष्यति सुग्रीवदंड इति विक्रुतिमुपेत्य संगतमनो गदेनांगदेन पवनतनयवचनप्रत्ययप्रत्ययानीत प्रकृतिना सह प्रायोपवेशमुपेयुषां प्लवंगपुंगवानां परिदेवनकथाप्रसंगेन जटायुषो निधनं निशम्य विंध्यरंध्राद्विहितसंपातः संपातिर्नाम गृध्रराजस्तानेवमवादीत् ॥ प॰ ॥ केयूयमक्षयबलेष्वभिधाय पापं वत्से जटायुषि मम श्रवसी दहंतः ॥ तस्मात्पुराकिरणदाहितपक्षयुग्मं तिग्मांशुमुष्णवचसा शिशिरीकुरुध्वे ॥ ३९ ॥ ग॰ ॥ ततस्तैः प्रस्थापितवृत्तांतः संपातिः प्रोषितायुषे जटायुषे निवापांजलिं निर्वर्त्य पुरा कदाचिदामिषान्वेषणाय प्रेषितेन निजसुतेन सुपार्श्वनाम्ना समाम्नातं महेंद्रमहीध्ररंध्रनिर्गतदशवदननीयमानजानकीपरिदेवनं जानानः सूक्ष्मचक्षुः पुनरेवमवोचत् ॥ अलंकातर्येण लंकाभिधानां यातुधानराजधानीं अधिवसति सीना दशवदननीता तत्र गच्छंतु भवंतः ॥ प॰ ॥ किंच ॥ दिवाकरक्लोषभवां ममार्तिं निशाकरो नाम मुनिर्निरस्यन् ॥ जगाद वः कार्यमहार्यधैर्याः क्षणेन नांद्रक्ष्य

टिप्पणं ॥ कर्णौ १ ॥ दाहः २ ॥

थराजपत्नीं ॥ ४० ॥ इति ब्रुवाणं कृतसौहृदं तं संपातिमापृच्छ्य परावरज्ञं ॥ प्रवृद्धहर्षाः प्रथितप्रभावाः प्रतस्थिरे वानरयू
थनाथाः ॥ ४१ ॥ पर्याप्तसंभ्रमदमुपेयुषां कपीनां पांथानां दशमुखमार्गमार्गणाय ॥ पाथेयीकृतकपिराजशासनानां पाथोधि
र्नयनपथातिथिर्बभूव ॥ ४२ ॥ सुत्रामपुत्रारिशिलीमुखानां स्मृत्वा गणस्तत्र वलीमुखानां ॥ अपामपारस्य निधेश्च पश्य
न्नेवाङ्मुखो वक्तुमवाङ्मुखोऽभूत् ॥ ४३ ॥ ग० ॥ तदनु वानरसेनामेनामवार्यमाणकातर्यामित्थमकथयदंगदः ॥ प० ॥ कि
मिति भजथ मौनं वानरा मानहीनाः सगररचितकूपोल्लंघने कुंठिताशाः ॥ अकलशभवलेह्यं दुःशमं वाडवाग्नेरनवधि
मयशोऽब्धिं किं समर्थास्तरीतुं ॥ ४४ ॥ ग० ॥ ततः पारावारपारीणतायामात्मशक्तेरियत्तां प्रत्येकं कथयत्सु यूथपेषु निर्दि
श्यां जनेयं प्रभंजनसंभवं जांबवानभिहितवान् ॥ प० ॥ हे वीरा यूथनाथाः परिणतिपरुषः कोयमासीद्विषादः कस्माद
स्माकमेतज्जलनिधितरणे शक्तिरेतावतीति ॥ स्मृत्वा राज्ञः प्रतिज्ञामयमनिलसुतो लंघनायोन्मुखश्चेद्देदः प्रादुर्भवे

टिप्पणं ॥ अधोमुखः १ ॥ मौनमुखः । २ ॥ अमर्यादं ३ ॥ पारगामितायां ४ ॥

त्किं कथयत पयसामास्पदे गोष्पदे वा ॥ ४५ ॥ उदपतदुपभोक्तुं मंडलं चंडभानोः परिणतफलबुध्या बालभावेपि सोयं ॥ तदनु कुलिशपातक्षुण्णगंडाय तस्मै वरमदिशदमेयं वायुतृष्येवि धाता ॥ ४६ ॥ इत्थं जांबवता परावरविदा संधुक्षितप्राभवः कृत्वा वृद्धिमुपेयुषा स्ववपुषा त्रैविक्रमं प्रक्रमं ॥ आरुह्याद्रितटं यथोचितमसौ संमान्य सेनाधिपानासन्नानथ संननाह तरितुं वारांनिधिं मारुतिः ॥ ४७ ॥ ॥ इति श्रीविदर्भराजविरचिते चंपुरामायणे किष्किंधाकांडः समाप्तः ॥ ॥ अथ सुंदरकांडः ॥ ॥ प॰ ॥ ततो हनूमान्दशकंठनीतां सीतां विचेतुं पथि चारणानां ॥ महेंद्रशैलस्य खगेंद्रवेगः प्रस्थादुदस्थात्प्रथमानमानः ॥ १ ॥ ग॰ ॥ तदानीमुदन्वदुल्लंघनदृढतरनिहितचरणनिष्पीडनं सोढुमक्षमः क्ष्माभृदेष निःशेषनिःसरन्निर्झरौघतया निरंतरनिष्पतद्बाष्पपूर इव इतस्ततो विततजीमूतवृंदस्यंदतया परिप्लवशिथिलधम्मिल्ल इव संत्रस्यमानकुंजरयूथतया संजातभयथुरिव ससाध्वसतया धावमानहरिणीगणचरणकोटिपाटनोद्भू

टिप्पणं ॥ वर्धित १ ॥ शोधितुं २ ॥

तधातुधूलिपाटलितविकटकटकतयाक्षरितशोणितइवतत्क्षणप्रबुद्धकंठीरवकंठरवमुखरितकंदरतयाकृताक्रंद
इवपरिसरगह्वरनिबिरीसनिःसृतसैरीसृपतयानिर्गलितांत्रमालइवघूर्णमानतरुविटपकोटिताडितजलदद्वंद्वस्यंदि
तसीकरनिकरकोरकिताकारतयासमुपजातस्वेदइवस्फुटिततटोपलपतनदलितकीचकसुषिरसंमूर्छत्पवनफूत्कारपरि
पूरितगगनतयाप्रवर्द्धमानोर्ध्वश्वासइववनसामविषयंदौस्थ्यंअभजत॥ प०॥ कृत्वामारुतिलंघनोत्थितरयात्तत्रानुयात्रां
ततःपर्यायात्पततांमहेंद्रगहनक्षोणीरुहाणांततिः॥ मध्येवारिनिधिप्रकाशितशिखासेतोःकृतेभाविनःसूत्रन्यासनि
खातशंकुनिवहभ्रांतिंपयोधौदधौ॥ २॥ पक्षाभिघातरयरेचितवीचिमालःपाथोनिधेःपवननंदनविश्रमाय॥ उत्तुंगशृं
गकुलकीलितनाकलोकोमैनाकभूभृदुदजृंभतसंभ्रमेण॥ ३॥ तत्रयात्राप्रत्यूहःप्रत्युद्भूतइतिवक्षसातमधःपातयित्वा
प्रयातमेनंसांत्वयन्हिरण्यनाभोबभाषे॥ प०॥ सागरेणकृतज्ञेनतवाध्वश्रमशांतये॥ मारुतेप्रेरितोस्म्यत्रसौम्यविश्र-

टिप्पणं॥ सिंहः १॥ सर्पतया २॥ वेगात् ३॥ अरण्यं ४॥ हनूमान् ५॥ स्पर्शितः ६॥ विघ्नं ७॥

न्यगम्यतां॥ ४॥ तवपित्रापरित्रातः पूर्वंपर्वतभेदिनः॥ तस्मान्नास्तिविपक्षोत्रसपक्षइतिमांभज॥ ५॥ ग॰॥ एवंप्रार्थय मानमेनंसंमान्यकार्यगत्यागतेसतिहनूमति॥ प॰॥ अवलोक्यहिरण्यनाभमब्धौवेलमानंवलमानमाथिवज्रः॥ शत मन्युरपेतमन्युरासीत्पवमानात्मजसेवनादमुष्मिन्॥ ६॥ ग॰॥ तदनुयथापुरंलंकापुरंप्रतिधावतोहनूमतःसरणिमरुण स्तैरुणसारथेः पदवीं विंध्यइववदनंव्यादायहिरसनजननीरंहसासुरसा॥ प॰॥ उज्जृंभितस्यतरसासुरसांविजेतुंपादौ पयोधिकलितौपवमानसूनोः॥ तस्योत्तमांगमभवद्गगनस्रवंतीवीचीनिचयस्खलितसीकरमालभारि॥ ७॥ ततुंतनूकृत्य तदाहनूमान्कृत्वावगाहंजठरेतदीये॥ ततोविनिष्क्रम्यसर्वेक्रपाणे स्त्रिविक्रमस्यक्रममेवचक्रे॥ ८॥ भूयोपिसोयंरघुना थदूतश्छिन्च्छेदगच्छन्नरवरैःखैराग्रैः॥ नृसिंहरंहाःपथिसिंहिकांगंछायानिरोधादुपपन्नमन्युः॥ ९॥ ग॰॥ तदनुपाराव रस्यपारेलंबमानशिखरिणिलंबमानतनुर्लंकापुरद्वारमासाद्यनितांतचिंतातंतुसंतानितांतःकरणोभूत्॥ वानरसे

टिप्पणं॥ इंद्रात् १॥ चंचलं २॥ सूर्यस्य ३॥ विष्णोः ४॥ तीक्ष्णाग्रैः ५॥

नाकथंत्तरेदिममंतरायंवितन्वंतमुदन्वंतंतरतुनाम॥ कथमुपयातुयातुधानराजधानीमिमांसर्वथावितथमनोरथोदाशरथिर्मेघीह्लतार्णवलंघनः केवलमहमभवं॥ जीवतियानवेत्तिनजानामिजानकीमिति॥ ततस्तत्रभवतींसीतामवजिगमिषुरांजनेयः प्रच्छन्नसंचारहेतोरस्तमयंगभस्तिमालिनः केवलमभिललाष॥ तदनुशातमरवस्यनिक्षेपचापस्यप्रत्यासीदितिप्रयोजनवेलेतिप्रचेतसेकथयितुमिवप्रतीचींदिशंप्रविशतिभगवतिभास्वति॥ गगनतलमिदमपरमहीधरकटककांतारसमुद्भवदावपावकशिखाश्रेणिभिः किमिहशोणितं॥ अथवासमीपसमापततपतंगरश्मिदृढतरवेष्टननिष्ठ्यूतानलतटतपनोपलजालसमुल्लसज्ज्वालापटलैः किमापाटलं॥ आहोस्विदागतायमित्रायमेहार्घमर्घ्यंप्रदातुंप्रमुदितचेतसाप्रचेतसातूर्णमर्णवोद्गीर्यमाणमाणिक्यकिरणैः किमरुणितं॥ आहोस्वित्तारापथतरंगिणीसलिलमपियसितुमुज्जृंभितस्यचरमसागरौर्वाग्नेरर्चिः पुंजेनकिमिहरंजितमिति॥ सकलजनस्यसंदेहसंदोहंसंदधानेसंध्या

टिप्पणं॥ वरुणाय १॥ महामोल्यं २॥

रागेसमुदंचिते॥सरसीरुहश्रेणिषुपत्रपुटकपाटपिधानासुप्रतिकुमुदवनंमकरंदभिक्षामटत्सुमधुव्रतद्विजेषुविकच
कुवलयकलिकाकषणकषायेषुसायंवायुषुततइतःसंचरत्सुतिमिरेषुकालागरुधूमस्तोमश्यामलितेषुदिक्पालपुरगो
पुरव्यूहेषुप्रतिकमलाकरंप्रेंखितविश्लेषवेदनापूर्वरंगेरथांगविहंगानांदीनकेंकारेनक्षत्रमालालंकृतेगगनमतंग
जे॥प॰॥आविर्बभूवपूर्वाद्रेःशृंगेशृंगारजीवितं॥तमस्तमालकांतारकुठारःशशलांछनः॥१०॥तत्करास्तमसारुद्ध
रेजिरेगगनाजिरे॥शैवालचयसंच्छन्नाःसरसीवबिसांकुराः॥११॥तस्मिन्प्रदोषसमयेसहसाहनूमान्कीर्तिच्छटाजव
निकामपनीयशात्रोः॥आविर्बभूवसुमनःपरितोषणायलंकाप्रवेशनवनाटकसूत्रधारः॥१२॥ग॰॥तत्कालेलंकाधि
देवतामात्मनासहविग्रहंविधातुंगृहीतयुवतिविग्रहांमार्गस्यार्गलीभूयभूयसातर्जयंतींनिर्जित्यतयावानररचिताव
ज्ञोपज्ञंनिजविलयंसरसिजासनशासनादावेदयंत्याविहितानुमतिर्मारुतिर्लंकायामविकलमेवमैथिलींविचिन्वन्नैर्ऋ

टिप्पणं॥ भ्रमराः १॥ कमलं २॥ किरणाः ३॥ पंडिताःदेवताश्च ४॥

तच्चक्रवर्तिनः प्रासादमाससाद ॥ तत्र ॥ प० ॥ एषा राक्षससार्वभौमनगरी रक्षश्च भूरक्षिता तस्येदं सदनं विमानशिखरैर्बिभ्राणमभ्रावलिं ॥ एतत्पुष्पकमाहृतं धनपतेरित्यादरान्मारुतेस्तत्रादर्शयदिंदुदीपकिरणप्रद्योतिताशा निशा ॥ १३ ॥ अपि च ॥ आदित्यः कृतकृत्य एष भविता सीतापतेरीदृशं साहाय्यं विरचय्य कीर्तिममितामादित्सुना सूनुना ॥ इत्यालोच्य तदा किल स्वयमपि ख्यातिं गृहीतुं परां लंकायां रघुनाथदूतसरणौ चंद्रेण दीपायितं ॥ १४ ॥ ग० ॥ एवमेव पर्यटन्नस्तन्नसुंदरीसौंदर्यसुखां निद्रयाप्यतिशय्य शय्यागृहे कृतसंवेशां वेशयुवतीपरिवृतमवरोधवधूजनमप्यनिरोधेन निरीक्ष्य तत्र वितथमनोरथो मारुतिर्विरचितबहुविधचिंताप्रकारः प्रासादादवप्लुतः सन्नशोकवनिकायामपि मैथिलीमन्वेष्टुमभीष्टदेवताप्रणाममतनुत ॥ प० ॥ असौ जनकनंदिनीं ततइतो विचिन्वन्क्षणादशोकवनिकामगादपगतान्यमार्गभ्रमः ॥ परामभिलषन्गतिं शमधनो यथा निर्ममस्त्रयीमखिलकिल्बिषप्रशमनैकदिव्यौषधिं ॥ १५ ॥ ग० ॥ ततस्तस्यां नागेताले

टिप्पणं ॥ वेदत्रयी १ ॥ उंडीनवृक्ष २ ॥ ताड ३ ॥

हिंताल[1]तमाल[2]हूतमाल[3]सरल[4]बकुलतिलकामलक[5]कुटजलिकुच[6]केतककंकोललवंग[7]विकंकत[8]कदंबकोदुंबरकपि
त्थाश्वत्थकुरबक[9]मरुबक[10]कुंदतिंदुक[11]चंदनस्यंदन[12]चंपक[13]चांपेय[14]पनस[15]वेतसपलाशपाटला[16]प्रियाल[17]प्रायैरनेकैरनोकह
निवहैः परिवृतां परिभ्रमन्नभ्रंकषविटपनिबिडितगगनप्रपंचां कांचनकांचनमयीं शिंशुपा[18]मारुरोह॥ प०॥ तत्र तस
त्वसंछन्नगात्रः पुत्रो नभस्वतः[1]॥ न्यग्रोधदलसंलीनजनार्दनदशां दधौ॥ १६॥ मल्लीं चूतवनादिव स्नुहिवने म्लेंच्छेन संस्था
पितां मालां दैवकुला[2]दिवामिषधिया क्षिप्तां श्मशाने भुना॥ देवीमाश्रमतस्तथा स्वभवनं नक्तंचरेणच्छलादानीतामपनी
तवेपरन्वनामालोकयन्मारुतिः॥ १७॥ ग०॥ पुनरयमेवं चिंतां ततान॥ प०॥ एनां विना रघुपतिः परिगृह्य धैर्यंसभाणए
ववसतीति विचित्रमेतत्॥ ज्योत्स्नां विनापि निवसेन्निशि शीतभानुश्छायां विनापि निवसेद्दिवसेश्वरोपि॥ १८॥ ग०॥ ए
वंचिंतयता हनूमतानीते निशीथसमये निशीथिनीनाथेन्वरमगिरिशिखरोपकंठसेवासमुत्कंठमाने दशकंठस्तुनि

टिप्पणं॥ वायोः १॥ देवालयात् २॥ पहिलीवळ॥ सिंदी १॥ सुरमाड २॥ बाहवा ३॥ देवदारू ४ तिवरा ५॥ [illegible]लारानफनस ६॥ गमुळी ७॥ विकळ ८
उलसेवती ९॥ सळा १०॥ टेंबुरणी ११॥ तिवस १२॥ सोनचाफा १३॥ नागेश्वर॥ १४ मोठाफनस १५॥ पाडळ १६॥ चारवृक्षप्र० १७ सीताफळ १८॥

द्राशेषेण स्मरप्रहारेण च कलुषीकृताक्षः सरसहरिचंदनवर्णयाजानकीदर्शनेच्छया च प्रकटितरागः वैकक्षमालयामु
कुटतटरत्नप्रभयाव्यतिरस्कृतनक्षत्रमालः शनैः शनैरविशद्शोकवनिकां॥ प०॥ रजनिचरमभागेवारसीमंतिनीनां
करतलकलिताभिर्दीपिकामार्जनीभिः॥ दिशिदिशिपरिमृष्टं यत्तमस्तत्समस्तं हृदयमवजगाहे केवलं रावणस्य॥१९॥
सोयं मदांधहृदयो रघुवीरपत्नीं सीमंतिनीतिहतनीतिरवापपापः॥ आमूलपल्लवितकोमलसल्लकीतिवेतानपावकशि
खामिववारणेंद्रः॥ २०॥ ग०॥ एतद्दर्शनवेपमानतनुलतामैथिली॥ कापुरुषविषयपरुषवचनपारंपर्येण विदीर्यमाणहृद
या हृदयदयितशौर्यप्रत्ययादमुमेव तृणाय मत्वा तृणमंतरतः कृत्वा स्थितापर्यभाषत॥ अयि भोः सकलसमाचारप्र
तिष्ठानिष्ठः परमेष्ठीननुकुलगुरुर्भवतः परकलत्रगात्रनेत्रप्रसक्तिरप्यनिरपत्रपांजनयति गोत्रजातानां॥ भूयोपि पंचवटी
परिसरमुसुंजनं प्रभंजन इवानुकूलः कूलोपकंठपरिभ्रष्टं नावमिव यदिनयेथाः॥ तवापि दयते नियतं मदीयोजीवितेशः सा

टिप्पणं॥ निरस्तं १॥ प्रविवेश २॥ नारी ३॥ स्ववंशजातानां ४॥ प्राणेशः ५॥

क्षार्ज्जीर्धितेशोपित्वयिदयालुर्भवेद्दाशरथेरजेयस्य मैत्र्याः पात्रमपि भवितासि॥ किंतु॥ खरप्रमुखनिशाचरबलमथ
नसमयसुचिरलग्नसांद्रवसापंकपंकिलमुखमार्यपुत्रस्य शिलीमुखं भवंतमंतरेण कः श्रद्दधीत निजहृदयगलितरुधि
रधारया प्रक्षालयितुं॥ अथवा जनस्थानसमरादारभ्य समराभावाविय्दहहतृषितानां सौमित्रिपत्त्रिचातकानां त्वदंगगलि
तशोणितांबुपारणांतवापनयघनतृष्णेत्कः समर्थो निवारयितुं॥ प॰॥ अथ निशिचरनाथं पंचबाणावभिन्नं नहि ज
नकसुतायाः प्रापदे कापि बाणी॥ जनमुपनतमृत्युं पंचवक्त्राहिदष्टं विशति हृतविषाधेरौषधैः किंनु शक्तिः॥ २१॥ ग॰॥
एवं जनकदुहितुरवधीरणाफणितिमाकर्ण्य कोपपराङ्मुखो दशमुखस्तामभितो निवसंतीरारक्षिका राक्षसीराहूय भव
त्यश्चतुर्भिरप्युपायैरेनां ममावश्यं वश्यां कुरुध्वमियमननुकूला चेदिमां हताशां प्रातराशाय महानसं नयतेत्यादिश्यनि
शांते प्रत्यासन्ने निशांतमेव विवेश॥ तदनु भीषणवीक्षणक्षणदाचरीणां वाक्यदोषोन्मेषणान्मुकुलितहृदयपुंडरीकापुंड

टिप्पणं॥ यमः १॥ अवर्षणं २॥

रीकयूथपरिवृतसारंगांगनाभंगीमंगीकुर्वाणागीर्वाणतरुणीवशापबलाद्वसुंधरांप्रपन्नाजनकनंदिनीचिंतामेवमकरोत्॥ प०॥
नूनंविदितवृत्तांतेजटायुषिगतायुषि॥ मामिहावस्थितामार्यपुत्रःकिन्नावबुध्यते॥२२॥आहोस्विद्भव्यादमाययाविपर्यस्तप्रकृ-
तेःकाकुत्स्थस्यकिमुनास्थासंजायते॥ अथवा॥ प०॥ नकेवलंमामहरद्दुरात्माकृपांचरामस्यनिसर्गसिद्धां॥ इदंनचेत्संश्रितव
त्सलःकिंभवेत्सतूष्णींजगदेकवीरः॥२३॥ग०॥ इत्थंविलप्यरघुपुंगवंचिंतयंतीकृच्छ्रान्मूर्छामगमत्॥ प०॥ निशाचरीस्तांनिरव
द्यशीलांनिर्भर्त्सयंतीर्निभृतंविवार्य॥ अस्वप्नलोकोत्सवमात्मदृष्टंदुःस्वप्नमेकंत्रिजटाजगाद॥२४॥ किंच॥ उपघ्नवृक्षस्यपरोक्ष
भावादुपेत्यपृथ्वींसुचिरंलुठंत्याः॥ नक्तंचरस्त्रीमुखकर्शितायाःसीतालतायास्त्रिजटाजटाभूत्॥२५॥ग०॥ तदनंतरमात्मत्यागा
यस्पृहयंत्यांमैथिल्यांमारुतिरियमनुपेक्षणीयातपस्विनीनीतिममुंचतीति॥ चिंतांपरिगृह्यनेदीयानस्याबभूव॥ ततः॥प०॥ अंतिकबाढ्योनेदसाधौ
देव्यादशाननवचोमयवज्रदीर्णकर्णांतरव्रणविरोपणभेषजानि॥ विस्रंभणार्थमयमन्वयसंगतानिरामाभिकीर्तनमधूनिशा

टिप्पणं॥ देवांगना १॥ आश्रयतरोः २॥ अंतिकस्थः ३॥ विश्वासार्थं ४॥ मूलमभूत् ७ निःपाप ४

नैर्न्यषिंचत्॥२६॥ग०॥तदनंतरं समंतात्प्रसारितनयना जनकतनया तस्यां शाखायां शाखामृगमुद्वीक्ष्य चकितहृदया दुःस्व
प्नबुध्या सलक्ष्मणाय भर्त्रे भद्रमाशंसमाना जनमिमं दुरापस्वापं स्वप्नः कथमाप्नुयादिति विचिंतयमाना मायासमायातनैर्ऋतप
निबुध्या तस्मान्मारुतपुत्रात्तत्रास॥सोपि समवतीर्य वदनवैचित्र्याज्जनकपुत्रीं प्रत्यापयन्नांजनेयः कृतांजलिर्व्यजिज्ञपत्॥
प०॥ कल्याणि तीव्रवेगेन त्वद्वियोगेन ताम्यतः॥राघवेंद्रस्य दूतं मामन्यथा मास्म मन्यथाः॥२७॥त्वया सह प्रस्थितवित्तवृत्ति
र्विभावरी कोकसमानधर्मा॥ वचोब्रवीन्मैथिलि मन्मुखेन त्वां कौशलं कोसलराजपुत्रः॥२८॥अपिच॥ शिरसा तव सौमित्रिर
करोदभिवादनं॥अपृच्छत्सोपि भद्रं त्वामधिपश्च वनौकसां॥२९॥ग०॥एवमभिहितया तया संभृतविस्रंभया भयानपेतया
तावदनुयुक्तः पवनतनयो वालिमरणकारणं सुग्रीवस्य सख्यमाख्याय मोन्वेतसचेतइव संततसन्निहितरामनामकमंगु-
लीयकमस्यै प्रायच्छत्॥ प०॥ सौख्यावहस्य पवनात्मजदीयमानरामांगुलीयकविलोकनवासरस्य॥ सत्यं कलां शततमी

टिप्पणं॥ वाल्मीकि चित्तमिव १॥

मपिनैवभेजेपाणिग्रहोत्सवदिनेजनकात्मजायाः॥ ३०॥ ग०॥ ततस्तंजानकीनिःसीमहर्षाबभाषे॥ महाभागसर्वथास्यदुरात्म
नः मत्यासीदतिमृत्युस्तथैवमनलाभिधानयाबिभीषणदुहित्रामत्थ्यंचस्वमात्राप्रेषितयाभाषितं॥ अयमप्यनार्यशीलस्तुरी
यमुपायमंतरेणममार्यपुत्रस्यनसमर्पयिष्यति॥ नियतमहमपिमासादूर्ध्वंनशक्नुयांप्राणान्धारयितुमिति॥ एतदाकर्ण्यमा
रुतिर्महानुभावेमाभैषीः॥ भवतींवहन्नेवतूर्णमुल्लंघितसागरोराघवचरणसरसिजमुपयास्यामीत्येवंमांसमर्थंसमर्थ
येथाइत्यभिधाय॥ प०॥ महामहीध्रसध्रीचींसोयंवृद्धिमुपेयिवान्॥ ययानूनमपांराशिःकुल्यातुल्यांविशेदृशां॥ ३१॥
अथतमुवाचसाजनकसुतामुदिताकिमुत्वदुष्करंत्वरणलंघितवारिधेः॥ अपितुमयासहप्लवंगपुंगवयास्यसिनिर्दय
मनपायिनीपरिणमेद्भवतःपदवी॥ ३२॥ अन्यच्च॥ पातिव्रत्यहुताशनेनयदितंकुर्यामहंभस्मसात्सत्यंदाशरथेःशरस्य-
नभवेद्दाल्भोंचितापारणा॥ किंचैतस्ययशोनिशापतिरपिप्रम्लानकांतिर्भवेत्तस्माच्छ्वासितरावणेरघुपतौयात्राममश्रेय

टिप्पणं॥ ॥ महापर्वतसदृशीं १॥

से॥ ३३॥ ग॰॥ एवंव्याहृतः पवनसुतः सीतांपुनरभाषत॥ प॰॥ मायामृगेणतवमैथिलिवंचितायाः शाखामृगेणपुनरागति
रित्ययुक्तं॥ एषाकथापिभुवनेविदितायदिस्यात्कानामरामधनुषः प्रथिताप्रशस्तिः॥ ३४॥ किंबहुना॥ ग॰॥ इत्येतदेवंचिंति
तंयदहंराघवगृहिण्यास्तदेवनिश्चितं॥ यस्तद्दशमीदशस्यसमाचारस्यतदेवप्रकाशितंयदनुगुणंरावणापराधप्रतिक्रियाया
स्तदेवानुमोदितंयदनुकूलंकुलवधूशीलस्यतदेवकथितंयदुचितंक्षत्रियाणीवाणीक्रमस्येतिबहुशः प्रशस्यसर्वथारामल
क्ष्मणोलंकामिमांप्राप्ताविति जानकिंजानीहिजननिमममनुजानीहिप्रस्थातुं॥ किंच॥ काकुत्स्थेनविदितपूर्वंकिमप्यभि-
ज्ञानंदीयतामिति॥ सातुदीर्घंनिश्वस्यनिश्चित्यपुराखलुचित्रकूटतटवनेतरुणतरतरुरमणीयतयामंदीकृतनंदनवैभ
वेरघुनंदनोपधानीकृतोत्संगाया ममपयोधरपरिसरेखरतरनखराग्रविरचितविदारणंधाराधरनामानंकाकंरघुपति
रवालोकयत्॥ ३०॥ कुशारूपकुंशेशयासनास्त्रंविजहौवासविवायसेसवीरः॥ अथतत्कृपयारक्षिताक्षिमात्रश्चिरजीवीसद

टिप्पणं॥ संस्तुत्य १॥ स्तननिकटे २॥ ब्रह्मास्त्रं ३॥

धोयथार्थसंज्ञां॥ ३५॥ ग०॥ सैषापरिचितकथास्मरणाद्द्विगुणदुर्दशाकेशपिनद्धमपरमिदमभिज्ञानमुन्मुच्य॥ प०॥ चूडा[1]
मणिंकपिवरस्यददौदशास्यसंत्रासपूजितमहाग्निशिखंकृशांगी॥ आदायतंप्रणतिपूर्वमसौप्रतस्थेमाणिक्यगर्भवदनोर
गतुल्यबाहुः॥ ३६॥ ग०॥ ततःकृतकृत्यएवविनिर्गत्यनिजागमनंनिशाचरपतेःप्रकटयितुमशोकवनिकांप्रबभंज प्रभंजना[2]
त्मजः॥ प०॥ स्वकृत्यैः शौ[3]रवानामवनतिमतीवप्रकटयन्मार्गेणभ्राम्यन्परिकलितभंगः सुमनसां[4]॥ द्विजानां[5]संत्रासंश्रुति
मधुरवाचांविरचयन्नयंलंकोद्यानेदशवदनलीलामतनुत॥ २७॥ ग०॥ तदनुसरभससमारक्षिकरक्षोगणनिवेदितप्रमदव
नकदनकुपितदशवदनप्रेषितान्पितृपतिकिंकरभयंकरान्प्रहस्तपुत्रेणजंबूमालिनासहनिहत्यचैत्यतोरणमुपागत
वतिहनूमतिपुनरपिनिशमितामितनिशिचरगणमारणोरावणः सचिवान्पंचपंचाननपराक्रमान्प्रहस्तप्रमुखान्बलीमुखं
जीवग्राहंगृण्हीध्वमितिप्राहिणोत्॥ तत्रतानपिपंचतांनीत्वातोरणपरिघेणमुहुर्मुहुर्दाशरथिदासोहमित्यात्मानमुद्घोषयंतंह

टिप्पणं॥ शिरोरत्नं १॥ वायुपुत्रः २॥ वेदशाखानांतरुस्कंधानांच ३॥ देवानांपुष्पाणांच ४॥ महीसुराणांपक्षिणांच ५॥

नूमंतंनियंतुंनिखिलरक्षसामध्यक्षमक्षकुमारमाक्षिपत्॥प०॥वक्षःसंघट्टचूर्णीकृतकनकमहाभित्तिनैत्योत्थधूल्यानक्षत्राणा
मकालेसरणिमरुणयन्वीरलक्ष्म्यासमेतः॥रक्षःशूराख्यशारान्क्षितितलफलकेक्षेपणीयान्हनूमानक्षक्रीडांविधातुंदशमुख
नगरीखलूरेलखेरेसौ॥३८॥ग०॥तत्क्षणंक्षणदाचराणामनिमिषितामेवनिष्पादिततद्दंगनिष्पेषकृत्यश्चैत्यप्रासादमुत्पाटित
स्तंभजातंजातवेदसादग्ध्वाभूयोप्युपाश्रिततोरणःसमीरणसुतोबभूव॥एनमपिवृत्तांतंश्रुत्वाकुपितस्यपिशिताशनपतेर्युग
पदेवनिपेतुःपुत्रेसुत्रामजितिसमितिहेतोर्विंशतिदृष्टयः॥प०॥अनिमिषभुवनेवाव्योम्नियाभूतलेवासमरमुपगतंत्वांवी
क्षितुंकःसमर्थः॥इतिस्तुतिवचनेनश्लाघयन्मेघनादंप्लवगमिहनयतिप्राहिणोद्राक्षसेंद्रः॥३९॥नेतुंशोकरसंनिशाचर
पतेर्हर्तुंचमूरक्षसांतस्यांतःपुरयोषितांरचयितुंमानंविनारोदनं॥सूर्याचंद्रमसोःप्रवेशविकलांलंकापुरीमग्निनाशुद्धिंक
र्तुममुष्यवासवजिताजातोरणस्तोरणे॥४०॥संग्रामदुर्दिनेतस्मिन्जहर्षशरवर्षिणि॥बर्हीवमेघनादेनमेघनादेनमारुतिः॥४१॥

टिप्पणं॥ रावणसुतः पाशांश्च १॥ रावणस्य २॥ इंद्रजिति॥३॥ स्तुतिवाक्येन ४॥ इंद्रजिताघनशब्देनच ५॥

ग०॥ तदनुयातुधानप्रबलप्रधाननिधनक्रुद्धो विविधायुधवैतथ्यं विमृश्य विजयश्रीसगंधं गंधवाहनंदनं चतुराननास्त्रेण
बबंध दशकंधरात्मजः॥ तेन दिव्यास्त्रेण विवशशरीरमेनं पिशिताशनाः शोणवल्कलैर्बबंधुः॥ प०॥ समारुतेर्नैर्ऋतपाशजन्मा बंधो भवद्बंधनमोक्षहेतुः॥ पुरा पुलस्त्यान्वयपांसुलेन बंदीकृतानां सुरसुंदरीणां॥ ४२॥ ग०॥ तदनंतरमितरहननासहतया निजाद्भुतस्य दिव्यास्त्रस्य प्रभावं विभावयन्विभावरीचरपतितनूजः पवनतनयं निजपितृसमीपमुपनिनाय॥ सोयं दर्दशकंधरमंधकारिलीलाद्रितोलनपरीक्षितबाहुशौर्यं॥ बंदीकृतेंद्रपुरवारवधूकराग्रव्याधूतचामरमरुच्चलितोत्तरीयं॥
॥ ४३॥ आपाटलाधरपुटांतविराजमानदंष्ट्रामहः प्रसरशारशरीरकांतिं॥ संध्यांबुदांतरितमध्यसुधामयूखरेखाभिराममिव वासवनीलशैलं॥ ४४॥ संग्रामकेलिपरिघट्टनमग्नभग्नदिग्दंतिदंतकृतमुद्रभुजांतरालं॥ छायात्मना प्रतितरंगविराजमानसीतांशुमंडलसनाथमिवांबुराशिं॥ ४५॥ निश्रेयसः प्रणयिनीं पदवीं निरोद्धुं त्रैलोक्यपापपरिपाकमिवात्तरूपं॥ सूर्येंदुपा

टिप्पणं॥ शिवः १॥ तेजः २॥ प्रतिबिंबेन ३॥

वकमहांसितपोबलेनजित्वायथेष्टमभिषिक्तमिवांधकारं ॥४६॥ सोपिप्लवंगममवेक्ष्यसमीरपुत्रंवित्रीयमाणहृदयःपिशित
शनेंद्रः॥ कैलासशैलचलनागसिशापदायीनंदीश्वरःस्वयमुपागतइत्यमंस्त ॥४७॥ ग०॥ ततःप्रहस्तेनविहितविविधानुयोगः
प्रत्यभाषतरावणंमारुतिः॥ अयमहमङ्गामधिपतिकुलतिलकस्यसत्यसंधस्यपितृनियोगसमुपनतवनवासनिरतस्यभूर्प
कारातिबाधितभूर्पणखाप्राप्तवैरूप्यस्यकुप्यत्खरप्रमुखनिशिचरबलपल्वालजालकल्पानलकल्पशिलीमुखस्यकपटहरिणह
ननसमयसमुषितदारान्वेषणसंजातसुग्रीवसख्यसमुत्खातवालिकंटकस्यदुर्वृत्तक्षत्रवंशवनपवनसारथेस्तपोनिधेर्जामद-
ग्न्यस्यभुजबलावलेपलोपहेतोःश्रीमतोदाशरथेर्दूतोहंसीतामार्गमार्गणायदिशिदिशितपनतनयप्रेषितानांवानराणांएकतमः
समुद्रलंघनजंघालस्तवनगरप्रमदावनसीम्निरघुवरधर्मदारान्प्रणम्यप्रतिष्ठासुर्मदीयमागमनंप्रकाशयितुंमथिताशोकवनि
कानोकहनिवहस्त्वद्दर्शनकुतूहलेनकेवलमनुभूतनैर्ऋतलूतातंतुसन्नहनस्तवपरिसरमुपासरं॥ प०॥आनाकलोकपरिकीर्तित

टिप्पणं॥ इच्छा १॥ वेगवान् २॥ ऊर्णनाभतंतुबंधनं ३

सच्चरित्रमवोपरुद्ध्य रघुवंशपतेः कलत्रं॥ वैतानवेदिजनितं पवमानबंधुं वस्त्रेण बद्धमविनीतकथंयतेथाः॥ ४७॥ प्रेंरवंती
पिशिताशयारणमुखे सौमित्रिपत्रिक्षतं त्वद्भ्रात्रं परितः पतत्रिपरिषच्छत्रच्छविं मागमत्॥ शाकपौलस्त्यपुलस्त्यवंशाविल
येसंभाविते खल्कते कांतानां नयनांतवांत सलिलं माभून्निवापोदकं॥ ४८॥ बद्धादरोपि परदारपरगृहेत्वमिक्ष्वाकुनायक
कलत्रमनार्यमागाः॥ वाताशनोहमिति किं विनतासुतस्य श्वासानिलाय भुजगः स्पृहयालुतालुः॥ ४९॥ बाहुचंदननिषं
गकोटरान्निर्गतो रघुपतेः शरोरगः॥ प्राणवायुमविनीत तावकं कालयापनमपास्य पास्यति॥५०॥ किं बहुना॥ मायामृगे
समरनाटकसूत्रधारे शाखामृगे च भवतः प्रतिकूलवाते॥ दृष्टेद्य मस्य रघुनायकसायकस्य मुक्ताप्रणाम कवचं कवचं कि
मन्यत्॥ ५१॥ एतन्निशम्य कुपितः पिशिताशनेंद्रः प्राणानमुष्य हरतेति भटानवादीत्॥ आजन्मसिद्धमतिरत्र बिभीषण
स्तं दूतो न वध्य इति शास्त्रगिरा रुरोध॥५२॥ग०॥ रावणोपि बिभीषणभाषणमंगीकृत्य प्लवंगमानामंगेषु लांगूलमेव वरं॥
टिप्पणं॥ अग्निं १॥ गलितं २॥

तदेवकार्पासवाससा संवीतंवीति होत्रसाल्लस्यचत्वरेचत्वरे दोषानुद्घोष्यसप्रहारंनगरंपरितःसंचारयतेतिराक्षसा नादि
देश॥ तेषुतथाकुर्वाणेषु॥ प॰॥ निर्णयाविषयमस्यवालतः कर्णिकारनिकुरंबकर्बुरः॥ निर्निमेषगणभाग्यसंचयादु
न्निमेषभगवानुषर्बुधः॥ ५३॥ ग॰॥ एतद्वृत्तांतमारक्षिकराक्षसीगणेनगर्वोदीर्णवर्णितमाकर्ण्यदूयमान मानसाजान
कीकृताशनमुपस्थायहनूमतः शीतोभवेतिप्रांजलिःप्रार्थितं॥ प॰॥ घोरस्यराघवकलत्रतपोमयाग्नेर्माभूवमिंधनम
हंक्षणमित्यवेत्य॥ शैत्यंवितत्यदहनः पवमानसूनोर्वालाग्रसीम्निमणिदीपइवावतस्थे॥ ५४॥ ग॰॥ तदनुपवनतनयोपि
पुरमिदंनखलुसुव्यक्तंनक्तमालोकयं॥ तस्मादनलसाक्षिकमेवपुरमखिलमालोकयामीतियामिनीचरगणंपरिघ्वि
ततोरणपरिघेनजघान॥ प॰॥ सीताभिधानकमलांप्रभवेप्रदातुंलंकार्णवंक्षुभितसैन्यतरंगभीमं॥ वेधाममंथकिल
रज्जुभुजंगराजभोगाष्टतेनपवनात्मजमंदरेण॥ ५५॥ ग॰॥ अथलंकायांदह्यमानायां॥ प॰॥ रक्षस्त्रीवदनारविंदरज

टिप्पणं॥ देवसमूहः १॥ अग्निः २॥

नीं विश्वंभराबर्हिणीवर्षारंभदशां दशाननयशःकादंबकादंबिनीं ॥ वैधव्योचितवेषनिश्चितमनोलंकावधूटीजटां वैदे
ह्या स्त्रिजटासमां समकिरद्धूम्यां हनूमान्दिवि ॥ ५६ ॥ अपिच ॥ एतद्विक्रमवीक्षणेनजनितामानंदबाष्पोद्गतिं रक्षोनाथभ-
यात्सिधातुमनसां विद्याधराणां तदा ॥ व्याजव्यात्ततयेयथापरिणमेद्धूम्यातथाजृंभते स्वर्लोकेपिकलिंदशैलतनयाकल्लोल
शंकावहा ॥ ५७ ॥ आदौ नीलांशुकश्रीस्तदनुमरकताबद्धनीवीविभूतिः कस्तूरीपंकभंगी क्षणमपि विकचेंदीवरस्रक्स[1]
पत्नी ॥ पश्चात्स्निग्धांजनाभा जघनकुचतटीकंठनेत्रेषु जाता दिक्कांतानां तदानीं दशमुखनगरीदाहसंभूतधूम्या ॥ ५८ ॥ हाता
त हा जननि हा सुत हा सहाय हा पुत्रि हा प्रियसखि क्व नु हा हतोस्मि ॥ इत्यादिपौरपरिदेवनभारवाग्भिरापूरि रावणपुरी शिखि
नापरीता ॥ ५९ ॥ येवृंदारकसुंदरीजनमुखेनीराजनं निर्मितं निर्मेघे गगनेपि येर्विरचिता सौदामिनीसंहतिः ॥ तेद्विन्ना-
ण्यपि षासराणि नगता निर्वाणमौर्वानलज्वालाडंबरमंबुधौ विदधिरे या लानलोद्यत्कणाः ॥ ६० ॥ आदीप्यमानपवनात्म

टिप्पणं ॥ सदृशी १ ॥ धूमसमूहः २ ॥

जवालसंगा [illegible]दंगारशेषविभवामवलोक्यलंकां॥ व्योम्निस्थितानिशिचराःस्वगृहाणिनूनंनिर्वापयंतइवनेत्रभवैःप-
योभिः॥ ६१॥ चक्रेशक्रजिदाज्ञयारणमुखेयत्कर्मरक्षोगणस्तत्कर्तुंक्षणदाचरक्षितिभुजायुक्तोप्ययुक्तोभवत्॥ सप्तार्चि
श्च हनूमतापरिचितोलंकामधाक्षीद्यथातत्पित्रामरुतायुतोपिनतथादाहक्रियायांपटुः॥ ६२॥ तस्मिन्हनूमदरणिप्रभवे
कृताशेशुद्धिंविधायपतिमेवसमेतुमैच्छत्॥ लंकेश्वरेणरणकेलिकुतूहलेनबाहोर्बलादपहृतासुरराजलक्ष्मीः॥ ६३॥वा
चामिदानींकिमुविस्तरेणलंकापुरींरावणबाहुगुप्तां॥ काकुत्स्थदूतोयमुपेत्यचक्रेकृतांतदूतस्यसुखप्रवेशां॥ ६४॥ पौल
स्त्यपातकिसमागमजायमानमेनःपुनानइववानरयायजूकः॥ निर्वर्तितोक्षविजयोनिजवालवह्नौकृत्वापलाशसमि
धःसुगतिर्बभूव॥ ६५॥ लंकादाहेप्यनार्त्तांरघुपतिदयितांचारणोक्त्याविदित्वासानंदस्तांप्रणम्यप्रतिगमनविधौप्राप्यत
स्यानियोगं॥आरुह्यारिष्टशैलंनिधिमपिपयसांस्वैरमुत्तीर्यवेगाच्चक्रेगत्वामहेंद्रंप्लवगबलपतीन्पूर्णकामान्हनूमान्॥

टिप्पणं॥ रावणपुत्रः इंद्रियंत्र १॥ राक्षसः किंशुकवृक्षश्च २॥

॥ ६६ ॥ ग० ॥ अथयथार्हसैन्याधिपान्संमान्यमारुतिरेतैरनुयुक्तः स्ववृत्तांतमखिलमाख्यातवान् ॥ तदनुपवनतनयव
चनमुदितावानरवरूथिनीयूथनाथानुयातातद्दर्शनजनितमानंदंदाशरथौसुग्रीवेचसंविभज्येवविवक्षितुं॥ अहमह
मिकयाधावंतीमध्येसरणिदधिमुखकृतावनंमधुवनंहनूमदनुमत्याभिभूयमधुपानसुखमनुबभूव॥ प०॥ अथाब्रवी
द्गिरिवरतुंगमंगदंकृतांजलिर्दधिमुखएषरोषवान्॥ वलीमुखान्मधुभजनेशिलीमुखान्भवानिमान्झटितिनिवारयेदि-
ति॥ ६७॥ ग०॥ अयमप्येनमवोचत्॥ प०॥ दशमुखपुरमध्येवीक्षितामैथिलीतिश्रवणमधुवितीर्णयेनवीरेणमत्वं॥
दधिमुखयदिसोयंभाषतेकोनिरुध्यान्मधुपिबतुयथेष्टंवाहिनीवानराणां॥ ६८॥ ग०॥ तदनुभयविवशासमुनतदधिमुखव
चनविदितमधुवनकदनपरिभणितजनकदुहितृदर्शनजनितप्रमदभरभरितस्स्वंपनतनयस्तनुविकृतिमतनुत॥ तदभिमु
खागमननिमित्तसंपत्तिं॥ प०॥ आरुह्याद्रिमथावरुह्यविपिनान्यास्वाद्यनानाफलान्यास्फोत्यप्लुतमारचय्यवदनैरापाद्यवा-

टिप्पणं॥ सुग्रीवः १ ॥

घक्रमान्॥ आलिंग्यद्रुममक्रमंमदवशादाधूयपुच्छच्छटामारादाविरभूदहंप्रथमिकापीनाकपीनांचमूः॥ ६९॥ निद्राक्ष
यादरुणितेनसमीरपुत्रः सौमित्रिनेत्रयुगलेननिपीयमानः॥ चूडामणिंकरतलेकलयन्ववंदेपादारविंदयुगलंभरताग्र
जस्य॥ ७०॥ अक्लेशसंभूनगतागताभ्यांनिस्तीर्णविस्तीर्णमहार्णवोपि॥ आनंदसिंधोष्टतनासमक्षमक्षस्यहंतानित
रांममज्ज॥ ७१॥ आनीतचूडामणिसंनिधानादाविःप्रमोदेनरघूद्वहेन॥ तत्रानुयुक्तः पवमानजन्माविज्ञापयामास
कृतप्रणामः॥ ७२॥ लंकापुरोपवनसीमनिराजपुत्रीमालोकयंनिशिचरीगणबाध्यमानां॥ केनापिपातकवशेनसुप
र्णलोकेबंदीकृतामिवभुजंगमराजकन्यां॥ ७३॥ देव्यास्त्वदीयान्वयकीर्तनेनत्वन्मुद्रयाचव्यपनीयशोकं॥ वार्तामभिज्ञा
नमयीमयाचंप्रस्थातुकामः परिपूर्णकामः॥ ७४॥ ब्रह्मास्त्रवित्रस्तजयंतवृत्तांकथामभिज्ञाप्यवनेप्रवृत्तां॥ चिरंरुदंत्या
जनकेंद्रपुत्र्याचूडामणिः प्रेषितएषतुभ्यं॥ ७५॥ किंबहुना॥ देवतस्याः प्रतिष्ठासूनसूनाशोकपालितान्॥ मुद्रयित्वाप्रपन्नो
हंत्वदभिज्ञानमुद्रया॥ ७६॥ ॥ इतिश्रीविदर्भराजविरचितेचंपूरामायणेश्रीमत्सुंदरकांडःसमाप्तः॥ ७ ॥

अथयुद्धकांडः॥ ॥प०॥ दृष्टेयत्रयदृच्छयापिवचसांदेवीपुरोवर्ततेसारस्यंमहदभ्युदेतिसदसिप्रागल्भ्यमुज्जृंभते॥जा
यंतेसकलाःकला अपिनृणांजागर्तिकीर्तिर्नवाचेतःस्निग्धतुतत्रदेशिकपदांभोजेचभोजेमम॥१॥भोजेनतेनरचितामपि
पूरयिष्यन्नल्पीयसापिवचसाकृतिमस्युदारां॥नव्रीडितोहमधुनानवरत्नहारसंगेनकिंनहृदिधार्यतएवतंतुः॥२॥मु
द्रामुद्रितजीवितांजनकजांमोहाकुलंराघवंचूडारत्नविलोकनेनमुचिरंनिध्यायनिध्यायन्च॥प्रारेभेहृदिलक्ष्मणः
कलयितुंपौलस्त्यविध्वंसनंधीरःपूरयितुंकथांचविमलामेकेनकोडेनसः॥३॥आनंदमंथरमनंतरमांजनेयादाक
र्ण्यवृत्तिमनघांजनकात्मजायाः॥दृष्टिर्दशाननरुषापरुषायमाणाबाणासनोपरिदधेप्रभुणारघूणां॥४॥ग०॥अथ
सुग्रीवोपिदशग्रीवकुपितराघवावलोकनद्विगुणीकृतरणोत्साहःसाहायकमनुपालंभन्नेंधुमिवसिंधुमवधार्यधार्य
माणधैर्यावगाढमतिः॥अधिरूढत्रिकूटशिखरांलंकामधिगंतुमंगदकुमुदनलनीलप्रमुखमपिवलीमुखानीकंसम

टिप्पणं॥ सौमित्रिः तन्नामाकविश्च १॥ बाणेन ग्रंथेनच २॥ कूपं ३॥

नीनयत्॥ प॰॥ वारिदादपि च राम नामतः पूरिता पुनरपांगधारया॥ तत्क्षणं प्रति चचाल दक्षिणं वाहिनी शमरिवलापि-
वाहिनी॥ ५॥ ग॰॥ ततः क्षणेन समन्तक्षचलितऋक्षसमुदाये कुमुदामोदकारिणि शरभाधिकप्रसादशीले नीलेंदीवरानं
दिनि दशाननदिशाक्रमणव्यग्रतेजसि समारूढतारानंदनलक्ष्मणानुगते सरभसमुदयसानुमंतमिव हनूमंतमधिरोह
ति निशाचरतिमिरहरणनिस्तंद्रे रामचंद्रे समंततः कंदलितबकुलहरिजालकोलाहलभरितहरिदंतरो निरंतरास्कंदित
निकटकांतारावलिर्वलीमुखबलमहांबुधिः ससंभ्रममुदजृंभत॥ प॰॥ उच्चासकासरमुदंचितपंचशृंगं वित्रस्तहस्ति
विशारारुचमूरुयूथं॥ आलोललोचनतरंगकुरंगशावमासीदसीमविपिनं कपिनर्मघोषैः॥ ६॥ सैन्यैस्ततो रघुपतिः
सरितां निवेशं वेशंतयन्विरलयन्विपिनांतराणि॥ आरुद्धसत्त्वमपि शैलमसद्यवातं मंदानिलैकनिलयं मलयं जगाम
॥ ७॥ ग॰॥ गत्वा च तमद्रिं सौमित्रिमिदमवादीत्॥ प॰॥ अमीतटसमीपनिर्झरतरंगरिंखत्पयोजडीकृतपटीरभूरुहकु

टिप्पणं॥ रावणं समुद्रं च १॥ सेना नदी च २॥ अंगदः बुधश्च ३॥

टीरसंसारिणः॥ मनो विधुरयंति मे मलयमेखलामेदुरादुरासदवनप्रियप्रियतमारुतामारुताः॥ ८॥ इत्यालपन्करुणमेष निरुद्ध
वेलं शैलं महेंद्रमधिगम्य महीमहेंद्रः॥ आवर्तमुद्रितमिवान्वयभूपतीनामक्षय्यकीर्तिनिधिमंबुनिधिं ददर्श॥ ९॥ ग०॥ दृ
ष्ट्वा च तमद्भुताकृष्टमना रामस्तदिदमाचष्ट॥ प०॥ द्रष्टुं नालमगाधतां फणिपतिः सीमांतरेखा दिशो द्वीपाः सैकतमंडलानि
तदयं दूरे गिरां वारिधिः॥ येषामेष सुखादखानिनखरैर्येनाथवा पूरितस्तेषां नः कुलभूभुजामविहतस्थैम्ने महिम्ने नमः॥
॥ १०॥ ग०॥ अथ हरींद्रोऽपि महेंद्रोपांतकांतारशोभिनि लोभनीयमलयबालानिलेवेलावनप्रदेशे॥ दाशरथेर्निदेशेन
निवेशयामास बलमखिलं॥ प०॥ सरसपटीरकुंजवनसंजवनाभिपतन्मृगमदगंधगंधवहमेदुरितेजलधेः॥ तटनि
कटे दरस्फुटिततालरसालफलैरुदितमदाविन्वेरुरुदरंभरयोहरयः॥ ११॥ ग०॥ अनंतरमपरमिव चलितं महांभोधिमंभो
धिरोधसि कृतसंवेशं रोदसीलंघनविश्रृंखललाघवं राघवानीकमनीकोन्मुखं चारमुखादवधार्य धार्यमाणहृदयांतकः पं
टिप्पणं॥ स्थिरत्वाय १ मंदानिले २॥ चंदनं ३॥ सभा ४॥

कलीनचरण इवैरावणो रावणो विधेयं परमजानञ्जानकीमप्यविमोक्तुकामः कामपरतंत्रितो मंत्रिभिः समंसमाजमाज
गाम॥ प०॥ रहस्तदानीं रजनीचरेंद्रः प्रहस्तपूर्वानिदमाबभाषे॥ इदंतु मे वांछितमीक्षितं वो वदंतु यद्वैरिजयोचितं नः॥
॥१२॥ ग०॥ अमीच पुनराशयज्ञा विज्ञापयामासुः॥ देवजीवस्तु भवदाज्ञापरेष्वनुचरेषु परमास्मासु कस्मादयमवापो दुरवा
पो रुभुजपंजरानीतां सीतां जातु न जहातु नाथ इत्यभिदधानेषु प्रधानेषु रंभोपहित हठात्कार संभवमंभोजसंभवमंभो
जसंभवशापमंतरायमावेदयंतं दुर्नयं तमग्रजन्मानं संमानयन्विनयविज्ञानभूषणो विभीषणः सरोषमिदमवादीत्॥
प०॥ अहह विधिनियोगादघनक्तंचरेंद्र त्वमसि परकलत्रे दुर्निवारानुरागः॥ अरुणदवशिखायामामिषग्रासमोहादवि
रतह्लतजिह्वाचापलः केसरीव॥ १३॥ आकर्ण्य किन्नरमुखादनघेस्ववंशे काकुत्स्थदारहरणोपनतं कलंकं॥ हाहेतिमी
लितदृशः करयोर्युगं तदष्टो श्रुतीरपिदधातु कथं विधातुः॥ १४॥ पश्येदानीमुदधिपरिखापालिता कुत्र लंका या चातीतः

टिप्पणं॥ कर्णान् १ ॥

कनुवनचरादागतोदुर्विपाकः॥ कर्तुंनक्तंचरपरिभवंकापिमायैवशंके जातासीता धरणितनयाजानकीमैथिलीति॥१५॥
किंबहुना॥ नगणयसियदित्वंवानरंवानरंवाननुपरिपरिचितवीर्यौजिष्णुभूकार्तवीर्यौ॥ नकलयसियदित्वंनंदिशा
पंचधातुर्वरमपिनरवर्जंदुर्जयोदैवयोगः॥१६॥ ग०॥ इत्यादिनीतिसहितंहितमभिहितवंतंनिजमनुजमवज्ञायज्ञा
तिरयंअरातिपक्षःशिक्षणीयइतिशंसंतंनृशंसंतमरुंतुदरोषणभाषणोविभीषणोविहायविहायसिसमुत्पतंतमनूत्प
तद्भिश्चतुर्भिरमात्यैःसममतीत्यवारिधिंदूरतएवसविलर्कमुद्ग्रीवान्सुग्रीवादीनंतरिक्षगतएवमाचचक्षे॥ प०॥ पौल-
स्त्यमग्रजनुषंपरुषंचरंतंसंत्यज्यबांधवजनंचविभीषणोहं॥ रामंविराममिहविद्विषतामवापमापन्नदैन्यहरणंशरणं
ममेति॥१७॥ ग०॥ अनंतरमतिकरुणंसमीरयंतंसमीरभुवाचसमस्त्यभिज्ञंविज्ञापितंनिशाचरपतेरनुजंनिशाम्यतदात
दागमनायकिंकारणमितिशंकापरवशेनिवेदयतिहरीशेदाशरथिरपिदयमानस्मयमानोमधुरमिदमभाषत॥ प०॥
टिप्पणं॥ भाषमाणं १॥ मर्मस्पृग् २॥ अग्रजन्मानं ३॥

अग्रयागतोयमपयातिचेन्मुधारघवोभवंतिलघवोनकिंसखे॥ अनुजोयमस्तुतनुजोथवारिपोःकरुणापदंहिशरणा-
गतोजनः॥१८॥ ग॰॥ तदनुत्द्दयविदाहनूमतासरयमानीतोविनीतोयमौशरपतिरवंदततदाशरथिं॥ प॰॥ रामस्त-
माह्वविनतंरजनीचरेंद्रंदत्तंतदघभवतेदशकंठराज्यं॥ अस्मिन्नुदाहरणमग्रजराज्यभोक्तासानुप्लवःप्लवगमंडलसा-
र्वभौमः॥१९॥ श्रेयःपदास्पदमुदेतिविधेःप्रसादात्प्रायस्तदद्यफलितंहिबिभीषणेयत्॥ रेखातपत्रसहितंपदमस्यगृ-
ह्णन्नेकातपत्रसहितंपदमेषभेजे॥ २०॥ ग॰॥ असौपुनरग्रतएवभरताग्रजापांगसुधातरंगाभिषिक्तोपिपुनरुक्तरा-
ज्याभिषेकःसकलविस्रंभभाजनतयासुग्रीवइवापरोदशग्रीवबलमखिलमावेद्यसद्यएवलंकापुरसमास्कंदनाय
सेनासमुत्तरणहेतुंसेतुंविधातुमाराधयतुवारान्निधिमितिसविनयमेनंविज्ञापितवान्॥ प॰॥ अथवारांनिधिंध्याय-
न्नंभोधित्त्दृदयेशयः॥ ध्यानशेदर्भशयनंवेदीमिवकृताशनः॥ २१॥ ग॰॥ तत्रकुशास्तरणमध्यमध्यासीनेनिध्यानवतिदे-

टिप्पणं॥ बिभीषणः १ ॥ सुग्रीवः २ ॥

वेरामचंद्रे॥ नियंत्रितइवनियतिवशान्निशात्रयमपिप्रसादंनाससादयोंदसांपतिः॥ प०॥ व्यापारयन्नथविलोचनकोणमब्धौकोपारुणंकुटिलितभ्रुकुटीविटंकः॥आदातुमैहत धनुःप्रथमोरघूणांपैतामहप्रथमसर्गसमापनाय॥ २२॥ ग०॥-
आदायचदुरापंचापमारोपयतविशिखमनलशिखं॥ प०॥ नाथोविमोक्तुमुदयुंक्तनयावदेवपाथोनिधेरुपरिपावकरूपमस्त्रं॥ संतापिनीनयनवारिमिषेणताम्यन्मंदाकिनीकिमुतवारुणमाललंबे॥ २३॥ रुषाविशिखमुच्छिखंजहतिराघवेलाघवाद्जायतरुजायतश्वसितनक्रचक्राकुलं॥ रसातलवलत्तिमिस्तिमितकुंभिकुंभीनसप्रविष्टगिरिकंदरंतरलमंतरं वारिधेः॥ २४॥ ग०॥ तत्क्षणंजलनिधिःक्षंताचयुगांतानलस्यसहनोपिगरलदाहनोष्मणांसोढापिवाडवगाढावलेपस्यतितिक्षुरपिभार्गवतीक्ष्णपरशोःपरिशोषयंतमंतरंगमंगारमयंशरमयंनिमिषमपिनविषेहे॥ प०॥ शरणमथशरव्यथानिदानंजलनिधिरेषजगामराममेव॥ परुषकुलिशपातमेवकिंवाजलधरमर्थयतेनजी

टिप्पणं॥ दैवं १॥ समुद्रः २॥

वलोकः॥ २५॥ ग॰॥ आगत्यचानुपदमुपदीकृतनूतनरत्नराशिर्वारिराशिर्विनीतवेषोविशेषोपजातनतिभिर्नुतिभिरभ्य
नंदयद्रघुनंदनं॥ तदनुतदनुसंहितममोघमस्त्रंवैधात्रंकुत्रचनवनसीमनिविनिपात्यसाध्यतेमयासलिलविष्टंभःसं
प्रत्येवनलोविदधातुसेतुमित्यभिदधानोमंदमंदमंतरधात्॥ प॰॥ आदिष्टारघुपुंगवेनहरयोप्यष्टासुदिक्षुक्षणात्रैलो
क्यांचितमूलमध्यशिखरान्धात्रीधरानाहरन्॥ यैःक्षिप्तैःसलिलेनलेनजलधिर्यातोपिजंबालतांनिर्गच्छत्यचि
रायनिर्झरपयःपूरैःपुपूरेपुनः॥ २६॥ अथजलधौनिपेतुरतिदूरनिपातदलज्जलचरदत्तजीवनवगंधमहौषधयः॥
स्फुटितधराविराजदहिपुंगवफूत्करणक्षुभितगुहागृहासिकमहाहरयोगिरयः॥ २७॥ अलक्षितमहीधरग्रहणमस्फुट
क्षेपणंविचित्रघटनंततोविरचितोनलेनामुना॥ अबोधिहरियूथपैरधिपयोधिसेतुर्महाम्भुवोभुजइवाभवन्निज
तनूभुवोलंभयन्॥ २८॥ ग॰॥ अनंतरंअंतर्मुखाइवबलीमुखाःप्रबोधेनेवसेतुपथेनसंसारमिवदुस्तरंतेरणिपतिम

टिप्पणं॥ स्तुतिभिः १॥ ब्रह्मास्त्रं २॥ पर्वतान् ३॥ ज्ञानिनः ४॥ समुद्रं ५॥

तीत्यसद्य एवप्रकाशं गिरीशं सुवेलमवलोकयंतो मुकुरविंदं तमहांतमानंदं ॥ प० ॥ वलयिततटदेशैर्वाहिनीनां निवेशै

रविरलवनरेखामध्यमध्यास्तरामः ॥ कपिकलकलशीर्यत्कंदरामंदिरांतश्चलितकुपितसिंहत्रस्तवेलं सुवेलं ॥ २९ ॥ ग० ॥

तदनुदशमुखः शुकमुखादतिलंघितजलधिमधिगतसुवेलं[1] रामं रामं निशाम्य सम्यगवगमनाय रघुनायकबलमनु

प्रहितयोर्विदितवेषविभीषणयोर्बिभीषणावेदितकुपितकपिलोकनियंत्रणनितांतखिन्नयोर्विपन्नाधारदाशरथि

विमोचितप्राणयोः शुकसारणयोर्वचसा प्रासादाग्रमासाद्य प्रत्येकशास्तदावेद्यमानानप्रवर्धमानसमरसन्नाहमतीन्प्ल

वंगमसेनाधिपतीनतिधीरतयासावधीरणमवेक्षमाणः प्रतिपक्षबलप्रशंसिनौ तावुभावप्युपेक्षमाणः शार्दूलप्रभृ

तिभिः प्रणयिभिरप्यवगताशेषवृत्तांतः सांतस्तापः सुचिरमनुचिंतयन्नंतिकासीनमतिविनयप्रह्वं विद्युज्जिह्वमुपह्व[2]

रे किमप्यभिधाय सौधादवततार ॥ तत्क्षणं क्षणदाचरोपि निदेशान्निशाचरपतेर्दाशरथिशिरः सशरं धनुरपि निर्मा

टिप्पणं उपवनं १ ॥ एकांते २ ॥

यमायानुभावादाहृत्यानीतमित्यभिधाय निधाय च पुरो निदाघातिशायसंतापिनीं वासंतीमिव वैद्युतानलश्छिरका
लविक्लवामाकुलीचकार मैथिलीं॥ ततः प्रबुद्धा च मुग्धा पुनस्तथ्यमिति विचार्य तदनार्यं पर्यदेवयत पतिदेवता॥ प०॥
रक्षोवरोधवसतिं रजनीचरीणां रक्षोपरोधमपि रावणभर्त्सनं च॥ सर्वंसहे यदुपलंभधिया स एवं सर्वंसहे भवति जीवति
हंत सीता॥ ३०॥ ग०॥ एवमत्याहितमत्या समेतामेतामासाद्य सखि वैदेहि वैदेहि वचः कथमियं तव दीना दृशा दशाननहृ
तामायाहि मायाहि मनसि वैधुर्यं निखिलजगतीधुर्यभुजबलाभिरामे रामे किमिदमनार्यमविचार्यमित्यभिदधाना नवी
नासारनिष्यंदिनी कादंबिनीव घर्मोद्वेगिनीं केकिनीं सरमा चिरमाश्वासयामास॥ प०॥ अथ निगदितनीतिं मुंच मुंचेति सी
तामविरतरणकंडूभीषणो रावणोयं॥ मनसि न बहु मेने मंत्रिणं माल्यवंतं दिवि परममरीणां मंडलं मौ[2]ल्यवंतं॥ ३१॥ ग०॥
अथ रामोपि कामोचितवेषविभीषणामात्यविदितरक्षोनगररक्षोदंतो दृढदंतोपजातसमरसंरंभविधिरंबुधिमेखला

टिप्पणं॥ समूहं १॥ मालायुक्तं २॥

लंकारमणेर्लंकायाः प्राग्द्वारस्थाय प्रहस्ताय पर्यस्ताहितप्राणानिलं नीलं दक्षिणद्वाररक्षिणोर्महोदरमहापार्श्वयोर्विश्वत्र
यविजयधौरेयं तौरेयं प्रत्यग्द्वारपालनाधिकृते पाकशासनजितेपराक्रममिव तैनूमंतं हनूमंतमंतर्व्यूहविहितरक्षायवि
रूपाक्षाय रक्षः प्लवंगमऋक्षाधिपती न्यतिनिधीन्विनिधाय विधाय च सज्जं धनुरनुजेन समं समीकाभिमुखेन दशमुखेन
गुप्तमुत्तरं गोपुरमुत्तरं गोबलैरुपरुरोध ॥ प० ॥ अत्याकुलां हरिबलैरवलोक्य लंकां दत्तार्गलेषु दशकंधरकिंकरेषु ॥ आर
क्षकैस्त्वरितमंतकराजधान्यामुद्घाटिताभिरुदभाविकवाटिकाभिः ॥ ३२ ॥ग० ॥ तत्क्षणं च लक्ष्मणाग्रजः सुग्रीवेण सह सु
वेलाचलकूटमधिरूढस्त्रिकूटावनीधरचूडामणिं सिंहलद्वीपकमलकर्णिकां निर्माणकौशलीं विश्वकर्मणो निवेशादरीं नि
शाचरहरीणां अनारतबंदीकृतामरपुरंध्रीबाष्पनदीमातृकोपवनसीमां तांसीमांतरात् निरंतरसेवासमागतदिक्पाल
मा तंगमदांबुपंकिलबाह्यांगणोत्संगां लंकामवलोकमानस्तत्रैकत्र समुन्नतं सौधमधिवसंतं संततमसमिव संदेहव

टिप्पणं॥ शत्रुः १॥ अंगदं २॥ मूर्तिमंतं ३॥ शृंगं ४॥

द्दमंतिकन्वरोदस्त्तविमलमुक्तातपत्रमिषात्सतारकेणविभावरीपतिनेवसेव्यमानंवैमानिकवधूविधूयमानचामरद्वंद्व
शोभितमभितश्चलितमंदाकिनीपरीवाहमिवांजनाचलमखिलजगद्विजयवर्णावलीमतिनिर्णायकैरनेकविधसमीकाभिघात
मग्नभग्नैरावणविषाणकुलिशाग्रैरुद्गीर्णविशालवक्षस्स्थलफलकमानीलतमालसच्छायमाच्छादिताभिनवलोहितपटमा
पाटलसंध्यारागबंधुरंकंधरमिवददर्शदशकंधरं॥प॰॥कोपादुत्पतितस्तदाहरिपतिःकोटीरमुत्पाटितंचक्रेनैर्ऋतनाय
कस्यसुहृद्दीनश्चकेनचवैभीषणं॥युध्वाचप्रथमावमानकुपितेनैतेनबुध्वाततोमायामस्यजगामकोमलगुणग्रामंसरामंपुनः
॥३३॥ग॰॥ततस्तत्साहसोपलंभविधिनादाशरथिनासमामंत्र्यमंत्रिभिःसममादिष्टःसाधिष्टभुजशौर्यशालीवालिनं
दनःसलीलंसालमुल्लंघयन्लंकांप्रविश्यनृशंसमितिशशंसनिशिचरपतिं॥प॰॥सोहंप्लवंगमपतेस्तनयस्त्वदीयनिम्बा
सरोधिनिजवालधिमंडलस्य॥कालस्यदूषणखरत्रिशिरोमुखानांपौलस्त्यमांरघुपतेरवधेहिदूतं॥३४॥रक्षःपतेरघुप

टिप्पणं॥ जलधरं १॥ किरीटं २॥

लेर्नयनं तृतीयमास्कंदनीयमितिह्यामनुषेकलत्रं ॥ अंभोजमित्यलिकसंभवमक्षिशंभोर्मंदाकिनीमधुकरस्तु यथामदांधः
॥ ३५ ॥ किंच ॥ एकं हैहयसंभवात्परिभवान्म्लानं द्वितीयं पुनर्दैत्येंद्राविनयात्तृतीयमपि मे ताताहिताद्दैक्कृतात् ॥ इत्थं त्वच्चरि
तैः पितामहमुखान्येकं विनैवाभवन्तच्चैकं न विधेहि दाशरथये देयात्त्वयामैथिली ॥ ३६ ॥ कौबेरस्य तु पुष्पकस्य हरणं कै
लासविक्षेपणं दिक्पालाक्रमणं च जल्पसि मुहुः किं वा यशस्तावता ॥ वेषं संयमिनो विधाय विजने देवीं वने जानकीं वेगा
दाहरता त्वया घरचितं वीरव्रतस्योचितं ॥ ३७ ॥ किं बहुना ॥ पूजोपहाररचनाय पुरा पुरारेश्छिन्नेषु मूर्द्धसु नवस्व वशेषि
तं यत् ॥ देवस्तदद्य कुतुकी दशमं शिरस्ते रामो बलिं रचयितुं रणदेवतायै ॥ ३८ ॥ ग० ॥ एवमरुंतुदभाषणरोषणेन रावणे
न गृह्यतामयं निगृह्यतामिति सरयमादिष्टानालंबितभुजप्रकोष्ठानाशरांश्चतुरश्चतुरो यं भुजंगानिव विहंगाधिपो
गृहीत्वा भुवि निपात्य चैतान्पादाहतेन प्रासादशृंगमपि भिंदन्नविंदन्नात्मनः प्रतिरथं पंक्तिरथभुवो विवेशानिवेशं ॥

टिप्पणं ॥ ललाटं १ ॥ सन्यासिनः २ ॥ रामस्य ३ ॥

प॰॥ रघुतनयस्ततो विदितरावणदुर्विनयः कुपितमना मनागिव दधे कुटिलां भ्रुकुटीं ॥ अथ परिवव्रुराशरपुरं हरयः सर
यं युगविगमे यथा युगपदंबुधिमौर्वशिखाः ॥ ३१ ॥ ततो मदपरिप्लववल्गवीरसंरंभणक्षणक्षुभितकौणपप्रकरपाणि
कोणाहतः ॥ रवैरधिकभैरवैरुपरुरोधरोदोंतरं तरंगितघनाघनस्तनितबंधुभिर्दुंदुभिः ॥ ५४ ॥ ग॰ ॥ तेन च समंततः कंद
लयता दलयतेव जगंति दुंदुभिनिर्घोषेण रोषेण च प्रेर्यमाणाः केसरिण इव गिरिकंदरान्मंदिरान्निर्गत्य र्गत्यंतराय
संधायकान्यपत्यानीवानिमित्तान्यनवलोकमाना विमानाधिगतविबुधसीमंतिनीभिः सह विंजिहीर्षयेव प्रस्थान
समयपरिम्लानमुखीः सुमुखीरप्यगणयंतो निरंतरज्वलितकोपानलनयनकोणारुणालातशतनिपातवित्रासचलित
निजवारणनिवारणावेशापरवशाः दिशामुखमुखरितशिवारवाम्रेडितव्याकुलीकृतकुलमहीध्रा गृध्रायतपक्षविक्षेपप्लु
तपताकानिकायपुनरुक्तसमुत्तुंगशतांगसंघातपरिगतानितांतनिशितप्लुतांतदंष्ट्राखरतरनखरपट्टीसप्रासपरश्वग

टिप्पणं॥ विघ्नः १ ॥ विहर्तुमिच्छयेव २ ॥ परतंत्राः ३ ॥ कुलाचलाः ४ ॥

दामुसलशक्तितोमरमुद्गलपरिघपट्टुघाणकृपाणधारिणोदारुणाजगरसंतानसंवीताइवविंध्यकूटाव्यूढातिकरालकाला
यसकं[1]कटाविकल्पाइवकल्पांबुदानांव्यक्तयइवकालरात्रेर्वि[2]वर्त्ताइवकलिकालस्यचभयंकराःसमरांगणमवतार
यंतःसमीरयंतोवीरवादानादायचशरासनमासारैरिवगिरिमंभोधरादूरापातिभिःशिलीमुखैर्वलीमुखबलमखिलम
क्षोभयंतरक्षोभटाः॥ प०॥ ततोधुतनखायुधस्तरुपरित्रुटतोमरःशिलानिहतमुद्गरःशिखरिभिन्नमत्तद्विपः॥ खप-
क्षविजयैषिभिर्दिविसुरासुरैराकुलैरलक्षिहरिरक्षसामतिभयंकरःसंगरः॥ ५१॥ ग०॥ क्रमेणचकुपितकपिवीरवि
दूषितनैर्ऋतभुजप्रतापानलइवास्तंभजतिभगवतिभानुमतिमथितायुधयातुधानगलनालप्रणालपरिवाहिलोहि
तनदीपूरइवविदूरमंतरितहरिदाभोगेसंध्यारागेविक्रांतहरिनखाक्रांतदंतावलविपुलकुंभस्थलमुक्तमुक्ताकला
पइववियतिविजृंभमाणेतारागणेरणरभसचलितरथगजतुरगपदातिपादाहतविश्वंभरांतरालजैनुषिरजसीवभु

टिप्पणं॥ कवचाः १॥ परिणामाः २॥ जन्मनि ३॥

वनभास्कंदति तमसि तामसीचरे षिवसशोकेषु चक्रवाकेषु दाशरथिबल इव प्रमदाकरे कुमुदाकरे ॥५१॥ आसारधारां
प्रकिरन्शराणामाश्वासयन्मानसमाशराणां ॥ वीरो हरीन्संयति मे घनादो विव्याध हंसानिव मेघनादः ॥ ५२॥ रणेतद
नुदारुणे रभसमंगदो रावणेर्द्रुमेण महता हतश्लथधुरीणयानव्रजं ॥ शितेन शतकोटिना शिखरिकूटमिंद्रोयथा ममा
थचरथं मनोरथमपि क्षणाद्रक्षसां ॥ ४३॥ वियत्तले तदनु विलीयमायया सलक्ष्ययन्रघुतनयं सलक्ष्मणं ॥ अजिह्म
गानधिगतजिह्मगाकृती नमर्षतः समितिववर्ष रावणिः ॥ ४४॥ लक्ष्मणानुगतं राम चं इंराकुक्षयंकराः ॥ ववंधुर्दारु
णतमा बंधच्छिदममीशराः ॥ ४५॥ यावद्याति पुरं पुरंदरजयी यावद्दशास्याज्ञया सीता पुष्पकवासिनी रघुसुतौ दृष्ट्वासु
रः शोचति ॥ तावत्ते गलिताः सुपर्णगरुतां वातेन वा ताशनादीप्तोर्चं इ दिवाकरा विवतमो मुक्तौ ततो राघवौ ॥ ४६॥ दुर्वा
रे तदनु द्वयोश्च बलयोरुज्जृंभमाणे रणे धूम्राक्षं भुजतः प्रकंपनमथ द्वे धाव्यधान्मारुतिः ॥ तारेयोपि च वज्रदंष्ट्रमचला

टिप्पणं॥ इंद्रजित् १॥ सर्पः २॥ इंद्रजित् ३॥

न्नीलः प्रहस्तं बलात्तत्सर्वं दशकंधरायत्त चकितैरुत्कंचनत्कंचरैः॥ ४७॥ ग०॥ अथतदानीमनीकिनीनाथवधकोपोदयाद्दा यो धनोत्कंठो दशकंठः सकलजगद्दंडभरितजयानकभयानकनिनदबधिरिताशेषशेषाहिलोचनो रोचिष्णुर्जिष्णुको दंडधरः सलिलधर इव सुमेरुशृंगं समुत्तुंगं रथमलंकुर्वन्सर्वतश्चलितसकलचतुरंगसंगत. यालंकयेव स्वयं अनु गम्यमानः क्रमादतिक्रम्य पुरतोरणं पुरतोरणचलितमालोकयत निखिलमपि वलीमुखबलं॥ प०॥ जेतारमाहवमु खे दशदिक्पतीनां दृष्ट्वा पुरो दशमुखं रघुनंदनस्य॥ श्लाघावशेन नचचाल शिरः परं तत्सव्येतरं भुजशिरोपि समीक्ष्य लक्ष्यं॥ ४८॥ अथ मदगर्जितैरधिकतर्जितदिक्करिभिर्दशवदनस्तदा दशदिगंतरमंतरयन्॥ समरमुखे सखेलपदचं- क्रमतः विदधे हरिकुलमाकुलं जलधिमादिवराह इव॥ ४९॥ ग०॥ अनंतरमनीकास्कंदकंदलितामर्षवर्षतं गिरीन्हरी णामधिपतिमतिनिष्ठुरेण मुष्टिना गाढमभिनिघ्नंतं हनूमंतममंदलाघवाक्रांतध्वजकिरीटांचलं नीलमपि निखिलज

टिप्पणं॥ सेनापतिः १॥ दुंदुभिः २॥ इंद्रः ३॥

गर्ज्जितामहताबलेनवांतूलइवतूलजालंकपिकुलमपसारयन्नविरतशरासारवर्षिणमभ्यमित्रीणंसौमित्रिमपिश-
क्त्यागाढमुरसिविव्याधक्रव्यादाधिपतिः॥प०॥अवकीर्यदाशरथिरश्रुझरैरनुजंपुलस्त्यतनुजंचशरैः॥युगपद्बंधा
त्करुणवीररसौयुधिशोकहर्षशबलंत्वबलं॥५०॥आधूयमोहमहितोन्मथनाययावत्सौमित्रिरेषसमुदंचतितावदे
व॥पौलस्त्यमेषपरिभूयपरंतदीयान्प्राणान्मुमोचदययानमुमोचबाणान्॥५१॥प्राप्यतत्प्रथमंयुद्धेपराजयमुदेज
यन्॥दशाननःपुरींप्रापदिनदीपदशाननः॥५२॥प्राबोधयत्तदनुपंक्तिमुखःशयालुंकालंविनापिचकथंचनकुंभक
र्णं॥आदेशतःसचविभोरपुनःप्रबोधसंवेशधामसमरांगणमाजगाम॥५३॥ग०॥आगतंचतमंजनाचलनिकाशमा
काशतलभ्रमितत्रिशूलंशूलधरमिवजगत्क्षयोद्युक्तंनक्तंचरमवलोक्यशाम्यत्सहजभुजतेजोविशेषमशेषासुदिक्षु
धावमानंपवमानचलितजलदपारिप्लवत्प्लवगबलमंगदोधीरमवादीत्॥प०॥कपयःकैकसेयानांकापिसेयंविभीषि

टिप्पणं॥ वातसमूहः १ ॥ कार्पासः २ ॥ रिपुसंमुखीनं ३ ॥ अभिदृष्य ४ ॥ चकार ५ ॥

का॥ अभूद्दभूतपूर्ववः प्राकृतंभयवैकृतं॥ ५४॥ ग०॥ अथहरयोभिसरयमनुनयसंगतमंगदवचनमवधारयंतोधारयंतःस

मरसभाहान्दि ग्भागादिवप्रतिनिवृत्ताः प्रमत्ताशयमिवैरावणंरावणानुजं विंध्याचलमिवयुगांतानिलाः समंतादाहतैर्गिरिभि

स्तरुभिरप्यवाकिरन्॥ प०॥ क्षिप्ताः संयतिपुष्पिताः क्षितिरुहास्तैरक्षसोवक्षसिप्रक्षिप्तेपटवासपांसवइवालीयंतचूर्णीकृ

ताः॥ मुक्तायेधरणीधरामुकुरमीतद्बाहुसंघट्टनात्प्रत्याहत्यपरंप्रहर्तुरभवन्खेदायभेदायच॥ ५५॥ ज्वलदनलं त्रिशूलमुपरि

प्रमयन्नमयन्नयमवनीमनीकमदखेलनदुर्ललितः॥ सपदिवभंजनीलमृषभंशरभंचबलादहरतगंधमादनं मेरुंधगवाक्ष

मपि॥ ५६॥ ग०॥ ततश्चसहजबलचापलाधिगतलाघवंराघवंशरणमभ्युवानंराघवानीकमाश्वासयन्विश्वाधिकविपुल

भुजवीर्यैर्विकीर्यद्विषतिसर्वतः पर्वतान्विधायविचित्रमतिचिरंयुद्धंनक्तंचरविमुक्तधात्रीधरवशात्कुलिशदारितइवकु

लभूधरोधरायामचेतनइवपपातहरिकुलपतिः॥ प०॥ परिगृह्यतंझटितिबाहुपंजरेचलितेपुरंतदनुरावणानुजे॥ अवि

टिप्पणं॥ रुद्धवान् १ ॥ प्रार्प्सं २ ॥

नीतवालिकृतमघनः प्रभोरयशः प्रमृष्टमिति हृष्टमाशरैः[1]॥५७॥ ग०॥ तत्र विचित्रकुसुमपरिमलशिशिरोपचारसचेत
नोद्ग्रीवसुग्रीववनरवमुखाकलितशूर्पणखामुखानुकारः सचमत्कारमुत्फुल्लाक्षिगतमेनमनालक्ष्यवैलक्ष्यतः प्रतिनिवृत्तोवि
वृत्तोरुतारकेक्षणः क्षणदाचरः[2] प्रतिक्षणमतिक्षीबतया[3] प्रतिपक्षबलमिव स्वपक्षबलमपि भक्षयन्नलक्षयन्सौमित्रिम
द्रिशिखरान्विमुंचन्नेवायमंजसा राममाजगाम॥ प०॥ भिंदन्शूलमथार्धचंद्रमुखतो वीरो रघूणांपतिर्बाणानत्र मुमोच वा
लिविपदो मारीचमर्मच्छिदः॥ आलोक्याथ स तान्विदारितशिखानस्मिन्नकिंचित्करान्वायव्यं पुनरैंद्रमप्यरिवधूवैधव्यधुर्यं
दधे॥५८॥ रामास्त्रोद्दलितेषु[4] राक्षसपतेरंगेषु तुंगो भुजः प्रागेको निपपात मंदर इव प्रत्यर्थि[5]सेनांबुधौ॥ सिंधौ निष्पतितः प
रोपि ददृशे सेतुर्द्वितीयो यथा छिन्नं व्योम्नि शिरस्तुरीयमभवत्कूटं त्रिकूटस्य च॥५९॥ ग०॥ तदनु तदनुमोदभरितहरिबल
कोलाहलाकर्णनविदितकुंभकर्णवधपरिम्लानमुखेन दशमुखेन सहोदरमहोदरमहापार्श्वौ सहायौ विधाय समादिष्टाः

टिप्पणं॥ राक्षसैः १॥ निशाचरः २॥ मत्ततया ३॥ छिन्नेषु ४॥ शत्रुः ५॥

कुमाराः नरांतकदेवांतकातिकायत्रिशिरसः पितुर्निदेशान्निवेशमिव पितृपतेः प्राविशन्नमी समीकभुवं ॥ प० ॥ अजनि पुनः समीकमनयोरुभयोर्बलयोरवदलितेमुखेत्वयदनुज्झितरोषभरं ॥ अमरमृगीदृशामपियदाशयपूर्तिकरं समरसमुल्सुकेनमुनिनायददृष्टचरं ॥ ६० ॥ ममाथशैलैरथवालिनंदनो नरांतकं संयतिवानरांतकं ॥ हनूमतासोपिहतः सुरांतकः पुरांतकेनेवरुषापुरांतकः ॥ ६१ ॥ ग० ॥ अनंतरमसमसमरशीलेननीलेननिहते महोदरे मारुतिमथितशिरसि त्रिशिरसि विशसितेषु महापार्श्वादिषु वाहिनीपतिषु निर्भरविषादरोषपरवशो निशाचरः साकार इव तमोनिकायः सरयमतिकायः समागत्य वृत्रासुर इव सुत्राम्णा सुमित्रासुतेन सह विततेने विचित्रमायोधनं ॥ प० ॥ सत्वसुचिरं नियुध्य तमवध्य इतीव वरादनिलगिराविबुध्य पुनरस्त्रमधत्त विधेः ॥ दलितमनेन तद्दिविसमुत्पतितं जगतामतनुतराङ्कभीतिमधिकामतिकायशिरः ॥ ६२ ॥ अनुनीयरावणिरथोविधुरं पितरं दधत्पृथुसमीकधुरं ॥ सरथी समेत्यसधनुः शरधिश्चलितश्चमूभिरधिदाशरथी ॥ ६३ ॥ ग० ॥ अधिसमरम-

टिप्पणं ॥ यमस्य १ ॥ संग्रामांगणं २ ॥ युद्धं ३ ॥ विकलं ४ ॥

रातिजयमनोरथायरथाभिरक्षायैरक्षांसिपरितः प्रकल्प्य प्रतर्प्य च हविषा प्रदक्षिणशिखावंतं शिखावंतं मंत्राधिगतानि
विचित्राण्यस्त्राणि दधानस्तिरोधानगतएव शितमुखैः शिलीमुखैर्निर्माय निखिलमर्महर्तिं निस्त्रिंशाक्रमः क्रव्यादो व्याध इव ह
रीन्विधुरीचकार॥ प॰॥ स हलक्ष्मणं तमपि दाशरथिं परुषो निदाघ इव पद्मसरः॥ विकलाशयं विधुरसत्त्वमयं विरचय्य धाम च
जगाम शरैः॥ ६४॥ क्षतार्कभवतेजसि क्षपितरोमचंद्रद्युतौ विमुच्यसति निर्गते विशिखवृष्टिमस्मिन्घने॥ अदीप्तनलमस्फु
रत्कुमुदमस्तनीलोत्पलं समुत्तरलजीवनं सममभवत्तदा वाहिनी॥ ६५॥ अचलमथ सलीलमोषधीनां हरति हनूमति जांबवद्वि
योगात्॥ विचलितमभवद्बलं विशल्यं विबुधमनोपि विधूतशोकशल्यं॥ ६६॥ ग॰॥ तेन पुनः सहजतेजोभरितेन दावानले
नेव वानरबलेन दह्यमानां दरीमिव पुरीं विहाय पंचाननानिव पंक्त्याननिदेशात् प्रज्वलितमखिलरिपुप्रकंपनमकंपनमाह
नप्लवंगसंघं प्रजंघं च अंगदभुजप्रतापानलशलभावुभावपि निशम्य निशाम्य च द्विविदमैंदावदारितौ महारथौ शोणि

टिप्पणं॥ वह्निः १ सुग्रीवः सौरातपश्च २॥ दाशरथिः चंद्रश्च ३॥ शरः उदकमिति यावत् बाणश्च ४॥ जीवः उदकं च ५॥ सेना नदी च ६॥

ताम्रयूपाक्षावपिकोपाक्षांतपरुषसंरंभौकुंभनिकुंभौसमुत्तभ्यबाहुंसुबाहुमारीचाविवराघवभुजाभ्यांसुग्रीवहनूमद्भ्या
मद्भुतंयुद्धमेतनिपातां॥ प०॥ भूमौततः प्लवगराजभुजेनविद्धमालोक्यकुंभमसहन्विरहंतदीयं॥ शोकादगादनिलसूनुह
तो निकुंभस्तन्नामयुक्तममरीकुचकुंभमेव॥ ६७॥ ग०॥ ततः कौणपपतिनियुक्तंयुक्तमखिलवाहिनीभिराहवाटोपमुखरं
खरात्मजंमकराक्षमैक्ष्वाकशरोपिविपक्षमपिसपक्षइवसमक्षमनयज्जनयितुः[2]॥ प०॥ कृत्वामूर्द्धनिशासनंपितुरथोग
त्वारणंरावणिर्हुत्वातत्रमहाभुजोद्भुतभुजंधृत्वामहास्त्राणिच॥ स्थित्वाव्योमनिमाययाशरचयंत्यक्त्वाचभिल्लाचमूंबुध्वा
राघवकोपमापसहसालंकामलंकौतरः॥ ६८॥ ग०॥ ततः प्रतीचः प्रतिहरादयंसप्रातिहारिको निर्गत्यनिकृत्यासिनाकांनि
दांजनेयस्यपुरतोमायामयींमैथिलीमाकुलीकृतमनसितस्मिन्नाकस्मिकमिदमतथ्यमपितथ्यमेवबुध्वाचिराययुध्वानि
राशेप्रतिनिवृत्तेविद्विषिविपक्षपशुविशसनारंभि[5]निकुंभिलामासाद्यसद्यएवप्रावर्ततसत्रमतिविचित्रं॥ तदनुहनूमतः

टिप्पणं॥ विस्तारितवंतौ १॥ पितुः २॥ भयचकितः ३॥ हिंसनं ५॥

प्रतिनिवृत्ताद्वृत्तमेतदाकर्ण्यविशीर्णमानसोमानसचरइववज्रनिर्घोषाद्विषादाकुलोरा[1]जहंसःसंसदिनिपत्यसौमित्रिणा
समाश्वास्यमानःसकरुणंनिश्वस्यविश्वस्यपतिरपिविधुरंव्यलापीत्॥प॰॥जज्ञेतदत्रभवतीजनकस्ययज्ञेदेव्याश्चिराय
धरणेररणेःशिखीव॥वंशेमनोरपिवधूर[2]भ्र्किमन्यद्धामस्तवापिविधिनारचितोविरामः॥६९॥यत्नो[3]मुधाभवतियत्रस
मीरसूनोर्नलिंनलोपिनवसेतुनिबंधनाय॥दूरेन्वपावकशराद्दुरतिक्रमोयंतत्केनशोकजलधिस्तवलंघनीयः॥७०॥ग॰
॥इत्यादिपरिदेवमानमेनंविदितोशारमायाविशेषोबिभीषणःसमागत्यदेवभवतोपिकिमिदमस्थानेदीनमवस्थानं॥नि[4]
रंतरायमखनिर्वर्तनायपुरंदरारिणाकृतंकृत्रिममेतदित्यव[5]धार्यधारयमनसिधैर्यमित्यभिधायतद्धायलक्ष्मणंतक्ष
णमेवपुरस्कृत्यनिकुंभलामुपरुरोध॥प॰॥हरिकुलारवतश्चलितस्ततोगिरिदरीकुहरादिवकेसरी॥अपरिपूर्यरुषाह[6]
वमाहवंसविदधेबलशासनशासनः॥७१॥वातूलइवतूलानांवानराणांरणाजिरे॥विद्रावणस्ततोमायाविद्रावणसुतोभवत्॥

टिप्पणं॥ राजश्रेष्ठः पक्षीन्व १॥ व्यर्थः २॥ राक्षसः ३॥ निर्विघ्नं ४॥ निश्चित्य ५॥ हवनं ६॥

॥७२॥ ग०॥ अनुपदमनीकिनीनाथनिधनसंरब्धतरंसंवर्तप्रवृत्तमिव कृतांतं समरांगणमापततंस्यंदनगतंतंसंक्रंदनजि
तंगंधवाहनंदनस्कंधवर्तीसौमित्रिः प्रवर्तितशिततरशरधाराभिः शतधारपाणि[1]रिव जंभमस्तंभयत्॥ प०॥ परस्परमदोत्कटं
प्रचुरवीरवादोद्भटं पतत्त्रुटितकंकटं[2] प्रतिहतास्त्रमस्त्रेणच॥ जगत्त्रयभयावहं जयपराजयागोचरं वितेनतुरुभाविभाविव
तदारणं दारुणं॥७३॥ शतधार[4]कठोरशिखैर्विशिखैः शतधाविरचय्य शरासगुणं॥ विदधे विबुधेशजितं समरे हतसारथिम
प्यथ दाशरथिः॥७४॥ यदुचितमद्योमायाशीलस्य यद्भुजशालिनः सदृशमथवा युक्तं नक्तंचरेंद्रसुतस्य यत्॥ शतमख
जितः शौर्यं यद्वानुरूपमथात्मनस्तदकृत रुषा मंदो मंदोदरीतनयो रणे॥७५॥ ग०॥ अनुपदमभिषिषेण अभिषेणनव
ति बिभीषणे तेन मुक्तां शक्तिमर्धचंद्रेण दारयन्नपारयन्सोढुमदसीयमविनयममर्षाकुलः सौमित्रिरमोघं मांघवतास्त्रम
मुंचत्॥ प०॥ पतति स्म ततः प्रथममस्त्रमुज्ज्वलं सशिरस्त्रमिंद्रजयिनस्ततः शिरः॥ अनुपुष्पवृष्टिरवनौ दिवौकसामथ बाष्प

टिप्पणं॥ वज्रपाणिः १॥ कवचं २॥ गजो ३॥ वज्रं ४॥ ऐंद्रास्त्रं ५॥

दृष्टिरमरारियोषितां ॥ ७६ ॥ श्रुत्वा शक्रजितः सुतस्य निधनं शोकेन रक्षःपतेः क्लांतं निश्वसदश्रुपूरभरितं क्रंदच्च फूत्कारिच
॥ कोपेनाथ विपाटलं कुटिलितभ्रूवल्लि वृत्ते क्षणं जज्ञे दष्टघनोष्ठमट्टहसितोद्वृत्तं समस्तं मुखं ॥ ७७ ॥ ग० ॥ अनंतरमपा
क्रांतासुषु विक्रांतेषु पुरंदरारिमुखेषु नंदनेषु निहतेषु कुंभकर्णादिषु भ्रातृषु विध्वस्तेषु प्रहस्तपूर्वेषु सचिवेषु व्यतीते
षु विरूपाक्षप्रभृतिषु सेनापतिषु कपिविमर्दनेन विशीर्णे भवति निखिले बले समंततः पौरवधूजनपरिदेवनोत्तरंगायां
लंकायामातंकातिशयरोषणो रावणस्तत्क्षणमेव हर्यक्ष इव हरिणीं धरणीसुतां जिघांसुरंतिकगतेन मंत्रिणा निवार्यमा
णः सारथिना विधिनान्वसंचोदितो दाशरथिविजयविहितसंगरः संगरभुवमवततार ॥ प० ॥ कोपादसौ परिघयष्टिकुठा
रकुंतचापाशुगद्रुहिणशक्तिकृपाणपाणिः ॥ एकोप्यनेकमुखबाहुतया सबंधुर्लोकैर्यथा समितिलोचनगोचरोभूत् ॥ ७८ ॥
अलक्ष्यत सरक्षसामधिपतिः कृपाणं मुहुः प्रहस्य विनिपातयन्प्लवगमंडलीमौलिषु ॥ अयं तवतवायमित्यधिसमीकमेकैक

टिप्पणं ॥ सिंहः १ ॥ दैवेन २ ॥ ब्रह्मदेवः ३ ॥

शोवरानिवविनिर्दिशन्नेमरवारवामभ्रुवां॥ ७९॥ ग०॥ तदनंतरमक्षौहिणीक्षोभकं दलितरुषमतिपरुषविशिखदलितध्वज
मर्द्धचंद्रनिकृत्तधन्वानमस्त्रधारावदारितसारथिमतिविस्मयनीयकरलाघवं राघवानुजममर्षवेगमुक्तया शक्त्या मूर्द्ध
र्तमिव मूर्छानिमीलितमुपरागइव कमलाकरमाततान यातुधानपतिः॥ प०॥ आलोक्य दीनमनुजं हृदि शक्तिघातात्छोके
न विद्धहृदयः सुतरां स रामः॥ कोपेन चापमथ कुंडलयांचकार लंकापतेरपि ललाटलिपिं विधाता॥ ८०॥ अवकीर्य दाश
रथिरश्रुजलैरनुजं पुलस्त्यतनुजं च शरैः॥ युगपद्व्यधात्करुणवीररसौ युधि शोकहर्षशबलं च बलं॥ ८१॥ वलयितनि
त्रचापविनिवारितपंक्तिमुखे विसृजति राघवे विशिखवर्षममर्षवति॥ अरिषु न कश्चिदप्यथ निवृत्य गतः समरादमर-
विलासिनीषु न च काचिदलब्धवरा॥ ८२॥ ग०॥ अयं च पुनरंजनीसुतसमानीतमहीधरमहौषधिजीवितानुजाश्लेषसुख
लब्धमनोरथः समेधमानमानसः समरकौतुकोपलंभसंरंभोदंचितपुलककंचुकिताकृतिर्दाशरथिरधिसंगरममर

टिप्पणं॥ स्वर्वेश्यानां १॥ छिन्नं २॥ व्याप्तं ३॥

सारथिनानीतमति विशंकटंकमपि रथं कंकटमप्यनुग्रहाय शतक्रतोरग्रहीत्॥ प॰॥ अन्योन्यस्य सदक्षलक्ष्यमिलनादालक्ष्यशौंडिर्ययोः शस्त्राशस्त्रिसमुन्मिषत्पुलकयोः सश्लाघयोः साहसे॥ जाते जीवितसंकटेपि हसतोर्मूर्छासु विश्रम्यतोरश्रांतं रघुवीरपंक्तिमुखयोरासीदसीमा रणः॥ ८३॥ ग॰॥ अथ तयोरश्रांतमुक्तदिव्यास्त्रयोराखंडलदत्तनिभयोरोल्लनेषु मार्गणेषु अभंगुरपरस्परविजयमार्गणेषु वाग्गणेषु विच्छिन्नेषु धनुर्गुणेषु अव्याहतसहजसाहसगुणनिकृत्तेषु धुरीणेषु यानेषु निरपायसमराभिहति निर्भिन्ने सांयुगीने न रथे परस्परगर्वकल्पविजयमनोरथमजायत भुजायतयशो धनमायोधनं॥ प॰॥ तूणीमुखात्त्वरितमुद्धरणे गुणेन संयोजनेप्यथ शरस्य विमोचने वा॥ यत्रावलोकितदशास्यदृवातिवेगाल्लोकेन राघवकरश्चिरमालुलोके॥ ८४॥ अर्द्धोदीरि तवीरवादमहरद्रामोयदस्त्रैः क्षणात्तेनैवांकुरतामुखेन जगदेशेषं च लंकापतेः॥ साम्येसत्यपि चातुरीभिरुभयोर्द्रानुष्कमायाविनोर्विच्छिन्नाननदर्शनेन समभूद्व्रीडा रणे रावणे॥ ८५॥ दश

टिप्पणं॥ विशालं १॥ दशमुखः २॥ छिन्नेषु ३॥ बाणेषु ४॥

ननशरक्षतिक्षरदसृग्झरीबुद्बुदैस्तरंगितमहेंद्रकंकटसहस्रचक्षुःपथः॥ रणे रघुकुलेंद्रः क्षणममानि दैमानिकैर्य
था[1]दंशशातेक्षणो बलरुषा[2]कषायेक्षणः॥ ८६॥ ग०॥ तदनु वारुणेन वैश्वानरं वैनतेयेन बौतंधयं वायव्येन वारिदं नैशाक
रेण तामिस्रं माहेंद्रेण दानवं वैष्णवीयेन माहेश्वरं च परस्परमेवमस्त्रमस्त्रेण भिं[3]दानयोरनयोरनिशमाहवाग्रहादविदि
तान्यहानि समत्य[4]तीयुः॥ प०॥ शस्त्राशस्त्रिसकौतुकोपि दयितां संचिंत्य चिंताकुलामस्त्रेण ज्वलता विधेरपुनरुन्मेषं नि
मेषेण सः॥ मूर्ध्नः कंदलितान्मुहुर्मुहुरवच्छेदेपि लंकापतेरौ[6]तंकेन समं समस्तजगतां निच्छेदसीतापतिः॥ ८७॥ रक्षः
पतौ पतति लब्धमनोरथानामातन्वतां दिविषदामथ पुष्पवर्षं॥ श्लाघापदं समजनिष्ट परं न रामः कामोपि चाकलित
शूर्पणखाविकारः॥ ८८॥ ग०॥ अनंतरमालिंगितवसुंधरं शरतल्पमधिशयानमधिगतनिषंगोपधानं यातुधानपतिमधि
गम्य निपत्य च सोदर्याहार्यसौहार्दसुलभवैधुर्यः क[7]दर्योहमिति विहितनिजदूषणो बिभीषणश्चिरतरं विललाप॥ प०॥

टिप्पणं॥ इंद्रः १॥ आरक्तनेत्रः २॥ सर्पास्त्रं ३॥ विदारकयोः ४॥ जग्मुः ५॥ शंकया ६॥ कृपणः ७॥

अयिसमसुखदुःखैरन्वितंबंधुवर्गैःसहजमपिभवंतंमुंचतःसाहसेन॥कुलविशसनहेतोःकूटधर्मानुवृत्तेर्दशमुखममयावज्जीवमासीत्कलंकः॥८९॥आर्यस्यरक्षितुमसूननुजःसएकःप्राणानमुंचतपरंयुधिकुंभकर्णः॥त्वज्जीवरक्षणमहंममजीवहेतोरद्यापिहंतसहतेहतकोविधिर्मा॥९०॥ग०॥इत्येवमस्मिन्विलपतिविदितवृत्तांताशुद्धांतासंकरुणमारटंतीभिरंतरितयूथपाभिःकरिणीभिरिवतरुणीभिःसमंसमापत्यमध्येसमरमापतितमशनिहतमिवमंदरंदशकंधरंसमीक्ष्यनिहेतोपध्नेवलतानिपतंतीविलपंतीनाथनाथेतिविषादाहतादयितविधुरीकृतकुररीवामंदंचक्रंदमंदोदरी॥प०॥यावीक्षिताजनिपुरायमराजधानीवीरत्वयानिखिलदिग्विजयोत्सवेषु॥तामद्यदुर्विधिबलेनसमस्तलोकसाधारणःपुनरुपेष्यसिहाकिमेकः॥९१॥जनकःस्वयंदनुजवंशनायकोदयितोजगत्त्रितयजेत्रशासनः॥तनयःपुरंदरजयीतिगर्विताविधिनाहमेवमधुनाविडंबिता॥९२॥राजन्यधर्मविदुषोपिरघूद्वहस्यहत्वायथाग्रजमथानुजपट्ट

टिप्पणं॥ अपकीर्तिः १॥ हताश्रया २॥ दुर्दैवं ३॥

बंधः॥ आरभ्य वालिनमयं कथमाविरासीदिक्ष्वाकुवंशसहजः कथमेष धर्मः॥ १३॥ अहह निहतालंकावालानलेन हनू-
मतः परमेव निजापातिव्रत्यानलेन भवानपि॥ सुखमहमिहासीनाशोकानलेन यदीदृशो प्रभवति न मां हंतुं प्रायः स एष चि
तानलः॥ १४॥ ग०॥ तदहमिदानीं सायंतनसमयइव सवितुः प्रभा भगवति प्रविश्य जातवेदसि चंद्रिकेव चंद्रमसं तडिदिव त
डिद्वंतं भवंतमनुसरंती निर्वापयामि निरंतरविरहदहनदह्यमानमात्मानमित्यादि करुणपरिदेवनवतीं प्रजावतीं निवर्त्य
निर्वर्त्यन्निशि नरपतेर्यथाविधि निजाज्ञया पितृमेधसमेतं सविधमेधमान विषादं बिभीषणमशेषराज्याधिपतिं विधातुम
खिलतीर्थोपहृतैरंभोभिरंभोधरइव दावानलाकुलं वनस्पतिं रघुपतिरभ्यषिंचत्॥ प०॥ अथ दशरथनंदनाभिषेकादधि
गतराज्यपदो बिभीषणो यं॥ अनुदिनमभिवृद्धमंडलो भूद्दरुणकरामृतपूरणादिवेंदुः॥ १५॥ नीतामुदीक्ष्य निभृतेन बिभीष
णेन सीतां सुदारगुणशीलवतीं सतीनां॥ देवस्य तत्क्षणमभूद्दशकंधरारेरानंदशोकरसबंधुरमंतरंगं॥ १६॥ ग०॥
टिप्पणं॥ सीता १॥ भ्रातृजायां २॥ सूर्यः ३॥

तदनंतरमरुंधतीवपवित्रचारित्रनिधिरधिदेवतापतिदेवतानामनादिपुंसोपिमर्त्यधर्मणःप्रत्यायनायनायकस्यपुरंद
रमुखान्बर्हिर्मुखान्पुरस्कृत्यनमस्कृत्यभगवंतमरविंदासनमिंदुकलेवपुनरुदेष्यंतीतपनमिवदहनमवजगाहे॥प॰॥
प्राविक्षदग्निंविषिपरंनिजशुद्धिहेतोर्देवीपवित्रचरिताजनकेंद्रपुत्री॥अंहश्चिरंहियदपावनवस्तुसंगात्यक्तंस्वयंतद
मुनादमुना[2]बभूव॥९७॥विशुद्धशीलामनलानुषंगाद्विदेहजांतत्रविलोक्यसीतां॥प्रभांपुनःप्रत्युषसीवपूषाप्र
त्यग्रहीत्प्राग्रसरोरघूणां॥९८॥ग॰॥अथोदारधीरधिगतनिजप्रशंसाविधिनाविधिनापुरःप्रदृश्यमानंविमानाधिग
तमहारथंदशरथंप्रणिपत्यप्रतिपाल्यन्चशिरसितदनुशासनंपाकशासनवरप्रत्युज्जीवितैर्हरिभिरनुगम्यमानःप्रमोद
मानमनाःसुग्रीवेणसहसंभाषणमाणोविभीषणंसकरुणमवलोकयन्ननुजेनचसीतयासममयोध्यामधिगंतु
कामोरामःखेचरंविमानमारुरोहकिमपिकौबेरं॥प॰॥आरुह्यपुष्पकमयंविदितानितानिलंकोपकंठदशकंठरणां

टिप्पणं॥ देवान् १ ॥ विभावसुः २ ॥ ब्रह्मणा ३ ॥

गणानि॥ सिंधुंगभीरमपिसेतुनिबंधनंत्वसंदर्शयन्[1]मृगदृशांसजगामरामः॥ ९९॥ उपरियथायथामणिविमान[2]मुदंचति
नस्तरुणितथातथाविपुलतामुपयातिनभः॥ महीवलयेतुपल्वलमवेक्ष्यमहांबुनिधिंपवनभुवेनिवेद्यन्त्वहसंति
परेहरयः॥ १००॥ ग०॥ प्रियेविदेहराजनंदिनि[3]विनतानंदनमप्यतिशेतेविमानवेगः॥ प०॥ यद्यद्दूरेपुरःपश्यन्निच्छ
मितवशांसितुं॥ तत्तदन्वगपिद्रष्टुंतत्क्षणेनापवार्यते॥ १०१॥ ग०॥ तरुणिधरणीसुतेपश्यऋष्यमूकोयंबिंबाधरेपंपा
सरइदंकंबुकंठिकबंधनिबंधनभूरियंकरभोरुखरादिकलहस्थलमिदंमधुरालापिनिममपर्णशालेयंमत्तेभगामि
निमायामृगमृगयावनमिदंकुटिलायतकबरिगोदावरीयंकुंभिकुंभस्तनिकुंभसंभवायतनमिदंविधुमुखिवि
राधविध्वंसनवनमहीयंविपुलविलोचनेमहामुनेरत्रेराश्रमपदमिदंविदेहराजपुत्रिचित्रकूटोयमितिविविधाःक
थाःकथयन्नेवायंभागीरथी[4]परिसरगतंभरद्वाजमुनेःप्रशांतंपावनंतपोवनमायासीत्॥ अभाषतचमैथिलीं॥ प०॥

टिप्पणं॥ सीतां १॥ गच्छति २॥ गरुडं ३॥ पर्यंतभूः ४॥

प्रसुप्तबर्हिनिश्वासपारणासुखितः फणी॥ कंडूविनोदनोत्कंठीकंठीरवनखैर्मृगः॥१०२॥ ग०॥ तत्र भरद्वाजविहितविविधा
तिथेयः तथैव पदवीं दवीयसीमतीत्य पुनरयोध्यासविधमासीदन्नग्रत एव हनूमदावेदितौदंतं समागच्छंतमरुंधती
जानिपुरःसरमजस्त्रमानंदाश्रुजलविलुलितालोकैरमात्यलोकैः परिगतमतिपावनतपोधनव्रतभाजानभक्तिभरि
तं भरतमवलोकयन्नतिवत्सलमना विमानावरोहणाय दशकंठरिपुरुदकंठत॥ प०॥ यानं मदाशयमवेत्य यथा यथैत
तारापथादवतरत्यवनीकुमारि॥ आसेदुषी सविधमद्य तथा तथा भूरत्यादरेण भवतीमभिगच्छतीव॥१०३॥ इत्थं वदन्नि
दुसुरवीं सलीलं देवः प्लवंगाधिपदत्तहस्तः॥ बिभीषणावेदितया पदव्या विमानतो मंदमवारुरोह॥१०४॥ प्रणीतमणिपादु
कं प्रणतमग्रतः पादयोरुदस्य भरतं जवादुपनयन्भुजाभ्यंतरं॥ अवेक्ष्य च तपःकृशं वपुरतीववात्सल्यतो न वंनवमिवस्त्वश्र
न्नविरराम रामश्चिरं॥ १०५॥ पश्यन्ननंद भरतः परिरभ्य दोर्भ्यां सौमित्रिमार्यसमदुःखसुखं वनेपि॥ सोयं सुखोपनत

टिप्पणं॥ सिंहः १॥ अतिदूरं २॥ वृत्तांतं ३॥ वसिष्ठः ४॥

राज्यपराङ्मुखायतस्मै पुनः सहज भक्तिपराङ्मुखाय॥१०६॥ग०॥ अथ भरतोपि पुरतोभिवादितपूर्वजोपलालननिघ्नेन शत्रु
घ्नेन समंसविनयंप्रणिपत्य जनकेंद्रपुत्रीमुन्मनीकृत्य सुग्रीवदशग्रीवानुजादीन्सावरोधवधूकानन्यथोचिताभिरुपचर्याभि
रभ्यर्च्याभ्यर्चितपुरोहितमामंत्रितमंत्रिलोकमालोकानुगृहीतपौरवर्गमग्रजन्मानं विमानत एवसबहुमानमनयदप
नीतजनपरिश्रमंनिजाश्रमं॥ तत्रचसौमित्रिसीतासखोदाशरथिरतिलोभनीयवात्सल्यां कौसल्यामयशः शल्यज
नितशोकातिरेकांकैकेयीमकृत्रिमस्नेहपरिष्वक्तां सुमित्रामपिक्रमादभिवादयन्निजालोकरसनितांतकदलितांतरं
गाभिरेताभिश्चंद्रइवपयोधिवीचिकाभिः प्रतिक्षणंपरिरभ्यमाणाभिः सलक्ष्मणः केवलमानंदधुरमविंदत॥प०॥अ-
थाखिलजगत्सतेरपिरघूद्वहस्यादराद्विधातुमभिषेचनं विचलतागुरोराज्ञया॥ अनीयतसमंततोहरिगणेनतीर्थंपुनर्विशंक्य
हृदिमंथरांनभजतागतिंमंथरां॥१०७॥ अलंकृतः कृतमभिषेकमादरादमात्यसंहतिभिरवाप्यराघवः॥ पुरोन्मुखः पु

टिप्पणं॥ सहचरः १ ॥

नरयमानशोरथं मनोरथं स च भरतो महारथः॥१०८॥ ग०॥ तत्र च सेवाविचक्षणाभ्यां लक्ष्मणशत्रुघ्नाभ्यामभितो विधूय
मानधवलवालव्यजनः परिजनाचारनिरतभरतोदस्तमणिविमलमुक्तातपत्रो विचित्रोपजातमनुजवेषचारुभिरारू
ढशैतांगमातंगैरलंकृतैराशरप्लवंगपतिभिरनुगम्यमानः प्रवर्त्यमानशेषाक्षतकुसुमलाजोपचारपौरपुरंध्रीकदंब
संरंभचलितमंजुमंजीरमणिकांचीवलयवाचाटितदशदिगंतरां वाद्यमानमांगलिकभेरीमृदंगशंखवादिकविविधा
रवश्रवणसमयोच्चलितसामोदपौरसंबाधांसौधांतरगवाक्षचलिततरुणीकटाक्षलेखानीलोत्पलदामतोरणाभिरा
मरथ्यां तथाविधामयोध्यामाजगाम रामचंद्रः॥ प०॥ राज्यं स्वं समुपेयिवान्स विनयैरासेवितो भ्रातृभिः सुग्रीवप्रमुखा
नपि प्रियसखान्स्वे स्वे पदे स्थापयन्॥ स्वच्छंदः सुचिरं सुखान्यनुभवन्देव्या तया सीतया रामः पालयति स्म कीर्तिविभवै
रामोदिनीं मेदिनीं॥१०९॥ कोलालाख्यमहाग्रहारमहिताकल्पेनसंख्यावतां मूर्द्धन्येन विशारदेन विधुना श्रीसोमनाथोद

टिप्पणं॥ रथः १॥ राक्षसः २॥

ये॥ प्राग्भोजोदितपंचकांडमहितानंदे प्रबंधे पुनः कांडो निर्मितएकचूतपतिनाषष्ठोपिजीयाच्चिरं॥११०॥ ६ ॥

इति श्रीलक्ष्मणकविविरचिते चंपुरामायणे युद्धकांडः समाप्तः॥ ॥काव्यालंकारशालास्थद्वितीयगुरुणास्वयं॥ भोजीयचंपुषट्कांडी शोधितेयंयथामति ॥१॥ खसप्तसप्तेंदुमितेशाके पुण्याख्यपत्तने॥ यलतःपाठशालायामंकितेयंशिलाक्षरैः ॥१॥

ऐ पोथि सखाराम आप्पा रियाचि डोयसायजा पिठने॥

इतिचंपूरामायणेयुद्धकांडः समाप्तः

मुष्येंदुरकारिधात्रामृषायमब्धेरजनीतिवार्ता ॥ १४ ॥ जग्राहनिग्राहं[1]परःपराश्रियांकरैःकराग्रेणकरेणुचंक्रमः[2] ॥ कुंतीशं[3]कुंतीशरथो-
यथारमांसं[4]मुद्रकांचींचसमद्रकन्यकां ॥ १५ ॥ गद्यं ॥ अथकदाचनमृगयोपलालित[5]तद्धृदयोनरेश्वरोऽयमश्वेशशिश्वेततेजसिविश्वा-
तिशायिनिरयविजितमातरिश्वानिकृताधिरोहः पार्श्वधृतविश्वक[6]द्रुभिरनेकवागुरो[7]पकरणानुरोधैर्योधैरनुद्रुतोमृदुभद्रविनयाभ्यां-
यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतोहिमवतोऽवजगाहेमहतीमटवीतटवीथिकां ॥ तत्रसतावदतिक्षुल्लकव-
नमल्लिकामतल्लिको[8]द्वेल्लित[9]धम्मिल्लोवलग्न[10]दृढलग्नकच्छ[11]पुटविच्छुरितच्छुरिकोनिषंगानुषंगमांसलतमांसलललितः परनिरासपरं

१ निग्राहः ग्रहणं २ चंक्रमः गतिः ३ शकुंतशिरथः शकुंतीनां पक्षिणां ईशः पतिः गरुडः सएव रथः वाहनंयस्य सविष्णुः ४ समुद्रकांचीं पृथ्वीं ५ उपलालितं उत्सुकं ६ विश्वकद्रुभिः मृगयाकुशलश्वभिः ७ वागुरा मृगबंधिनी ८ मतल्लिका प्रशस्ता ९ उद्वेल्लितः ऊर्ध्वंबद्धः १० वलग्नं मध्यः ११ कच्छपुटं पडदाळइतिप्रसिद्धं

शरासनवरंकरेकुर्वाणोगीर्वाणगणचक्रवर्तिविक्रमः क्रमेणविविधमृगचक्रवधंविधातुमुपचक्रमे ॥ प० ॥ भूभुजोस्यसविधेविचरंत्योर्भोजमद्रसुतयोर्दृशिशोभां ॥ जेतुकाममिवसर्वस[1]मष्ट्याप्रादुरासपुरतोमृगयूथं ॥ १६ ॥ क्षोणीपतौमदकलंप्रतिकृष्णसारंतूर्णी[2]मुखेपतितपाणिनखांकुरेस्मिन् ॥ एणीकुलानितरलैर्यमुनाजलानां वे[3]णीमिवाक्षिवलनैर्विपिनेवितेनुः ॥ १७ ॥ कुरंगयूनांकुरुतेस्मभीतिंगुरोःकुलस्यामृतदीधितेर्नः ॥ सजातिरेषांतनुतेकलंकमितीवरोषादिषुभिःसपांडुः ॥ १८ ॥ प्रजवंहयंगम[4]यतेततस्ततःपतितानृपायशललीशलाकिकाः ॥ गहनेवनेपिपिशुनत्वमाचरन्ग्रहणेवराहकुलवर्त्त[5]नीभुवां ॥ १९ ॥ वे[6]शांतपंकविल्वद्तेर्विनिवृत्यसद्यःप्रत्युद्यतांध्वनिषुमत्सरिणांहयस्य ॥ भूदारएषव[7]नपोत्रवतामतानीद्भूर्दारशब्दमसहिष्णुरिवांतमेषां ॥ २० ॥ तूर्णंप्रधाव्यतुरगंस्वयमन्यतोसौपांडुःकुलंपरिववारलु[9]लाययूनां ॥ अग्रेविषा[10]णकरधूननदुर्वि[11]धत्वात्सत्या[12]पिताद्विरदभावविपर्ययाणां ॥

१ सर्वसमष्ट्या सर्व समुदायेन. २ तूणी भस्त्रा. ३ वेणीं प्रवाहं. ४ गमयते प्रापयन्तस्मै. ५ वर्तनी मार्गः ६ वेशंतः अल्पसरः ७ वनपोत्रवतां वनसूकराणां. ८ भूदारः राजा सूकरश्च- ९ लुलायः महिषः १० विषाणं हस्तिदंतः ११ दुर्विधत्वात् अभावात्. १२ सत्यापितः याथार्थ्येन ज्ञापितः

॥ २१ ॥ आकर्ण्यक्षितिपहयारवानसह्यानामूलंकुपितधियस्तिरो[1]विषाणं ॥ व्याधूयांतिकतरुषुक्षणान्निचख्नुर्व्याक्रष्टुंपुनरपितच्चि-
रान्नशेकुः ॥ २२ ॥ कुरुतेतिततःसहैववासंकुलकूटस्थ[2]कृतांतवाहनेन ॥ मदधूतविषाणमंडलाग्रेमहिषौघेनिचखानमंडलाग्रं[3]
॥ २३ ॥ तन्नचित्रमवनीपतेस्ततश्चंद्रहास[4]पतनंचकारयत् ॥ पोषितेषुवन[5]मध्यचर्यया[6]पुंडरीकनिवहे[7]षुर्मीलिनं[8] ॥ २४ ॥ गहन-
मस्तशरारु[9]मृगव्रजंकृतवताप्यमुनाजविवाजिना ॥ ममृगिरेहरयोमदशालिनोमनुज[10]पेनगिरीशदरीशयाः ॥ २५ ॥ विस्फार[11]-
घोषमवकर्ण्यविनिर्गतानांहुंकुर्वतांतरुणकेसरिणांगुहाभ्यः ॥ याकेवलंप्रथममाननएवभल्लैस्तांपंचतां[12]सविदधेसकलेपिदेहे ॥२६॥
गद्यं ॥ एवमश्रांतमृगयापरिश्रांतमपरिमितस्वेदशीकरनिकरकोरकितफाल[13]मूलमातेनिरेतमाश्यानं[14]तुहिनगिरिदेश्यानंदनीयमं

१ तिरः वक्रं २ कूटस्थः मूलपुरुषः ३ मंडलाग्रं करवालः ४ चंद्रहासः करवालः चंद्रिकाच. ५ वनंअरण्यं जलंच. ६ चर्यया स्थित्या. ७ पुंडरीकनिवहः व्याघ्रसमुदायः सितकमल समुदायश्च. ८ मीलनं नाशं संकोचंच. ९ शरारुः घातुकः १० मनुजपेन राज्ञा. ११ विस्फारः धनुः १२ पंचतां विस्तृततां मरणंच १३. फालं भालं. १४ आश्यानं शुष्कं

दिमानोमानससरोरविंदमकरंदबिंदुसंदोहसौरभ्यपारदृश्वानोमातरिश्वानः ॥ अनंतरमसौपरंतपःसमंततःशकुंतरवानिरंतरादिगं-
तरादखिलमृगकुलशरण्यादरण्यादुत्प्लवमानस्यकस्यचिदनुप्लवन[1]मंदितजवचमूरोश्चमूरोःसरणिमनुसरमाणस्तदीयतनू[2]रुहचित्र-
बिंदुरुचिनिकरैरखिररुचिरैर्गगनंसमुत्पतद्भिःखुररजोभिरनुमीयमानतुरगगतिर्दूरमंतिपपात ॥ तत्रतावत्क्वचनलतागुल्मपरिस-
रेसिनरनाथःपरिकथिततरुणिमप्रथिमकलेवरमशिथिलरतिसुखसनाथंहरिणमिथुनंनयनपथस्यातिथीचकार ॥ प० ॥ तिग्मे-
नबाणेनजघानतास्मिन्युग्मेनराणामधिपःपुमांसं ॥ [3]वातायुराकारमसौमहर्षे[4]र्जातायुरंतःसहसाललंबे ॥ २७ ॥ गद्यं ॥ ततः
कृपामंदमनाःकिंदमनामधेयः[5]संदानितनुःस्यंदमानरुधिरेण[6]महारुषा[7]कल्परविकल्पमहारुषातस्मिन्[8]महीभृतिसंभोगसंभेदकमंभोज
दृशां[9]दंभोलिमिवसहस्राक्षःशापमुदस्राक्षीत् ॥ तदनुतापसशापेनविरचितमनस्तापेनतेनभूपेनचतुरंगबलमिवसप्तांगंराज्यम-

१ मंदितजवचमूरोः मंदितजवाः मंदीकृतवेगाःचमूरवः सेनासक्थीनि येनतस्य. २ तनूरुहं लोम. ३ वातायुः मृगः ४ जातायुरंतः जातः आयुषः अंतोयस्यसः
५ संदानिता बध्धा युक्तेत्यर्थः ६ महारुषा महाव्रणेन ७ .कल्परविकल्पमहाः प्रलयकालिकसूर्य सदृशंतेजोयस्य ८ महीभृति राज्ञिपर्वतेच ९ दंभोलिं वज्रां.

पिव्यसृज्यत ॥ पद्यं ॥ अष्टांगयोगानवतोस्यराज्ञोमिष्टान्नमासीन्मृदुकंदमूलं ॥ गर्भोवनस्याजनिकेलिसौधोदर्भोपिसिंहासनतां जगाहे ॥ २९ ॥ गद्यं ॥ अहोनरपतितापसयोःसमानरूपफलमिदमाचरितं ॥ तथाहि ॥ पद्यं ॥ बाणशापप्रयोगाभ्यांबाधितौ तावुभावपि ॥ [1]तपस्वितांयतःसद्यस्तादृशीमुपजग्मतुः ॥ ३० ॥ ग० ॥ क्रमादतिपतितेचावरोधवधूजनानुरोधगुणदा[2]त्रेगणरात्रे ॥ पद्यं ॥ अपाकरिष्यन्न[3]नपत्यभावम[4]पत्यभावंभुवनंकरिष्यन् ॥ उवाचदेवीमुचितंसपांडुरु[5]पह्वरेजातुचिदूहदक्षः ॥ ३१ ॥ परिपालयतोपिमेमहींपरिपूर्तिर्नतनूजदुर्गतेः ॥ प्रजयाहिमनुष्यइत्यसौप्रथतेहिश्रुतिवर्णपद्धतिः ॥ ३२ ॥ गात्रंनकेवलमशेष[6]बुधोपलाल्यं गोत्रंचतत्र[7]भवतःकुमुदैकबंधोः ॥ [8]आपांडुवर्त्ततइतिस्फुटमद्यमन्येयस्मात्प्रजांनलभसेयदुवीरकन्ये ॥ ३३ ॥ [9]नह्यतीवविधिरप्यसुतानांन[10]ह्वतेफलमितिश्रुतिसिद्धेः ॥ जीवतोममयथा[10]हवसाध्यो[11]मीलितोपिनतथा[12]परलोकः ॥ ३४ ॥ अहंकिमंबाकिमभीष्टतापदेत

१ तपस्वितां तापसत्वं शोच्यत्वंच. २ दात्रे छेदके. ३ अनपत्यभावं नास्तिअपत्यं संततिर्यस्य तस्यभावं. ४ अपत्यभावं नास्तिपत्युः अभावोयस्मिन्तत्. ५उपह्वरे एकांते. ६ बुधाः देवाः ज्ञानिनश्च. ७ तत्रभवतःपूज्यस्य. ८ आपांडु आसमंतात् पांडु पांडु पर्यंतंच. ९ नह्यते संबद्धोभवति ददातीत्यर्थः १० हवः युद्धं यज्ञश्च. ११ मीलतः मृतस्य. १२ परलोकः शत्रुलोकः स्वर्गश्च.

वेतिमातुर्धुरितातपृच्छया ॥ प्रलोभतुल्यंप्रवदंतमर्भकंमुदाहसन्जिघ्रतिमूर्ध्निपुण्यभाक् ॥ ३५ ॥ निंद्यतेपितृभिस्तप्तैर्निरपत्यधनः पुमान् ॥ अध्वनीनैररतिश्रांतैरवकेशीविपादपः ॥ ३६ ॥ कदापितातशब्दस्यकल्पभूमिरुहामिव ॥ नार्थीभवितुमर्हामिनरवाहन संनिभः ॥ ३७ ॥ किंभोगवैभवयशः क्षितिजीवितार्द्यैरंभोरुहाक्षिनियमैरनघैस्त्वमेव ॥ शापातिरेकदवपावकशायिनोमेतापा पनोदविधयेतनयंप्रसूष्व ॥३८॥ गद्यं ॥ इत्यसंकोचतःशोचतःपत्युरग्रभुविसमग्रमंदाक्षरमणीयंमंदाक्षैरमणीयंत्रितामिदंवचनंपृथापि कथयामास॥राजन्पुराखलुपितामममापितामहसमानस्यानिशांतमधिवसतःकृशांतनुलतांतपसावहतोपिदिशांततिषुनिशांतरविकां तिभृशांतर्रंगरुचांतरंगपरंपरांतरलयितुरशांतमनसोमुनेरुपांतपरिचरणायमामनुशासितशैवराज्यामपिनियोज्यामकरोत् ॥पद्यं॥ ततोनिदेशान्समयेपुलब्धुंमयामहायत्नजुषामहर्षेः ॥ आरामवल्लीरपरहायतस्यभ्रूवल्लिमेवप्रतिपाल्यतस्थे ॥ ३९ ॥ यथायथासेव

१ अध्वनीनैः पथिकैः २ अवकेशी वंध्यवृक्षः ३ अर्थीभवितुं अर्थः अभिधेयं भवितुमितिच्विप्रत्ययांतंसमस्तंपदं पक्षे अर्थी याचकः भवितुं. ४ मंदाक्षं लज्जा ५ मंदाक्षरमणीयंत्रितं मंदानिअक्षराणितान्येवमणयस्तैः यंत्रितं निबद्धं. ६ निशांतं गृहं. ७ निशांतः प्रातः कालः ८ अंतरंगा आप्ताःसदृशाइत्यर्थः ९ तरलयितुः प्रसारकस्य. १० नियोज्यां दासीं.

नयत्नजन्मनानिदाघतोयेननिषिक्तमंगकं ॥ तथातथावर्धततापस[1]सांतिकेमहाविकासाममभक्तिवल्लरी ॥ ४० ॥ तपस्विनस्तस्यत
पःकृशस्यसरूपतामाप्तुमिवाश्रयद्भिः ॥ दिनेदिनेमेदयनीयरूपैरंगैरशेषैरतिकार्श्यमापे ॥ ४१ ॥ आपादनेनसमिधामभिषेकवा
रामभ्यर्चनासुमनसामपितापसेंद्रः ॥ मध्येवशिष्यजनताममतांवितन्वन्नं[2]तेवसंतमपिकोपमपाचकार ॥ ४२ ॥ एकां[3]समांतत्रव
सन्कदाचिदेकांसमांपार्श्वगतामवेक्ष्य ॥ समाधिवृत्त्यासहमौनमुद्रांसमापयामासतपोधनेंद्रः ॥ ४३ ॥ गद्यं ॥ वत्सेभवत्सेवासंप्रदा
येनसंप्रतिभृशंप्रसीदामीतिव्याल्हत्यसमुनिरनुकंपितचेतामह्यमत्यर्थमभीप्सितार्थस[4]मर्थापनपरतंत्रंकमपिमंत्रमुपादिशत् ॥ पद्यं ॥
अधिक्रुधामावसतेरमुष्मान्मत्वागुरु[5]त्वंवरमंत्रलाभे ॥ अ[6]पुष्पवत्यामपिमेदशायामा[7]मोदभारोधिकमाविरासीत् ॥ ४४ ॥ गद्यं ॥
अधुनातस्यप्रभावेनशतमखमुखासुनिखिलासुले[8]खलेखासुयेयेपरा[9]र्ध्यास्तेतेरहसिध्यानमात्रसाध्यसान्निध्याः स्वस्वानुरूपगुणवि

१ तापसः ऋषिः वृक्षविशेषश्च. २ अंतेवसंतं समीपे वसंतं शिष्यंच अनेक शिष्यकार्य कारित्वात् मध्येव तस्य सर्व शिष्यविषयिणीप्री तिर्जातेतिभावः
३ समां वर्षं. ४ समर्थापनपरतंत्रं दापन तत्परं. ५ गुरुत्वं देशिकत्वं. ६ अपुष्पवत्यां पुष्पंरजः कुसुमंच तदभाववत्यां. ७ आमोदभारः हर्षसुगंधयोः अतिशयः
८ लेखलेखासु देवपंक्तिषु. ९ परार्ध्याः श्रेष्ठाः

भवानात्मभवान्मयिविकसदनुकंपाःसंपादयिष्यंति ॥ ५० ॥ इतिनृपायकृपायतचेतसेयदुसुतामुनिर्नेतुरनुग्रहं ॥ [1]अदर्शनव्रणपी
डमहर्पतेरभिदधेरतिसंगमनंविना ॥ ४५ ॥ इतिवचनमयींसुधांकिरंतींयदुनृपतेस्तनयांप्रशंसमानः ॥ पतिरनुमनुतेस्मपौरवाणां[2]प्र
कृतमहोत्सवपारदर्शनाय ॥ ४६ ॥ तदनंतरं ॥ धर्मात्प्रापयुधिष्ठिरंपवनतोभीमिंचभीमंद्विषांजिष्णोर्जिष्णुमतीवधृष्णुमनघाकुंती
मुनेर्विद्यया ॥ अन्यासापितयैवतत्रनकुलंरूपास्पदंगीष्पतेःसच्[3]छात्रंसहदेवमप्यजनयन्[4]नासत्ययोरंतिकात् ॥ ४७ ॥ तदनुवासव
[5]नंदनसंभृताःसपटुगीतिरव[6]प्रमदालयः ॥ [7]सुमनसस्तुयथोचितमाचरन्निपतनंभुविनृत्यविधिंदिवि ॥ ४८ ॥ जन्मोत्सवोमहानेषांज
लमत्यच्छमावहन् ॥ [8]विद्यामनन्यसामान्यांव्रीडांकुंभभुवोऽनयत् ॥ ४९ ॥ स्वस्यचक्रगतिंसख्युःस्वयमप्याश्रिताइव ॥ जवात्प्र
दक्षिणज्वालाजज्वलुर्यज्वपावकाः ॥ ५० ॥ [9]सामोदोर्भीमसंभूतिसंभृताशौचवत्तया ॥ संकुचन्निवसंस्पर्शेसमीरोमंदमाववौ ॥

१ अदशनव्रणपीडं दशनाः दंताःतेषां यापीडासानास्तियास्मिन् दक्षयज्ञेपूष्णःदंतभंगात्. २ प्रकृतमहोत्सवः पुत्रमहोत्सवः ३ सच्छात्रं समानं. ४ नासत्ययोः अश्विनी कुमारयोः ५ नंदनंवनं नंदनःपुत्रश्च. ६ प्रमदालयः मत्तभ्रमराः कामिनीपंक्तयश्च. ७ सुमनसः पुष्पाणि देवाश्च. ८ विद्यां जलस्वच्छीकरणविद्यां अगस्त्योदये जलानिनिर्मलानिभवंतीतिपुराण प्रसिद्धिः ९ सामोदः सगंधः सहर्षश्च.

॥ ५१ ॥ कन्यकात्वेपिमथ्येषाकामुकीतिस्मरान्निव ॥ प्रसूतिदिवसंकुंत्याःप्रादिद्युतदहस्करः ॥ ५२ ॥ पुष्पा[1]त्प्रागेवसुषुवेपुत्रमेषेति
वीरुधः ॥ फ[2]लेग्रहयएवासन्प्रसूनात्प्राक्पृथावने ॥ ५३ ॥ ग० ॥ तदनुगुणगणैरभंगुरशुं[3]भंयुताविकासमयेसमये ॥ प० ॥ प्रजा
धिपोसौप्रथमंयुधिष्ठिरेसुतेषुतेजस्विषुतेषुपंचसु ॥ प्रभाकरेपंचं[4]तपाइवोन्नतेप्रपातयामासविलोचनद्वयं ॥ ५४ ॥ तपस्विनीनां
स्तनपायिनस्तेदरं[5]क्वणत्कींचकदत्तकर्णाः ॥ वनेदिनांतेवसुधेंद्रपुत्रावल्केषुनिद्रासुखमन्वभूवन् ॥ ५५ ॥ क्षुत्पीडयास्तनरसेकलहं
शिशूनांकुंतीतदाशमयितुंकुचकुंभयुग्मे ॥ एकंयुधिष्ठिरधनंजययोश्वभा गमेकंसमीरिणसुतस्यचसांविभेजे ॥ ५६ ॥ निशाचरैःसमं
बाल्येनियोद्धुं[6]मिवकौतुकी ॥ उत्तानशयनेमुष्टिमुदग्रांमारुतिर्दधौ ॥ ५७ ॥ ग० ॥ ततःक्रमेणगतेषुकतिपयेषुवासरेषु ॥ प० ॥
पद्भिरात्मपितृयोषितिभूमौस्पर्शनंपरिहरंतइवैते ॥ जानुभिःकरसरोजसहायैश्चंक्रमंचमं[7]दकुर्वतबालाः ॥ ५८ ॥ आदायभीममति

१ पुष्पात्कुसुमात् रजोदर्शनाच्च. २ फलेग्रहयः फलधारिण्यः ३ शुभंयुता शुभान्वितत्वं. ४ पंचतपाः पंचाग्निभिःसाध्यंतपोयस्यसः ५ दरं छिद्रं. ६ नियो-
द्धुं बाहुयुद्धं कर्तुं. ७ चमत् सुंदरं.

मांसलमुत्तमांगेप्याघ्रायजानुकृतचंक्रममाश्रमांते ॥ बाहालतैववहनाद्विररामशश्वत्कौतूहलंनतुकदाचनतापसीनां ॥ ५९ ॥ वृद्धतापसपुरःप्रसारितंवेणुदंडमवलंब्यशैशवे ॥ भावयन्निवगदापरिग्रहंभाविनंपवनभूश्चचारसः ॥ ६० ॥ मुनिसुतैरविशेषजुषो वनेमुहुरमीनवशैशवकेलिषु ॥ मलिनतामनयंतकलेवरंमदकलाःकलभाइवधूलिभिः ॥ ६१ ॥ तत्रतत्रमृदुपांसुषुपांडोः पुत्रपादतलविन्यसनेन ॥ छत्रकेतुकुलिशैःस्फुटरेखैश्चित्रवत्यभवदाश्रमभूमिः ॥ ६२ ॥ लीलास्मितैःसृक्कयुगाद्गलद्भिर्लालाजलानांलिलितैःपृषद्भिः ॥ बालादधुस्तेत्वदिमौक्तिकानांमालाधुतोल्लेखनरंध्रसूत्राः ॥ ६३ ॥ अत्यंतबाल्यादमृतायिताभिरन्योन्यमर्धोक्तिभिराव्हयत्सु ॥ सभीमसेनोऽजनिपांडुसूनुष्वर्धोक्तनामापिचपूर्णनामा ॥ ६४॥ ग॰ ॥ तदानीमयमंबालिकासूनुरविलंबितंसंक्रंदनइवपंचनंदनागमसंपदातयामुदममितांबभार ॥ प॰ ॥ पुत्रेषुतेषुक्रमपोषितेषुविलोकयंत्याविहरत्सुकुंत्याः ॥ आप्याययामासतु

१ सृक्कयुगात् ओष्ठप्रांतयुग्मात्. २ धुतोल्लेखनरंध्रसूत्राः धुतंराहितं उल्लेखनं उत्तेजनं रंध्रंसूत्रंच यासांताः. ३ पंचनंदनागमसंपदा पंचानां नंदनानां पुत्राणां आगमः प्राप्तिः तद्रूपया संपत्त्या पक्षे पंचानां नंदनागमानां इंद्रारण्यवृक्षाणांसंपदा ऐश्वर्येण.

रंतरंगंप्राप्यापिमाद्रीतनयौयमत्वं ॥ ६५ ॥ तैरादराद्वनलतासुदृढीकृतासुदोलाविधेः परिचितस्यसहर्षिपुत्रैः ॥ पर्यायलब्धमसकृत्पवमानसूनोरारोहणंद्रुतमभूदवसानभूमिः ॥ ६६ ॥ भीमेनदंतयुगुलेविधृतेयमन्येवन्येभमारुरुहुरद्रिनिभंसगर्भ्याः ॥ शुंडांप्रगृह्यविजयः स्वयमेवमानीतंलीलयारदपथेनसमारुरोह ॥ ६७ ॥ ग० ॥ तदनुविधिवदुपनीतानांक्रमेणमधुरेणवयसाशिरसाचविधृतवपुषांविनयगौरवपुषांसकलासुकलासुकौशलमुन्मीलयतांतेषांयशांसिबलभेदनमदावलस्यधाम्नोर्युगुलमपियुगपदुल्लंघयामासुः ॥ प० ॥ नवतरुणिमलक्ष्मीनंदनीयंशरीरंकुरुवृषभसुतानांकुर्वतीनेत्रपात्रं ॥ मुनिततिरितिमेनेमोहनायत्रिलोक्याः स्वविशिखइवकामःसोपिकिंपंचधाभूत् ॥ ६८॥ग०॥ अथकदाचिदखिलहरिदंतरनिरंतरवलमानमलयपवमानकंपितचंपकसंपादितसौरभसंपदनुकंपितनिखिलनिलिंपपथाः केसरकुसुमकेसरशिखरभासुरधूलीधूसरदिशोमनसिजविजयसहकारचतुरसहकां

१ यमत्वं युग्मत्वं अंतकत्वंच. २ वयसाता रुण्येन विधृतंव्याप्तंवपुः शरीरं येषांतेषां शिरसा विनयस्य नम्रतायाः गौरवंआधिक्यं पुष्णांति तेषामितिच यथासंख्यं योज्यं. ३ धाम्नोः स्थानतेजसोः ४ सहकारः साह्यकरणं. ५ सहकारः आम्रः

रपल्लवतल्लज[1]परिचर्वणगर्वायमाणकलकंठ[2]युवकंठोक्तपथिकजनसंदोहजीवितसंदेहाः वनदेवतावदनतिलकायमानतिलकाव लिकलिकापलितंभावुक[3]नभोविभागाः मदनहुतभुगंगारसदृशकमलभृंगार[4]मधुरससंगारचितमदभृंगारवविभवतुंगा[5]रहितमिथु नशृंगारसाः समुन्मिषद्वासंतिकामिषेणसीमंतिनीरतेरुदंतं[6]दुरंतंमनासिविचिंत्यरहसिवसंतंनृपंतमिवहसंतोवसंतोदयवासरामंदं मंदमरण्यांगणधरण्यांकमपिविकासमापादयामासुः ॥ प० ॥ किंशुकस्य[7]वदनेरुचिरत्वं[8]किंशुकस्यत्द्धृदयेऽपिवशित्वं ॥ किंशुक[9] स्यकुसुमेषुनदंतीशंसतिस्ममधुपालिरितीव ॥ ६९ ॥ कुरबकेरवकेलिभृतःसुधासमधुरंमधुरंमधुषट्पदाः ॥ पपुरवापुरवार्यम पिस्मयं[10]यंनृपवनेपवनेरितपादपे ॥ ७० ॥ ग० ॥अथास्मिन्नमुनातपोवनकुटीरपरिसरेपटीरगिरि[11]बंधुनागंधवह[12]स्तनंधयेनसन्निधिं

१ पल्लवतल्लजाः प्रशस्तपल्लवाः २ कलकंठाः कोकिलाः ३ पलितंभावुकः धवलीभवन्. ४ भृंगारः द्विमुखपानपात्रं झारीतिख्यातं. ५ तुंगः अधिकः अरहितानां युक्तानां मिथुनानां स्त्रीपुरुषाणां शृंगाररसः येषुते. ६ उदंतं वृत्तांतं ७ शुकस्य कीरस्य शुकाचार्यस्यच. ८ वशित्वं इंद्रियनिग्रहवत्वं. ९ किंशुकस्य पलाशस्य. १० स्मयं मदं. ११ पटीरगिरिः मलयाचलः १२ गंधवहस्य वायोः स्तनंधयः बालः मंदवायुरित्यर्थः तेन.

नीयमानोमद्रजः[1] परिग्रहस्तपस्यंतमपिमनस्यंतः कंपरितापसंपदानलिंपेदित्यर्थांतरमप्यलिगिराबोधयंत्या मिववनवासंत्यामयं क्षणादेवक्षितिपतिरिक्षुधन्वनो[2]लक्ष्यतामध्यरुक्षत् ॥ पद्यं ॥ परित्दृत्यतनुंचित्तेबाणंकामोमुमोचयत् ॥ अंतरेवातिरक्तो[3]ऽभूद्व्रण स्तद्बहिर्नृपः ॥ ७१ ॥ कंकेलिदेशमुपयाम्यधुनेतितावत्कंकेलि[4]संवलन कल्पितचित्रशोभं ॥ माद्याकरेणुरिवसाकमसौकरेण्वागू ढंययौकुरबकद्रुलतानिकुंजं ॥ ७२ ॥ शापंचमृत्युप्रदमग्रजातेस्तापंचपत्युः स्मरजंनिरीक्ष्य ॥ दूरेतरेऽस्मिन्[5]सुरतेपिदेव्यादोलायमानं त्दृदयंतदासीत् ॥७३॥ चाटुप्रयोगेचतुरः सपांडुः[6]प्रसूनतल्पेप्रविवेशितायाः ॥ क्षौमंबिभेदस्मरराजधानीक्षौमंकरांभोजदलेनतस्याः ॥ ७४ ॥ गद्यं ॥ तत्रतौराजदंपतीमुनिशापबलपरिचिंचिक्षयेव[7]मुहुर्मुहुरभंगुरालिंगनमंगलतरंगित[8]कुचकुंभसंभृतघर्मजलनिर्मितमद नयौवराज्याभिषेकमधरितमधुरसमधुरिमाधरबिंबचुंबनाडंबरविडंबितांबरचरकुटुंबिजीवन[9]मतिजवपंफुल्यमानधमिल्लविग

१ मद्रजः परिग्रहः, ममरजसां परागाणां परिग्रहः समुदायः, पक्षेमाद्रीपत्नीच २ इक्षुधन्वनः कामस्य ३ अतिरक्तः अनुरक्तः रक्तवर्णश्च ४ कंकेलयः अशोकवृक्षाः ५ अस्मिन् पांडौ ६ क्षौमं प्राकारं सूक्ष्मवस्त्रंच चतुरत्वात्राज्ञा कमलपत्रेणापि प्राकारभेदः कृतः इतितात्पर्यं ७ परिचिचिक्षया परीक्षितुमिच्छया ८ तरंगितौ प्रवृत्थौ ९ अंबरचर कुटुंबिनां देवानां जीवनं सुधा.

लदविरलबकुलमुकुलपुनरुक्तपुष्पतल्पमविगणितवीणागुणक्वणितमणितमसृणितमतिचिरप्रमुषितमसमशरसमरमुन्मीलयामा सतुः ॥ पद्यं ॥ आयुषः संततिंदीर्घामावहन्नपिपौरवः ॥ आयुषः संततेरंतमारुरोहरतेरिव ॥ ७५ ॥ नृपस्यदूरीकृतपाशसंगमंयं मविहायैकमुपेयुषोवधूं ॥ अजस्रमुरीकृतपाशसंगमोयमोपरः सन्निदधेलतागृहे ॥ ७६ ॥ आलिंगनेनकुरवोहरिणेक्षणानामामोदगौरवभृतोभुविसर्वएव ॥ तन्मध्यभागपितदासकथंनुपांडुरालिंग्यमद्रतनयामवधिंप्रपेदे ॥ ७७ ॥ निद्रयाकिलनिमीलितं मृतेर्मुद्रयानिजमुदीक्ष्यवल्लभं ॥ उद्रवाकरमुदस्यविव्हलामद्रराजतनयारुरोदसा ॥ ७८ ॥ तन्निशम्यसममेत्यकुमारैस्तादृशंप तिमवेक्ष्यरुदंत्याः ॥ भोजपुंगवभुवोश्रुनिपातैर्भूरपिस्वयममुंचतबाष्पं ॥ ७९ ॥ माद्र्यातातोनुमृतयासहतस्यराज्ञोनिर्वर्त्तितासुतनयैर्निखिलक्रियासु ॥ भूयोपितौसुमनसांपुरतः प्रकाशंजायापतीतुसुरतोत्सवमन्वभूतां ॥ ८० ॥ गद्यं ॥ तदनुनव्यवैधव्यबहु

१ प्रमुषितं लुप्तं २ आयुषः आयुर्नाम्नः राज्ञः पक्षेआयुष्यस्य ३ पाशः भवपाशः ४ यमं योगं ५ कुरवः कुरुवंश्याः कुरबकवृक्षश्च ६ आमोदः हर्षः सुगंधश्च ७ अवधिं नाशं स्त्रीणां आलिंगनेन कुरबकः कुसुमितोभवतीतिप्रसित्धेर्विरुत्धत्वादाश्चर्यं ८ निमीलितं कृतनेत्र संकोचं ९ बाष्पं अश्रु ऊष्माणंच. १० सुरतोत्सवं देवत्वेन आनंदं पक्षे विषयोपभोगेन आनंदं.

विधव्यथायाः पृथायाः पुरतो निर्मर्याद पितृशोक विदार्यमाणधैर्यसोदर्यजनपरिवार्यमाणायत्तद दिविदितनिखिलधर्म[1]जातायधर्म
जातायमहत्यामपिविपत्त्यांवैयात्येन[2]भवितव्यमितिराजनय[3]नांकुशंप्रकाश्यकाश्यपादयोदयोपेताः शतशृंगमुनिपुंगवास्तंगमणि
सौधशृंगसंकुलंकुलक्रमागतंकुरुनगरमेतानवतारयामासुः ॥ पद्यं ॥ मंदंमंदमुपेत्यतत्रसदयोमत्पांडुपुत्रांकुराः क्वेतिप्रेमपुरः प्रसा
रितकरः कुर्वन्दृढालिंगनं ॥ स्पर्शंस्पर्शंमिमान्निजांकगमितान्भ्रातुः स्मरन्कौरवश्च्योतद्भिर्नयनांबुभिः सविदधेलोकंनदी[4]मातृ
कं ॥ ८१ ॥ पांडवेषुदृढतापरिणाहप्राय[5]रूपबलसंपादियत्तां ॥ स्पर्शनंविदधतैवदृशांधः पाणिनापरिममौधृतराष्ट्रः ॥ ८२ ॥ द
त्वातत्तत्प्रत्यहंयद्यदिष्टंयावत्स्वेषामात्मजानांशतेपि ॥ पांडोः पुत्रेष्वंबिकासूनुरेतेष्वेकैकस्मिन्प्रेमतावद्बबंध ॥ ८३ ॥ गद्यं ॥ ए
वंवत्सभावेपिभक्तिमत्सुतेषुनिजपितृवत्सलतामसकृत्समीक्ष्यमत्सरेणदुर्मनायमानोदुर्योधनोत्हृदयालवालेराधेयप्रधानदुर्बोधन

१ धर्मजातं धर्मसमूहः २ वैयात्येन धैर्येण ३ राजनीतिः सैव अंकुशः आवरकःतं ४ नदीजल संपन्नं ५ प्रायं वयः.

मेधोत्[1]सेधसविधधरणीरुहमधिरूढामकुतोरोधांविरोधविषवीरुधमेधांचक्रे ॥ पद्यं ॥ तीव्रोदयानविनयान्‌दधतांक्रमेणदुर्योधना
द्यसुत्दृदांदुरहंकृतीनां ॥ पट्टाभिषेकमभिलष्यतिफालभागेकुट्टाकभावकुतुकंकुरुतेस्मभीमः ॥ ८४ ॥ पंचे[2]धाप्रवहंतीनांपवनात्मज
१० एवसः ॥ कौरवक्रोधसिंधूनांक्रमात्संगमभूरभूत् ॥ ८५ ॥ ॥ इत्यनंतभट्टकाविकृतौचंपुभारतेप्रथमः स्तबकः ॥ १ ॥

गद्यं ॥ एकदातुतेसर्वेपिसुपर्वसरितः सलिलेषुचिरंविल्दृत्यसमुत्तीर्णावीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विवपटगृहवाटेषु
परिगृहीतमनोहरांबरपटीरहाराभ्यवहाराः कुमाराः कुशलकु[3]शीलवबालककुल[4]परिशीलितविचित्रवादित्रक[5]लशीरवविवशी
कृतमानसाः सुखमासामासुः ॥ पद्यं ॥ रहसिनलिनतल्पेरत्नपर्यंककल्पेदिनविरतिसमीरैः सेव्यमानः सभीमः ॥ तटभुविकुसु
मानांतादृशैर्गंधपूरैरधिकमलसतायाहा[6]निदद्रौनिदद्रौ ॥ १ ॥ गद्यं ॥ अथनिशीथेतथाभूतस्यतस्यजिघांसयाकुरुनरेंद्रनंदनेनचो १०

१ उत्सेधः उन्नतः २ पूर्वं पंचापि पांडवाः कौरव क्रोधविषयः आसन् इदानींतु भीमएव तद्विषयोजात इत्यर्थः. ३ कुशीलवाः गायकाः ४ परिशीलितं अभ्यस्तं ५ कलशी वाद्यविशेषः ४ हानिदद्रौ हानिदाः श्रमहानिदाः द्रवः वृक्षाः यस्यां तस्यां.

दितै[1]र्नरेंद्रैरुपेत्ययुगपदेवझटिति[2]निभृतसमुद्घाटितेषुनियंत्रणपेटकेषु ॥ पद्यं ॥ सुतोपितृस्वादिमसंप्रदाय[3]शुशुत्सयेवश्वसनाशनें
द्राः ॥ समीरसूनुंसमुपेत्यजिव्हाबहिः प्रसारान्बहुशोवितेनुः ॥ २ ॥ सुप्तस्यतस्यतुसुयोधनभृत्यमुक्तावाताशनाश्वसकलावन
देवताश्च ॥ आ[4]शीर्द्वयंवपुषिचायुषिचप्रतेनुः पूर्वानतत्रचरमैवपुपोषवीर्यं ॥ ३ ॥ मर्मदत्तदशनाभुजंगमामारुतेर्वपुषिसु[5]प्ति
भूरुहः ॥ मुष्टिमेयतनवोविरेजिरेमूलिकाइवबहिर्विनिर्गताः ॥ ४ ॥ ग० ॥ अपरेद्युरपिपुनराजीवंतंनिद्रारुणनयनराजीवंतंस
मुग्धधीः स्निग्धइवसं[6]ग्धिकेलिकायामा[7]रालिककरदापितकवलनि[8]र्चोलितकरालगरलविव्हलंप्रव्हलंबिशिरसंरज्जुभिः परिणा[9]
ह्यपरिणाहिनीभिरसुत्हृदांत्हृदयशूलमपिशूलकीलितेनिर्जरसरिदंतर्जलेविसर्जयामास ॥ पद्यं ॥ तेषांतदानींधृतराष्ट्रजानांतीरेचनी

१ नरेंद्रैः विषवैद्यैः २ निभृतं गुप्तं ३ शुशुत्सया शोधितुमिच्छया ४ आशीः तालुगता जिव्हाआशीर्वादश्च ५ सुप्तिभूरुहः सुप्तिस्थान सन्निधवृक्षस्य. ६ सग्धिः सहभोजनं ७ आरालिकाः ओदनपाचकाः ८ निचोलितं आच्छादितं ९ परिणाह्यबध्वा.

रोदिविषत्ताटिन्याः ॥ मरुत्सुतंमारयितुंप्रवीरंसारागुणाः[1] साधनतामवापुः ॥ ५ ॥ गद्यं ॥ ततः पातालभुवितदागमनकौतुकि
नावासुकिनासंमानितःसधृतिमानितस्ततोष्टासुदिशासुतदनुगुणपरिगणनंदिनगणमत्ययशंकिभिरितरैरपत्यैः सहविचित्य[2]हाव
त्सरिपुभर्त्सनभमिक्कवानिषीदसीतिविषीदंत्याःकुंत्यानवममपिवासरमनवम[3]मेवसंजनयन्प्रभंजनभूरमृतांजनैखिद्दशौरंजयामास॥
आगतस्यतस्यमदावलायुतबलावहानांपृदाकुपरिवृढ[4]दापितदशाकलशपीयूषाणांनिषेवणेनविशोषितपरिपोषपात्रंगात्रंसवित्रीभु
जांतरइवसोदरकौरवल्हृदयेपिमोदविषादसंपदौनममतुः तदनंतरं ॥ पद्यं ॥ काष्ठांपरां[5]कार्मुककौशलस्यकाष्ठाः[6] परास्तानपित
द्यशोपि ॥ प्रज्ञादृगारोपायितुंप्रवृत्तो[7]व्यज्ञापयद्विष्णुपदीतनूजं[8] ॥ ६ ॥ गद्यं ॥ सोपिकृत्यविदामग्रणीरपरेणेवशरजन्मना[9]कृपेणबहु
कृपेणनिरवद्य[10]वीरयशसोनिषद्यां[11]चापविद्यामापाद्यापितांपुनरुक्तयितुंदिशिदिशिजैत्रगुणंपौत्रगणंमहताधनतिवहेनसहविविधध

१ साराः गुणाः विषदाः औदनिकाः दृढा रज्जवश्च पक्षे साराऽगुणा इतिसमस्तंपदं महादोषाः २ विचित्य आन्विष्य ३ अनवमं उत्तमं. ४ पृदाकुपरिवृढः पृदाकूनां सर्पाणां परिवृढः श्रेष्ठः ५ काष्ठां उत्कर्षं ६ काष्ठाः दिशः ७ प्रज्ञादृग् प्रज्ञाबुध्धिः सैव दृगृदृष्टिः यस्यसः अंधइत्यर्थः ८ विष्णुपदीतनूजं भीष्मं ९ शरजन्मना कार्तिकेयेन १० निरवद्यं निर्दोषं ११ निषद्यां क्रयविक्रयस्थानं.

नुरागमप्राणस्यद्रोणस्यचरणयोरुपहारांचिकार ॥ पद्यं ॥ सिंधुजात[1]कलशीभु[2]वोस्तयोः स्नेहभावमवलोक्यतादृशं ॥ तत्रपौरनि
करः समाचरच्चित्रपूरजठरेनिमज्जनं ॥ ७ ॥ कुमारास्तूर्णमारुक्षन्कुंभयोनेरनुग्रहात् ॥ [3]कोटींकोदंडसारस्यगुणिनस्तेगुणाइव
॥ ८ ॥ कूलस्थस्यानुकुर्व न्कुरुसुतसदसः कुंभयोनेः कदाचित्स्नातुंमध्येजलानांचिरकृतवसतेः सिंधुभू[4]वर्द्धमानः ॥ आदौपा
दौनिपीडयस्फुटकमलरुचौबिभ्रदंतेवसत्त्वं[5]ग्राहोजग्राहकश्चित्स्वयमपिविजयास्त्रागमां[6]तंमहांतं ॥ ९ ॥ गद्यं ॥ ततस्तेसर्वोत्तरा[7]
अपिशरासनेषुदक्षिणा[8]गुरुदक्षिणांकुरुतमह्यंद्रुह्यतोद्रुपदस्ययुधिबलाद्गृहीतस्यसमर्पणमितिगुरुणाचोदिताः सर्वेप्यहंपूर्विकयावि
मतेषुकृतावज्ञसेनंयाज्ञसेनंपुरंनिरुध्यचिरमयुध्यंत ॥ १० ॥ कृत्तेभलैर्धनुषिसगुरुद्रोहिणस्तस्यजीवग्राहेबाहांचलपरिचलत्खड्गव
ल्लीसहायः ॥ पुत्रावल्यांसुबलदुहितुः पूर्वपक्षीभवत्यां[9]सिद्धांतोभूद्विविभुविचबुधैः[10] श्लाघितः सव्यसाची ॥ ११ ॥ पार्थमेवपुर

१ सिंधुजातः भीष्मः पक्षेसिंधूनां समुद्राणां जातंसमूहः २ कलशीभूः द्रोणः अगस्त्यश्च ३ कोटीं पारं अग्रंच. ४ सिंधुभूः भीष्मः नदीप्रदेशश्च
५ अंतेवसत्त्वं शिष्यत्वं समीपवर्तित्वंच ६ विजयास्त्रागमांतं विजययुक्तानांअस्त्राणां आगमः शास्त्रं तस्य अंतंपारं पक्षे विजयस्य अर्जुनस्य अस्त्रस्य आगमेन
अंतनाशं. ७ उत्तराः उत्तर देशस्थाः श्रेष्ठाश्च ८ दक्षिणाः दक्षिणदेशस्थाः कुशलाश्च ९ पूर्वपक्षीभवत्यां असमर्थायां १० बुधैः देवैः पंडितैश्च.

तोनिधायतेपौरवास्तदनुसन्निधौगुरोः ॥ भक्तिभिर्व्यनमयन्निजंशिरः पार्षतस्तुपरिभूतिलज्जया ॥ ११ ॥ अथोगुरुर्नीतमधिज्य धन्वनापुरः प्रदेशंपुरुहूतसुनुना ॥ तरंगिताक्षंतमवेक्ष्यविद्विषंवचोगभीरंवदतिस्मसस्मितः ॥ १२ गद्यं ॥ रेरेक्षत्रियसत्तमपुरा महत्तरमग्निदेश्यमग्निवेश्यंमुनिमस्त्रपरिश्रमायप्रश्रयेणसहशुश्रूषमाणस्त्वंमत्कृतेपितुरनंतरंममाधिराज्यपदस्यप्रथममर्धंभवतेवि तीर्यततः परमर्धमहमनुभविष्यामीतियद्यथाप्रत्यशृणुथास्तत्तथानिर्वर्तितंखलुधिग्विप्रमितिक्षुरप्रवरप्रायेणविप्रियवचनेनप्रथीय सींममममनसिव्यथांवितीर्णवतार्णवरशनावतींवसुमतींस्वयमेवानुभवताभवता ॥ पद्यं ॥ आबालवृद्धंजडसक्तमेवजनाः समस्ताद्रु पदंयदाहुः ॥ तस्मात्त्वयिस्वीकृततादृशाख्येकथंनुभज्येतनमित्रतेजः ॥ १३ ॥ गद्यं ॥ इतिव्याजस्तुतिवचनेनपौरवांतेभार्गवांते वसताप्रधर्षितः पार्षतस्तेनसार्धमर्धराज्यपरिवर्तनमात्रमंगीकृत्यकृत्यविदांककुदस्तौजंभरिपुकुंभसंभवावुभावप्युपयममेवप्रवर्त्त

१ अग्निदेश्यं अग्नितुल्यं २ अग्निवेश्यं अग्निवेश्याख्यं ३ अधिराज्य पदस्य राज्यस्य पक्षे आधिराज्यपदस्येतिपदच्छेदः तत्पक्षे आधिराज्यमिति पदस्य शब्दस्य अर्धंआधिं मानसीव्यथा. ४ रशना कांची ५ जडसक्तं जलसक्तं मूर्खासक्तंच ६ द्रुपदं वृक्षस्यमूलं पक्षे द्रुपद संज्ञा ७ मित्रतेजः मित्रस्य सूर्यस्य सख्युश्चतेजः ८ ककुदः श्रेष्ठः ९ जंभरिपु कुंभसंभवौ जंभरिपु संभवः अर्जुनः कुंभसंभवः द्रोणः १० उपयमं विवाहं यमसमीपंच.

यितुंकृतनिवर्त्तनः सोम[1]कांतिकोपास्यौपुत्रौभागीरथीतटवनावसथस्ययाजस्यमुनिराजस्ययाजनानुग्रहेणपरिजग्राह ॥ पद्यं ॥ तातोपिधर्मतनयंतपनीयपीठमारोप्यचक्षु[2]रिवलब्धममुंतपोभिः ॥ आवर्जितैः कलशवारिभिरभ्यषिंचदानंदबाष्पसलिलैरवनिंच पौराः ॥ १४ ॥ आबिभ्रतोधरणिमंगदनिर्विशेषंनानाधनायतिभिरस्यनयोदिताभिः ॥ पस्त्यं[3]समस्तमपिवासवसन्निभस्यकोशी[4]बभूवकुतुकैः सहकौरवाणां ॥ १५ ॥ पारेसिंधुप्रथितममितंप्रत्यहंवर्धमानंसोढुंपार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् ॥ प्रीतो राजाप्यनुजतनयप्रेममार्गेप्रयातुंमातुर्दोषादिवबहिरगादंतरप्यंधभावं ॥ १६ ॥ गद्यं ॥ तदनुसौबलीजानिरसौबलीयसामर्षेणध र्षितः सहजविनयंधर्मतनयमाहूयकृतावहित्थो[5]गिरमित्थमुत्थापयामास ॥ वत्ससंप्रतिवारणावतंपुरमुपेत्यवारणाननगुरोरुत्सवं वारणायविपदांनिषेव्यसहानुजैस्तत्रवास्तव्योगिरापौरजनभुवास्तव्योनिरवधिसुखेनानुशाधिवसुधामिति ॥ पद्यं ॥ तस्याशयं

१ सोमः चंद्रः शिवश्च. २ अंधस्य नेत्रलाभः परमसुखदः तद्वदस्यापियुधिष्ठिरलाभइत्यर्थः ३ पस्त्यं गृहं. ४ कोशीबभूव भांडारंबभूव संकोचीबभूवच. ५ अवहित्थाआकारगोपनं.

त्वद्विदन्नपिधर्मसूनुस्तातस्यवाचमविलंब्यतथेत्यगृण्हात् ॥ तत्तादृशेषुगुरुशासनपालनेषुकूलंकषंगुणगणेनकुलंहिपूरैः ॥१७॥ धर्मभूरनुजैः साकंतद्गिरातत्पुरंययौ ॥ कर्मचोदनयाजीवः कायमन्यदिवेंद्रियैः ॥ १८ ॥ सविनयमथदर्शितंमहीयः सचिववरेण पुरोचनेनशत्रोः जैतुगृहमभजंततत्रपार्थाजगदिवनूत्नमशेषवस्तुपूर्णं ॥ १९ ॥ तत्रतेविदुरभृत्यभाषितैः सौबलेयैशतमन्युहेतुना ॥ पंचैतामपिपरांधंनंजयप्रापणेनजतुधाम्निमेनिरे ॥ २० ॥ शिशमयिषुरपिद्विषांसमंत्रीनिभृतशरारुरिमान्निगूढभावान् ॥ अवसरमनलावृतेनिकेतेप्रतिदिनमेर्धयितुंप्रतीक्षतेस्म ॥ २१ ॥ गद्यं ॥ जातुचिदपत्यैः सहपंचभिर्भृत्यभावमिषादमीषामामिषेषुविषंनिनीषंत्यानिषादयोषितइवतस्यपुरोचनस्यनिद्रायामपिद्राघिमाणंदातुकामेनतत्रसद्मनिक्षणदायामाशुशुक्षणिंक्षणान्निक्षिप्यजननीसोदरजननीचेतंरंसंवेशसुखर्माणमंचायमानभुजशिखरसीमेनभीमेनविदुरकिंकरकृतालिंगयासुरंगयानिर्जग्मे ॥ पद्यं ॥ पार्थ

१ कूलंकषंपूर्णं. २ जतुगृहं लाक्षागृहं. ३ सौबलेयशतमन्युहेतुना सौबलेयः दुर्योधनः सएवशतमन्युः इंद्रः हेतुः कारणंयस्यतेन. ४ पंचतां पंचसख्यां मरणंच. ५ परां अन्यां. ६ धनंजयः अग्निः अर्जुनश्च. ७ निभृतशरारुः गुप्तघातुकः ८ एधयितुं वर्धयितुं काष्ठानिकर्तुंच. ९ आशुशुक्षणिं अग्निं. १० संवेशः निद्रा. ११ सुरंगया भूतलांतर्गतगुप्तमार्गेण.

द्विषांविग्रहमेकमेकंविभज्यसप्तापिशिखाः कृशानोः ॥ स्वीकृत्यतृप्ताः स्वशिरः प्रकंपैः श्लाघिरेतत्रसमीरसूनुं ॥ २२ ॥ प्रप
श्यतांपौरनृणांप्रभातेसांक्रामिकंरोगमिवाभितापं ॥ आबिभ्रतामश्रुभिरेवशांतिरापादितत्राग्निहठात्क्रियायाः ॥ २३ ॥ तत्रालये
दग्धतनूनथैतान्निश्चित्यपार्थान्निजचारवाचा ॥ दुःखापदेशेनसुयोधनाद्याः संमोदबाष्पंससृजुः सभायां ॥ २४ ॥ गद्यं ॥ तावत्सो
पिगंधवहसूनुरंधतमसधुरंधरंसक्थिजवसमुत्थितमरुदुत्पाटिततरुविटपवसतिविघट्टनसमुद्भ्रांतशकुंतकुलबद्धनिध्वानमध्वानं
विलंघ्यकस्यचित्काननकासारतीरतरोरधिपरिसरमेतानवतार्यतदीयपरिरक्षणजागराविचक्षणः क्षणमवतस्थे ॥ पद्यं ॥ तत्रका
पितरुणीतडिदाभातंययौजतुगृहेसुहितेन ॥ चूषणायतमसांवनमार्गेचोदिताहुतवहेनशिखेव ॥ २५ ॥ अधरोष्ठविभागरेखिका
सुदृशोस्यावदनेस्तिवानवा ॥ इतिसात्द्ददितस्यसंशयंपरिमार्ष्टुंकिलमौनमत्यजत् ॥ २६ ॥ एनांप्रशास्तिभुजयावनराज्यसीमामे

१ विग्रहं शरीरं. २ सांक्रामिकं सांसर्गिकं. ३ सुहितेन तृप्तेन. ४ चूषणाय शोषणाय.

कः स्वयंनरभुजामृषभोहिडिंबः ॥ अर्द्धांशभाक्जनवधेसममंतकेनतुल्याभिधानपदयास्वसृमान्मयायः ॥ २७ ॥ वीतशंकमिहते ऽद्यतिष्ठतः कीदृशंककुद[1]मित्ययंमम ॥ चित्तरंगभुविनृत्तकौशलीमुत्तरंगयतिचित्रलासकः ॥ २८ ॥ रुधिरंपातुकामेनतेनवोहंतु मीरिता ॥ अधरंपातुकामाहमस्मितेरूपसंपदा ॥ २९ ॥ अद्यतेसविधमापतेदसौल्हद्यमेतदुचितंवचः शृणु ॥ मारणंरिपुषुतन्व तामुनामारेणं[2]कुरुमहान्बलेनसः ॥ ३० ॥ उपयाम[3]विधौत्वरस्वमेकृपयामारशराः शरावः ॥ दिविवाभुविवाथदिक्षुवारमयेत्वा मुपनीयरंहसा ॥ ३१ ॥ इत्येनांभाषमाणांरजनिचरपतिः क्रोधलिंगैस्फुलिंगैर्दग्ध्वेवाक्ष्णोरभीक्ष्णंस्फुटघाटितभुजास्फोटवाचाटिता शः ॥ बिभ्राणोबभ्रु[4]कैश्यंत्वमिहवससिकोमृत्युवक्त्रार्धजग्धोदुर्बुद्धेतिष्ठयासिक्कपुनरितिगिरामेदुरः प्रादुरासीत् ॥ ३२ ॥ तस्मिन् रक्षांसि[5]नेदिष्ठे[6]तादृक्षपरुषाक्षरे ॥ अपमृत्युरिवोदस्थादनिलस्यात्मसंभवः ॥३३॥ वृक्षेणवृक्षंगिरिणागिरींद्रंहस्तेनहस्तंवचसावचश्च॥

१ ककुदं धैर्यं २ मारणं मेतिरणामिति पदद्वयं ३ उपयामः विवाहः ४ बभ्रु पिंगलवर्णं. ५ रक्षसीतिक्लीबत्वनिर्देशेन भीमस्याग्रे तस्य दौर्बल्यं व्यज्यते ६ नेदिष्ठे अंतिकतमे

परस्परेणप्रतिरुध्यघोरंसमीकमेतौसममादधाते ॥ ३४ ॥ स्वसुः समक्षंस्वयमेवमुष्ट्याबलंबिडौजाइववज्रसख्या ॥ हिडिंबमेनंय मराजधानीकुटुंबिमुख्यंकुरुतेस्मभीमः ॥ ३५ ॥ गद्यं ॥ तदनुतिमिरकदंबेनेवहिडिंबेननिर्मुक्तात्तस्मादहर्मुखादिववनमध्यात्सं ध्ययेवसरागयातयाकमलपालिकयासहतपनभानवइवराजसूनवस्तेनिष्क्रम्यशालिहोत्रमुनेः सदसिवीतिहोत्रभासंव्यासंभगवंत मासेव्यतत्रतन्निदेशादहानिकानिचिदतिवाहयांचक्रुः ॥ ५० ॥ पुत्रंतत्रघटोत्कचंपवनभूसंगादनंगातुराप्राप्तंसर्वगुणैर्मनोजवस तांप्रासूतनक्तंचरी ॥ कुर्यांवः स्मृतएवकर्मसुहरेः शक्तेरपिस्रंसनामित्युक्त्वासपितॄन्न्यथाभिलषितंयुक्तस्तयानिर्ययौ ॥ ३६ ॥ गद्यं ॥ ततस्तेवन्याशनैर्धन्याधारितवसुधासुधाशनाकृतयः प्रावृषमिवबकबलाक्रांतांपातालजगतीमिवप्रत्यहंवर्धमानबलिशोकामंग राज्यसीमामिवसूर्यतनयानुकूलप्रतिष्ठांरविरथाक्षधुरमिवैकचक्रांपुरींक्रमादाक्रम्यकस्यचिद्द्विहमेधिनोगृहमध्यमेत्यसुखमध्यवा

१ सरागया प्रीतियुक्तया आरक्तयाच. २ कमलपालिकया हिडिंबया. ३ मनोजवसतां पितृसमत्वं. ४ वसुधासुधाशनाकृतयः वसुधायां पृथिव्यां येसुधाशनाः देवाः ब्राम्हणाइत्यर्थः तेषां आकृतिः धृता यैस्ते. ५ बकबलाक्रांतां बकासुरस्य बलेनशक्त्या अधिष्ठितां पक्षेबकाः बकपक्षिणः बलाः वायसाश्चतैः व्याप्तां. ६ बलिः दैयः दैतेयश्च. ७ सूर्यतनया यमुना पक्षेसूर्यतनयः कर्णः ८ एकचक्रां एकचक्रबर्तीं पक्षेतन्नाम्नीं.

त्सुः ॥ पद्यं ॥ भिक्षामटाद्भिरथतत्रपृथातनूजैरर्धंविभज्यपृथगर्पितमन्नराशेः ॥ आकंठमभ्यवहरन्नखिलैः प्रतीकैः[1] पुत्रोबभूवमरुतः पुनरुक्तपोषः ॥ ३७ ॥ तत्रतत्रद्विजैरेतेपृष्टानाशंपृथाभुवां ॥ इत्यूचुर्वयमत्रैवविघ्नस्तेषांतुसंस्थितिं[2] ॥ ३८ ॥ यक्षेणकेनापिहतोहिडिंबइतिब्रुवाणेषुमिथोद्विजेषु ॥ आकूत[3]गर्भंहसितंसगर्भ्याश्चक्रुर्मुखंवीक्ष्यसमीरसूनोः ॥ ३९ ॥ गद्यं ॥ एकदासायमंतर्गृहेनिरवग्रहंनिष्पतद्भिर्बाष्पैस्तरंगितोत्तमांगमपत्यमुत्संगभुविपुरोधाययातुधानापराधभयानुरोधिनमंदितंक्रंदितमुत्सृजंतींकुंतीसमुपसृत्यविषादनिदानंविप्रायतांक्षी[4]मप्राक्षीत् ॥ सापितांकृपालुतयात्वद्दिलगद्गदां[5]गद्गदाक्षरमाचचक्षे ॥ पद्यं ॥ साधयेयमितिधर्मसंग्रहंसंदधातिमिथुनंपरस्परं ॥ आधयेपरमनेकजन्मनोरावयोरजनिपापसंग्रहः ॥ ४० ॥ अयिकिंब्रवीमिपरिपाकमंहसामतिभीषणोबकइतिक्षपाचरः ॥ स्वसुरादरात्स्वयमिवागतोयमोयमुनावनांतमवलंब्यवर्तते ॥ ४१ ॥ माभून्नाशोयुगपदितिनोभीरुभिर्जातु

१ प्रतीकैः अवयवैः २ संस्थितिं स्थितिं नाशंच. ३ आकूतं अभिप्रायः ४ विप्रायताक्षीं विप्रस्य आयताक्षीं दीर्घनेत्रां स्त्रियं. ५ लगद्गदां संजात त्वद्रोगां.

पौरैः पूर्वैर्लब्धावसरमसकृत्प्रार्थनाभिः प्रक्लृप्तं ॥ एकैकस्मिन्नहनिवितरत्येकमेकंपुमांसंकृत्वातस्मैबालिमिहजनस्तुंगमन्नस्यराशिं ॥ ४२ ॥ तादृशः प्रलयकालकठोरोवासरः सतुममालयभूमेः ॥ द्वारितिष्ठतिबकात्परितुष्टात्पारितोषिकमिवाद्यजिघृक्षुः ॥४३॥ बालानिवप्रवयसोपिनराशनोयंभुंजीतचेन्ममसएवहिपुण्यपाकः ॥ बालेनभाव्यमितितद्बलिपुव्यवस्थाकंठेपुनः कलयतेक्रकचस्यधाटीं ॥ ४४ ॥ संतानमूलमिदमेकमपत्यमास्तेसंवर्त्तकालसहजश्वसराक्षसेंद्रः संभूयतेचसमयः क्षपयामहत्यासंतार्यतांकथमियंसखिमेविपत्तिः ॥ ४५ ॥ ग० ॥ इत्युदीर्यसरभसावगाहनत्दृदयसमुत्कूलितशोकसरः पूरमिवनयनसलिलंविशृंखलंखेलयंत्यैतस्यैतनयेषुद्वितयिः समरेषुद्वितीयः सुतः सखिमयातेदीयतेसएवतत्प्राणनाशनेबलीभविष्यतिमाभैषीरितिसानरदेवमाहिषीप्रत्यश्रौषीत् ॥ पद्यं ॥ अनयोरथदंपत्योरश्रुहेतोः शुचः पदे ॥ आनंदस्यातिरेकोभूदादेशइवतत्क्षणं ॥ ४६ ॥ तमिमंप्रसुवारहस्युदंतंगदितोवायुसुतोबलावलेपात् ॥ मनसानबकंलिलेहरात्र्यामनसाधारितमन्नराशिमेव ॥ ४७ ॥ गद्यं ॥ अपरेद्युरखिलजना

१ पारितोषिकं संतोषेण यद्दीयतेतत्. २ क्रकचस्य करपत्रस्य करवतइतिप्रसिध्धं. ३ महत्या दुखनेदीर्घया. ४ समुत्कूलितः कूलमतिक्रांभतः ५ प्राणनाशने प्राण्यते जीव्यते अनेनेति प्राणनं यदशनं पक्षेप्राणानांनाशने. ६ वलीभाविष्यति देयोभागः भविष्यति पक्षेबलाद्यः ७ उदंतं वृत्तांतं. ८ अनसा शकटेन.

नंदकरेभगवतिदिनकरेमंदेहे[1]कुलमवस्कांदितुमुदयगिरिशिखरमधिरूढे ॥ पद्यं ॥ सशाकटमधिरुह्यभीमसेनोदधिकलशीकुलशेखरान्नराशिं ॥ बकभवनवनंविवेशशाखा[2]नगरमिवांतकवीरराजधान्याः ॥ ४८ ॥ कंकालोच्चयकल्पितांतकचमूशाटीकुटीविभ्रमेतत्रक्रुद्धतदौपवाह्यमहिषश्वासोग्रचक्रानिले ॥ गृध्रध्वांक्षसृगालघोषविकसद्रक्षोपदा[3]नस्तवेभुंजानः शाकटस्थएवसतदाचक्रेमहत्क्ष्वेडितं ॥ ४९ ॥ गद्यं ॥ सोपितदिदंनिशाम्यबलिपुरुषविशेषभारमंदितशाकटागमेनप्रथममेवकृतोन्मेषंरोषंद्विगुणयन्गिरिकंदरमंदिरमुखात्सरभसंविनिर्गत्य ॥ पद्यं ॥ एवंकोवापराध्नोत्यमुमविगणयन्बाहुमत्रेऽतिघुष्यन्व्यक्तोरोरक्तरेखाकृतबिरुदजगद्धातुकत्वप्रशस्तिः ॥ क्रोशन्मर्त्यांगखादत्वरणपरिचलत्सृक्कलग्नास्थिदंडस्थूलेदंष्ट्रेदधानः पवनभुवमभिप्राद्रवद्यातुधानः ॥ ५० ॥ निजभुजयुगलीनि[4]र्यंत्रणाभिर्नियमितयत्नपरस्परावुभौतौ ॥ नि[5]गडितनयनंनिलिंपपंक्तेर्निरवहतांनिपुणंनि[6]युद्धशिल्पं ॥ ५१ ॥

१ मंदेहाः राक्षसाः २ शाखानगरं वाडीतिप्रसिध्दं. ३ अपदानं कृतंकर्म. ४ नियंत्रणाभिः नियमनैः ५ निगडितनयनं बध्दनेत्रं. ६ नियुध्दं बाहुयुध्दं.

पुत्रस्यवायोर्भुजदौर्ललित्यंबकंवनेतत्रचिरंचरंतं ॥ निन्येदशांकामपिराक्षसस्त्रीनेत्राभ्रवर्षर्तुविलासयोग्यां ॥ ५२ ॥ तंविकृष्यपुर सीम्निनिशीथेतत्क्षणात्कु[1]णपमर्शनदोषं ॥ मार्ष्टुकामइवमारुतसूनुर्मातुरंघ्रिमुपसेवितुमागात् ॥ ५३ ॥ आलोक्ययातुशवमेतद शेषपौरैरन्होमुखेपरवशीक्रियतेस्मचेतः ॥ आश्चर्यपूरपरिमेलनफेनिलाभिरानंदसागरतरंगपरंपराभिः ॥ ५४ ॥ भवनमेत्यतदागृह मेधिनः पवनजेप्रवणीकृतमूर्द्धनि ॥ प्रयुयुजेसममाशिषमक्षतैः प्रमुदितः पुरितत्रमहाजनः ॥ ५५ ॥ निशिजातुनिकेतवेदिका यानिकटेसुप्तिसुखंनिषेव्यपार्थान् ॥ पथिकोपररात्रजागरूकः प्रबभाषेगिरमीदृशंप्रसंगात् ॥ ५६ ॥ पांचालिकांयुवमनोरथरत्न सौधपांचा[2]लिकांत्वदिममेतिममेतिकृत्वा ॥ अद्यस्वयंवरमहै[3]ायनृपाः प्रयांतिदूतैः समंद्रुपदभूपतिराजधानीं ॥ ५७ ॥ भोकुम न्नमपिसूपसमग्रंदोग्धुमप्यभिनवप्रसवागाः ॥ लप्स्यतेद्विजगणोपिचतस्माद्वत्सलाद्दुहितुरुत्सवकाले ॥ ५८ ॥ नहितत्रभवेदपा[4] र्थताविजै[5]यः सिद्धिमुपैष्यतिस्फुटं ॥ युगप[6]त्सुखमस्तुवोमहत्द्रुतमागछततन्महौजसः ॥ ५९ ॥ इतिवाचमुप[7]श्रुतिंद्विजातेर्द्दादिक्

१ कुणपः शवं. २ पांचालिकां पुत्तलिकां ३ महाय उत्सवाय ४ अपार्थता व्यर्थत्वं पांडव राहित्यंच ५ विजयः गमनोद्योगः अर्जुनश्च ६ युगपत् पंचानाम पित्रिप्राप्ति सुखं एकस्मिन्नेवकालेभवतुइतिगूढाशीः ७ उपश्रुतिं शुभशकुनं.

त्वासुधयैवनिर्मितांतां ॥ पथिभूसुरयूथमध्यभाजः प्रतिपांचालपुरंप्रतस्थिरेते ॥ ६० ॥ गद्यं ॥ तेपुनरनेकदिननीतजनपदवन सीमानः पथिकृतोदयेनंभगवतापराशरदायादेनजतुसदनपरिच्यवनेनवोनवोहर्षः पार्षतस्यसमुन्मिषतीतिगिराऽनुगृहीताः साक्षात्प्ररोहताभुजप्रतापानलेनेवफाल्गुनकरवल्गितेनमहताऽलातेतेजसानिशि नितांतसीमं तितसंतमसयापदव्यात्रिविष्टपतटिनीं प्राविक्षन् ॥ तत्रखलु ॥ पद्यं ॥ इंदीवरात्प्रतितरंगमनुप्रविष्टैर्बिंबैरिवाब्धिदुहितुस्तरुणीकदंबैः ॥ क्रीडन्समंपयसिचित्ररथोविलोक्यपार्थान्रुरोधकुपितः प्रधनंचिकीर्षुः ॥ ६१ ॥ अस्त्रमात्मसमनामदैवतंसंप्रयुज्यसमरेधनंजयः ॥ तत्रतस्यरथमग्रवर्तिनंजातुषालयसहायमातनोत् ॥ ६२ ॥ गंधर्वाणांपत्युर्गर्वजुषः सौरसैंधवेतस्मिन् ॥ पार्थासिभंगः शिशिरोरोधसिभंगस्तुतापहेतुरभूत् ॥ ६३ ॥ सख्यस्यलाभात्सपदिप्रत्दृष्यन्कुशीविलेंद्रः कुरुनंदनानां ॥ प्रादर्शयत्स्वांप्रथमंविनीतिंपश्चादमीषांपदवींचर

१ दायादेन सुतेन २ परिच्यवनेन निर्गमनेन. ३ अलातं साग्निकाष्ठं ४ प्रधनं युद्धं ५ आत्मसमनाम आत्मना समंनाम धनंजयेति यस्य अन्यस्त्र मित्यर्थः ६ जातुषालयसहायं लाक्षागृहसमं दग्धमित्यर्थः ७ सौरसैंधवे सुरसिंधोः भागीरथ्याः संबंधिनि ८ भंगः पराभवः लहरीच.

म्यां ॥ ६४ ॥ धर्मभूरथसहोदरैः समंधौम्यमध्वनिसमीक्ष्यविश्रुतं ॥ प्राणिनामयमहिंसकोऽपिसन्पादपीडनममुष्यक्कप्तवान् ॥ ६५ ॥
यथातिथ्यविधौप्रीतः सपुरस्कुरुतेस्मतान् ॥ तथाध्वगमनेतेऽपितंप्रश्रयवशंवदाः ॥ ६६ ॥ धौम्यस्यसुधामधुरिमधौरेयीभिः स्वयंवर
कथाभिः ॥ द्रुपदपुरसरणिरेषांद्वित्राण्यभवत्पदानीव ॥६७॥ भूदेवेषुतिनिबिडेषुमध्यभाजांपंचानामपियुगपत्पृथासुतानां ॥ पुस्फोर
द्रुपदपुरंपुरः प्रदेशेवक्राब्जेसरभसमक्षिदक्षिणंच ॥६८॥ कुमारिकायाद्रुपदस्यभूपतेः कुचोपमाद्रव्यमिवाभिवीक्षितुं ॥ कुरूद्वहास्त
त्रपुरेकुतूहलात्कुलालगेहंप्रथमंसमाविशन् ॥ ६९ ॥ तामागमन्नथपुरींशतशः ससैन्यास्स्मारंयुगोदयमिवाद्भुतमावहंतः ॥ भूपा
स्तुताभुजमुदस्यपठद्भिरग्रेपद्यंनिबद्धबिरुदंपटुबंदिवृंदैः ॥ ७० ॥ द्यावाभूमीनिरुंधन्यदुबलरजसांश्रेणिभिः सीरपाणिर्वेगादाग
त्सवीरः स्वविनयगुरुणाशौरिणान्वीयमानः ॥ आहारश्चायुधंचद्विषदवमतयेयेनसंसेव्यमानेतेद्वेहालाहलत्वंरणभुविवहतोना

१ पादपीडनं पादपीडां पादसंवाहनंच २ पुरस्कुरुतेस्म आतिथ्यंचकार पक्षे वचन विपरिणामेन अग्रेअकुर्वन्. ३ स्वविनयः स्वाभाविकः विनयः
४ हालाहलत्वं हालामद्यंहलंसीरं तयोर्भावः हालाहलत्वं विषत्वंच.

मतः कृत्यतश्च ॥ ७१ ॥ बिभ्राणोमणिदीप्तकुंडलधरंकर्णत्रयंपार्श्वयोरग्रेचातिमनोज्ञरूपमखिलेष्वंगेषुदुर्योधनः ॥ सेनादुंदुभिना
दतुंदिलनभाः स्वस्यानुबिंबायितैरासीदत्सनवाधिकैः परिवृतप्रांतोनवत्यानुजैः ॥ ७२ ॥ तदनुपरितः कीर्णैः पुष्पैस्तरंगितसौ
रभंमणिमयमहामंचारूढावनींद्रपरंपरं ॥ अगरुजनितैर्धूपैरालिह्यमानवितानकंस्वनितपटहंप्रापुः पार्थाः स्वयंवरमंडपं ॥ ७३ ॥
जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्ययप्राप्तेंदीवरनित्यवासघटितश्यामप्रभाश्रीरिव ॥ पांचालस्यसुताततःपरिजनैः सा
र्धंपुरः पश्यतांराज्ञांबुद्धिमिवाधिरुह्यशिबिकांरंगस्थलींप्राविशत् ॥ ७४ ॥ द्रौपदीमुखशशिद्युतिसंपत्कौमुदीमहतिरंगतटाके ॥
पक्ष्मचक्रयुगुलंनृपतीनांतत्क्षणंविजघटेबहुदूरं ॥ ७५ ॥ तांपश्यतस्सदसितस्यमहीसुराणांवामेतरेमहतिवासवनंदनस्य ॥ अंत
र्बलस्यसपदिप्रकटीबुभूषोरुद्वल्गनंकिलभुजेस्फुरणंबभूव ॥ ७६ ॥ गद्यं ॥ तावत्सरभसंसमुपेत्यसाक्षाद्दादेष्टुमनाः प्रद्युम्नइवधृ
ष्टद्युम्नः सायकैः सार्कसकाशमुपनीतंस्वयंवरदिदृक्षयासपरिवारंप्रत्यासन्नमिवपन्नगपतिंचापंपुरस्कृत्यकन्यावलोकनधन्यान्रा

१ कर्णत्रयं द्वौकर्णौ राधेयश्च २ अंगेषु देशविशेषेषु अवयवेषुच. ३ चक्रयुगुलं चक्रवाकयुग्मं ४ उद्वल्गनं उद्गमनं.

जन्यानेवमवादीत् ॥ पद्यं ॥ बाणेनसंप्रतिनृपादिविलक्ष्यमेतत्तच्छायवद्भुविनिपातयितुंपटुर्यः ॥ मौर्वीमिमामिवसदाक्षिणएवपा
णौकुर्यात्स्वसारमभिदर्श्यममस्वसारं ॥ ७७ ॥ इत्थंप्रगल्भमुदितारभसेनपीठादुत्थायचापमुपसृत्यकरेपिकृत्वा ॥ आत्मानमेव
कृतयत्नमनैषुरार्तिंमौर्वीलतांनतुमहीपतिपंक्तयस्ताः ॥ ७८ ॥ दृष्ट्वाथराजकमिदंद्विजसंघमध्यान्निर्गत्यसंसदिनिलिंपपतेः कुमा
रः ॥ चापेशरंकरधृतेसमधत्तलज्जांभूपेषुभूरिकुतुकंपुरुषेंद्रपुत्र्यां ॥ ७९ ॥ वीरेणतेनविशिखेनविलूनमूलंचक्रभ्रमेणपतयालुतदा
शरव्यं ॥ अस्मिन्समाजवलयेत्वयमेवदोष्मानित्याहिताभिनयलीलमिवाबभासे ॥८०॥ निष्पतत्सुरकरांजलिपुंजात्पुष्पवर्षमभितः
कुरुवीरं ॥ मंदहासइतिविक्रमलक्ष्म्याः संदधेसकलचेतसिबुद्धिं ॥ ८१ ॥ पांचालपुत्रीप्रहिताः कटाक्षाः पांडोस्तनूजंपरितोव
वल्गुः ॥ मांगल्यमालावतरेदिहेतिमाध्वीलिहः पूर्वमिवोपयाताः ॥ ८२ ॥ जनंनांतरनेत्रवारिसृष्टत्रिपथाहेमपयोजगुंफितेव ॥ बल

१ तस्यछायातच्छायं तद्वत् २ स्वसारं स्वस्य सारंबलं पक्षेस्वसारं भगिनीं ३ आर्तिं पीडां धनुष्कोटिंच पंक्तयः इतिस्त्रीत्वनिर्देशेन पराक्रमाभावः सूचितः
४ शरव्यं लक्ष्यं. ५ माध्वीलिहः भ्रमराः ६ जन्मांतरे अस्याः रोदनेन भागीरथ्यां पतितैर्नेत्राश्रुभि र्हेमकमलानि उत्पन्नानीतिकथा सापेक्षेय मुत्प्रेक्षा.

वैरिभुवस्तयाधिकंठंवरणेचंपकमालिकावितेने ॥ ८३ ॥ गद्यं ॥ तदनुसमहावीराग्रेसरः समग्रगुणं[1]शेखरितांनरपतिसुतामिवश
रासनलतामुद्वेहन्[2]राज्ञांबलमवज्ञायसभांगणात्क्षणान्निश्चक्राम ॥ तदा[3]त्वएवखलोऽयमखिलानस्मानतिस्मयेनविस्मरन्कस्मैचि
द्दुहितरंविप्रायप्रायच्छदितिद्रुतंद्रुपदायद्रोहमुन्निद्रयतः कतिचनराजन्यान्जं[4]न्याभिमुखान्प्रतिसुलभोन्मेषेणरोषेणसरभसभुजोन्नी
तैरुपवीतैः कंठमावेष्टयममायंयष्टेर्ममायांविष्टरस्यलक्ष्यमितिवचनेनजातिचापलंकुर्वाणान्धरणिगीर्वाणान्भवतांपुनराशिरिवजय
राशीकरणायालमितिसस्मितंनिवर्तयन्नमर्त्यपतिकुमारोऽपिसमारोपितधनुर्गुणनिरर्गलनिर्गलितेनशरनिकरेणतेषांपरेषामधिकां
दिशिदिशिकां[5]दिशीकतांदिदेश ॥ तावदस्यराजसंघस्यजंघालतामनुकुर्वद्भिरिवरथार्वद्भिरपरार्णवाभ्यर्णमवतीर्णवतितूर्णमर्णो[6]
जबंधौतेननिहितांदीप्तिमपरामिवतांदयितामनुरंजयन्नयमपिधं[7]नंजयस्तामेववासभुवमाससाद ॥ पद्यं ॥ स्वेदांबुभिर्निटिलजैः

१ गुणः मौर्वी सौंदर्यादिश्च २ उद्वहन् वहन् विवाहंकुर्वन् ३ तदात्वे तत्काले ४ जन्यंयुत्धं ५ कांदिशीकः भयपलायितः ६ अर्णोजबंधौ सूर्ये ७ धनंजयः अर्जुनः अग्निश्च.

पदयोःसवित्रीमार्द्रीचकारसतयासहचापपाणिः ॥ मोदांबुभिर्नयनजैस्तमियंचमौलौविस्मेरचेतसिकुलालवधूसमाजे॥ ८४॥ कुवल
यदृशः कुंभंजिग्युः कुचैरितिभाषितैः करिवरशिरः कर्मेत्येवप्रत्दृष्टमनाश्चिरं[1] ॥ द्रुपददुहितुर्दृष्ट्वातुंगौकुलालपतिः कुचौनिजमपि
घटंनिश्चित्यैवंनितांतमलज्जत ॥ ८५ ॥ अन्येद्युर्गृहमुपनीयपूजितांस्तान्व्यासोक्त्यावििदितवरः पुरामरातेः॥ पंचापिक्षितिपतिनं
दनान्सुतायाः पांचालोनिशिपरिणीतयेऽनुमेने ॥ ८६ ॥ गद्यं ॥ ततः परमीदृशोत्सवश्रवणात्परमानंदमनुभवंतीभिरंतः पुरि
काभिः परिवृतांतांसखीजनामंडनमंडपिकामुपनीयप्रसाधयितुमारभंत[2] ॥ पद्यं ॥ द्रौपद्याः पंचपत्नीत्वेद्रष्टुंलिपिमिवोत्सुका ॥
सीमंतशिल्पव्याजेनशिरोजान्व्यभजत्सखी[3] ॥ ८७ ॥ मृगमदतिलकंरराजतन्व्यामुखशशिनामहसाबलात्हृतायाः ॥ चिकुरमिष
जुषोऽपराधशांत्यैनमितमपत्यमिवांधकारबंद्याः[4] ॥ ८८॥ अधिनासिकाशिखरमाकलितंनवमौक्तिकंनरपतेर्दुहितुः॥ शुशुभेमुखांबु
रुहमध्यचरस्मितहंसिकाजनितमंडमिव ॥ ८९ ॥ सुतरांजनमोदमादधातेसुदृशोमौक्तिकरत्नकर्णपत्रे ॥ परिचेतुमिवाननेंदुसेवां

१ एवंकर्मइति २ प्रसाधयितुं अलंकर्तुं ३ सीमंतः केशवेशः ४ बंद्याः कारागृहवासिन्याः

परिवेषस्याशिशूसमीपभाजौ ॥ ९० ॥ ताटंकेतरलमणिप्रभातरंगेतन्वंग्यामुखमभितस्तदाव्यभातां ॥ मूर्त्तत्वंप्रकटमुपेत्यजागरूकेवर्णेंद्वेनयनविपाठयोरिवांत्ये ॥ ९१ ॥ सख्याः करोंजनविधौसकृद्देवगंतुमापांगभागमपटुः श्रममानशेयः ॥ रेखावधेरनवगामितयादृगंतंपूर्वाक्तमेवसपुनः पुनरालंलंबे ॥ ९२ ॥ सकलमपिवपुर्विभूष्यतन्व्याः सपदिसखीविपुलेक्षणांबुजापि ॥ चिरतरमनवेक्ष्यमध्ययष्टिंकरधृतकांचनकांचिरेवतस्थौ ॥ ९३ ॥ कांचीकलापमणिबिंबितपार्श्वयोषित्कौशेयपंक्तिरवनींद्रसुताबभासे ॥ आविर्भविष्यदधिगोष्ठिकटीनिमग्नंवासः शतंजनदृशामिवसूचयंती ॥ ९४ ॥ आतंकर्पीडामददांपुराहमस्याद्भुतंभाविषुवल्लभेषु ॥ एवंविचिंत्येवभयेनपादेलाक्षाकृतंधाममपपाततन्व्याः ॥ ९५ ॥ तस्याः सखीषुसकलास्वपितत्तदंगंवेगाद्विभूषितवतीषुविवाहवेषैः कालक्षिपासहनवृद्धपुरोहितानांकोपस्यपात्रमभवत्कुचाशिल्पकर्त्री ॥ ९६ ॥ गद्यं ॥ एवमलंकृतामेनामवलोक्यस्वयमपि

१ परिवेषस्य परिघेः २ वर्णेंठकारौ ३ नयनविपाठयोः नेत्रबाणयोः ४ अनवगामितया अज्ञतया ५ पूर्वाक्तं पूर्वंअंजनलिप्तं. ६ आतंकः तापः ७ धामगृहं कांतिश्च.

संध्यारुणिमसंपादितलाक्षाकृत्यामंजनेतिलकमंजुलमुखभागांपरिणेतुमिवप्रतीचींदिशमुपगतवतिभगवतिभासांनिधौ ॥ पद्यं ॥
तस्यामेवक्षपायांसपदिनिजकुलोत्तंसपार्थोत्सवानामालोकायेवसाक्षाद्विशतिहिमरुचौद्यांशुभंयौमुहूर्ते ॥ सोपानैरध्यरुक्षन्मणि
गणखचितैर्वेदिमेतेकुमाराः सालंकाराः पुरोधः सरभसनिहितैः संविधानैः समग्रां ॥ ९७ ॥ ग० ॥ तत्रमुहूर्तगुणेष्विवसमंतादो
जायमानेषुदीपेषुमंत्रविदांवदनेष्विवशब्दायमानेषुवाद्येषुकुलपालिकाः कमनीयमणिनिकायकोरकितैः कनकभूषणैरविकृतसह
जरामणीयकांकन्यकाममीषांसकाशेनिवेशयामासुः ॥ पद्यं ॥ पूतपार्श्वैकुशांकूरैः पुरस्तान्मणिकुट्टिमे ॥ प्राज्वलत्तस्यधौम्यस्य
प्रतिबिंबमिवानलः ॥ ९८ ॥ धर्मान्प्रजाश्चसहसंचिनुतानयेतिशाम्यत्समिच्चटचटात्कृतिभिर्ब्रुवाणः ॥ तामात्मजांद्रुपदराजइ
वानलोपिप्रादादिवोन्नतशिखाग्रकरेणतेभ्यः ॥ ९९ ॥ अथजातुषालयसमर्पणात्कृतंपरिपोषमस्यवपुषोभिवीक्षितुं ॥ स्पृहया

१ अंजनतिलकः अंजनः प्रतीचीदिग्गजः पक्षे दृष्टिनिवारणार्थं यत्कज्जलंधार्यतेस अंजनतिलकः अंजनंचतिलकश्चेतिवा २ शुभंयुः शुभान्वितः तस्मिन्
३ संविधानैः उपकरणैः ४ कुलपालिकाः कुलस्त्रियः ५ कुट्टिमेवेदिकायां.

लवः किलपृथासुताः क्रमात्परिचक्रमुर्हुतभुजंवधूसखाः ॥ १०० ॥ कठिनत्वसंपदवलेपभरात्कुचकुड्मलस्यकुरुवीरवधूः ॥
कृतानिर्जयेवपतिपाणिधृतंपदमश्मनः शिरसिसानिदधे ॥ १०१ ॥ कन्ययाभ्युपल्हताविधिलाजाः कंदलत्यनलरोचिषिपेतुः ॥
पंचवल्लभकराग्रविमर्दाद्बाहुवंशगलिताइवमुक्ताः ॥ १०२ ॥ विधिचोदनासुमणिदीपयष्टिकापरितः स्फुरत्प्रतिकृतेश्चसुभ्रुवः ॥ उभ
योविवेचनविधौपुरोधसः स्खलनंबभूवनतुमंत्रतंत्रयोः ॥ १०३ ॥ बाहुप्रतापइवसाक्षिणिहव्यवाहेसामंतराजधरणेरिवयाज्ञसे
न्याः ॥ कांक्षासमंक्रमशएवकरंगृहीत्वाहर्षेणवृद्धिमभजन्नवनींद्रपुत्राः ॥ १०४ ॥ पांचालराजश्चसपांडवश्चपुष्यत्तमौपूजकपूज्य
भावं ॥ आढ्यंभविष्णुत्वमाकिंचनत्वंव्यत्यास्थतांताविवयौतकैः स्वैः ॥ १०५ ॥ गद्यं ॥ एवमंतरिक्षनिक्षप्तलक्ष्यवेधनलक्षणेन
शुल्कनिष्केणनिजकंठनिष्कायितकन्याभुजलतानेतान्पथिकौंतेयानवगंतारोदुरहंतारोपितानिवर्तनमतयोविकर्तनतनयोपायविधे

१ प्रतिकृतेः प्रतिबिंबस्य २ कांक्षासमं अगुष्ठमेवगृण्हीयाद्यदिकामयीत पुमांसएवमेपुत्राजायेरन्नित्यंगुलीरेवस्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभयकाम इतिगृह्योक्त
कामानुकूलं. ३ यौतकैः पारिबर्हैः अहेर इतिप्रसिद्धं. ४ निष्कंपदकं.

यैः सहायैः सहसंमंत्र्यसमारब्धपूर्वस्ययुद्धपलायनाध्ययनस्यद्वितीयावृत्तिविच्छित्तिंपरिजिहीर्षमाणाइवशकुनिभागिनेयाः सेना
पुरः सरनिस्साणनिस्सारितनिः स्वानललितैः क्ष्वेडितैः क्षालितगवाक्षमौनरौक्ष्यंद्रुपदनगरंपुनरपिनिवार्यनिरुच्छ्वासयांचक्रुः ॥
तत्क्षणमेवसत्वरंनिर्गत्वरेषुविविधैरायुधैरशून्येषुद्रुपदसैन्येषु ॥ पद्यं ॥ पृथासुतास्तेपिरथाधिरूढाद्विधाविचार्यैवपुरान्निरीयुः ॥
शरैर्विधातुंद्विषतोपिचूर्णास्तत्सुभ्रुवामप्यलकानचूर्णान् ॥ १०६ ॥ शंखंदध्मुस्ताडयंतिस्मभेरीश्चक्रुः क्ष्वेडांचापनादंविवव्रुः ॥
सिद्धादीनांद्योसदांलालनीयेयुद्धारंभेतेद्वयेपिप्रवीराः ॥ १०७ ॥ अनयोर्बलयोर्महारथानामवलोकायनभोजुषांसुरीणां ॥ सुदृशां
चपुरस्यसौधभाजांवरणस्रग्विधृतैवभेदिकाभूत् ॥ १०८ ॥ आसीदतामाशुधनुर्धराणामासीदताम्यत्करकौशलानां ॥ क्षणंमिथो
बाणगणंनिरुध्यव्रणंविनातत्ररणंमहीयः ॥ १०९ ॥ रथिकंरथिकोद्विरदंद्विरदस्तुरगंतुरगः पदगंपदगः ॥ इतरेतरमेत्यरणंविदधौ
दिविनारदविस्मयनाकतरुं ॥ ११० ॥ रजोंधकारेषुदृशोऽधयत्सु करैः करान्कौतुकसूत्रचिन्हान् ॥ परामृशंतोयुधिपांडुपुत्राः

१ अचूर्णान् चूर्णं सुगंधिद्रव्यं तेनरहितान् मृतभर्तृकानित्यर्थः

परस्परंपर्यहरन्प्रहारान् ॥ १११ ॥ सोमकेष्वपसर्पत्सुसूर्यसूनोः शितैः शरैः ॥ कूजयामासकोदंडंकुकुशायुधनंदनः ॥ ११२ ॥

॥ गद्यं ॥ तेनजननइवप्रधनेऽपिवृकोदरद्वितीयेनकरोदरपरिकर्मीकृतस्यकार्मुकस्यवर्मनिर्माथिभिः शरोर्मिभिर्निर्मितेर्मर्मर्माणोभयप्रसारिभिः स्वेदवारिभिः पदान्येवयानपदेऽभिषिंचंतः समराजिरकंदलितपार्थयशश्चतुर्थीचंद्रकलावलोकनंपरिहर्तुमिवमुखंनिवर्त्यसौबलेयाः केवलैरेवबाहुभिः कुरुपटभेदनंप्रतिपलायांबभूवुः ॥ पद्यं ॥ बीभत्सुचापविवृतेषुमहत्सुकर्मस्वेकंदृढंजगृहिरेयुधिधार्त्तराष्ट्राः ॥ वीक्ष्यस्थितेषुविमतेषुविलोलजीवंपृष्ठंप्रकाश्यगमनंपृथुनाजवेन ॥ ११३ ॥ विजयात्परमेतेषामृजवोप्यरिभीषणाः ॥ सद्योगुणाः समुन्नेमुरवनेमुश्चधन्वनां ॥ ११४ ॥ तेनिवृत्यनगरंसमाविशन्भूषिताद्रुपदराजपूजया ॥ वन्यशेषजनकेनशौरिणाजन्यभावमुपजग्मुषासमं ॥ ११५ ॥ पार्थएवसहजेष्वखिलेषुप्रायशोयुधिबलंश्रुतवत्याः ॥ अन्वभूदधिकमीक्षणवृष्टेराज्ञ

१ आत्मा वैपुत्रनामासीतिश्रुत्या सूर्यसूनुसकाशादपि सोमपलायनं युक्तं. २ परिकर्मी कृतस्य धृतस्येत्यर्थः ३ निर्मितेर्मर्मर्माणः निर्मितानि उत्पादितानि ईर्माणि व्रणानि येषुतादृशानि मर्माणि येषांते. ४ विलोलजीवं विलोलाः चंचला जीवा मौर्वी प्राणाश्च यस्मिन् कर्मणि ५ गुणाः शौर्यादयः मौर्व्यश्च. ६ जन्यभावं उत्पाद्यत्वं वरस्य स्निग्धत्वंच.

कोशमिवराजसुतायाः ॥ ११६ ॥ वृत्तांतमेवमवकर्ण्यसराजवृद्धः क्षत्त्रा[२]सकाशमुपनीयसहानुजातैः ॥ धर्मात्मजायधुरिकंसभि
दोर्धभावादन्वर्थतामथविभज्यददौस्वनाम्नेः[३] ॥ ११७ ॥ तस्मिन्ना[४]हितलक्षणेनरपतौराज्याभिषिक्तेसतिस्वान्यक्षीणिदधुर्यदंबुशिशि
रंलिप्तांगकेकुंकुमैः ॥ रागं[५]यद्भिभरांबभूवुरभजन्यद्घार्णितेबंदिभिर्निष्पंद[६]त्वमतः स्वदृष्टिरितितंपौराविवव्रुः स्फुटं ॥ ११८ ॥
इत्यनंतभट्टकाविकृतौचंपुभारतेद्वितीयस्तबकः ॥ ॥ पितृव्यवाचाऽथपृथातनूजोहरिंपुरोधायसमंबलौघैः ॥ परस्परस्ने
हमिवैषमातुंप्रस्थं[७]ययौखांडवशब्दपूर्वं ॥ १ ॥ गद्यं ॥ तत्रवनीभवतिर्वनीपक[८]जनमनीषितपूरकपूरुकुलावनीपसुरसुरभिगोष्ठी[९]
गौष्ठीने[१०]देशेप्रविश्यस्मरणमात्रनयनपात्रेणसकलशिल्पपारदृश्वना विश्वकर्मणा निर्मापितंकामनीयकविलोकनसुलभविस्मयभार
गुरुतरानमरान्वोढुमक्षमतयाक्ष्मातलमवलंबमानैर्विमानैरिवकुरुविंदमणिमंदिरैरभ्रंलिहंजंभरिपुनिदेशेनलंभिततन्नमोपपदंह

१ आर्जकः संपादकः २ क्षत्त्राविदुरेण ३ स्वनाम्नः धृतराष्ट्र इतिनाम्नः ४ आहितलक्षणे गुणप्रख्याते ५ रागं रक्तिमानं प्रीतिंच ६ निष्पंदत्वं स्तब्धत्वं
७ प्रस्थं मानविशेषं ८ वनीपकाः याचकाः ९ गोष्ठी समुदायः १० गौष्ठीनं पूर्वंभूतं गोस्थानं.

रिप्रस्थमधिष्ठिताययुधिष्ठिरायविनिवेद्यस्वपुरेऽपिसुषमामीदृशींपरीक्षितुमिवस्यंदनेनयदुनंदनेनप्रयये ॥ पद्यं ॥ प्राणायमानमाहि
लानथपांडुपुत्रान्क्षोणाविमाननुजिघृक्षुरपारभूमा ॥ एणाजिनेनघटितोद्गमनीयकृत्योवीणानिनादरसिकोमुनिराविरासीत् ॥ २ ॥
तपोनिधेरागमनेनसद्यः सभाविभोस्स्तब्धजनारवाऽपि ॥ वीणारवानुद्रुतभृंगमालाकोलाहलैर्घोषितदिङ्मुखाऽभूत् ॥ ३ ॥
दृष्ट्वानृपोदेवमुनिंविनीतोमौलिस्रजांधूलिमधूलिवृंदैः ॥ सपंकमाधायतमंघ्रियुग्मेविपंकमात्मानमयंव्यतानीत् ॥ ४ ॥ मेध्यांबृ
सीमधिगतस्यविरंचिसूनोरास्थायसंन्निधिमुदारमुदांकुरूणां ॥ तस्याद्भुतागमनहेतुपरिच्छिदायांचित्तानिदूरपथवर्तनतामवापुः
॥ ५ ॥ निकुंचितेतेनधृतानिजांकेविपंचिकामौनमवाप्यतस्थौ ॥ पांचालिकावंदनवादशैलीमाधुर्यमाकर्ण्यविलज्जितेव ॥ ६ ॥
राज्ञामुनासमुचितेषुसभाजनेषुपात्रैश्चपाणिविधृतैश्चपलैश्चवेत्रैः ॥ निर्वर्तितेषुरभसेननिवर्तितेषुस्मित्वामिथोगिरमभाषतधातृसूनुः

१ सुषमां शोभां २ उद्गमनीयं. धौतवस्त्रयुग्मं ३ विपंकं कर्दमरहितं पापराहितंच ४ बृसी ऋष्यासनं. ५ परिच्छिदायां निर्णये ६ सभाजनेषु नारदस
कारेषु पक्षे सभाधिष्ठितजनेषु ७ निर्वर्तितेषु कृतेषु ८ मिथः एकांते.

॥ ७ ॥ लाक्षागृहाद्यदच्याविसाक्षादिवरतिः प्रिया ॥ यद्वयवाहिचयुष्माभिस्तद्वयंहिसतांमुदे ॥ ८ ॥ स्वतोभातमतीनांवः कु
तोवान्यानुशासनं ॥ मौनंतुसुत्हृदाख्येयेदूनंवक्तारमावहेत् ॥ ९ ॥ अष्टमीकिलशिखावधूरियंभातियाजमखवेदिबर्हिषः ॥ यूय
मभ्रसरितावृतान्वयाः पावनः खलुभवत्समागमः ॥ १० ॥ जाययाचपतिभिश्चकदाचिज्जायतेस्मनहिदंपतिशब्दः ॥ अद्भुतस्य
खलुतस्यजगत्यामर्थतामनुभवंतिभवंतः ॥ ११ ॥ एकस्मैस्पृहयालूनामिष्टायसुधियामपि ॥ करस्थमेवब्रुवतेकलहंनिधनावधिं
॥ १२ ॥ सुंदोपसुंदौसहजावभीकौसुरेष्विवक्कापिसुरांगनायां ॥ अन्योन्यमाहत्यपुरायमस्यमनोभवेषोरिवलक्ष्यमास्तां ॥ १३ ॥
तत्सौभ्रात्रशरव्यस्यद्वैधीकरणकेलये ॥ भवतांमारचापेषूभवतांमावधूकृते ॥ १४ ॥ गद्यं ॥ इतिरहस्यंतपस्विनिदेशंशुभोदर्कंत
र्कयंतस्तेकौंतेयास्तस्यैवसमक्षमासिधारासगंधांसधामिमामाबबंधुः ॥ एतेवयंचातकाइवजीवनमयंवर्षमेकैकमवलंब्यप्रिययासम
मनयासुखेनवत्स्यामस्तथाभूतेष्वस्मासुयोमिथुनकृतोपवेशेदेशेदृशापिप्रविशेत्सोयंवृजिनंविहातुमजिनंपरिधायसुकृतसार्थसमर्था

१ दूनं संतप्तं २ एकस्यबह्व्यो जायाभवंति नैकस्यै बहवः सहपतयइति अद्भुतत्वं. ३ अभीकौ भयरहितौ कामुकौच ४ सगंधां सदृशीं ५ वर्षंवृष्टिं संवत्सरंच ६ वृजिनं पापं.

पकर्तार्थपरिपुष्टास्वष्टासुदिक्षुतत्त्रिगुणसंख्याकान्पक्षान्प्राक्षिपेदिति ॥ पद्यं ॥ राजानिदेशकृदभूदितिधातृसूनोरंतर्मुदोनिरवधेरिद
मासचिन्हं ॥ यत्तस्यपाणिरकरोन्मृदुकंठगीतेर्वीणागुणेविवशारिंखणमंगुलीनां ॥ १५ ॥ तस्मिन्नभः सराणिमुत्पतितेमुनिंद्रेसाते
षुपंचसुसमंववृतेमृगाक्षी ॥ सांक्रंदनेषुविटापिष्विवदानलक्ष्मीर्मानोभवेषुजयसिद्धिरिवाशुगेषु ॥ १६ ॥ इतिनारदसं
वादः ॥ विप्रः कश्चनतत्रजात्वथभुजावुत्धृत्यचोरैर्हृतागावोमेनिखिलाहतोस्मिविधिनावत्सोपिनोशिष्यते ॥ राजन्रा
ज्यमिदंविमुंचवसुधांशास्मीतिसर्वान्नृपान्किंवाहासयसीतिरोषकटुवाक्द्वारंययौभूपतेः ॥ १७ ॥ दृष्वातंमधुरस्मितोथविजयः
कृत्वासनादुत्थितिंनत्वांघ्रौसमवेक्ष्यभृत्यमिहमांब्रह्मन्सहस्वक्षणं ॥ गावस्तेस्वयमाव्रजेयुरधुनेत्याश्वास्यदस्यून्पुरः प्राविक्षन्मन
साततस्तुनृपतेश्शस्त्रायगेहंस्वयं ॥ १८ ॥ तत्रतेनजगृहेतरस्विनाचक्षुषानृपतिरंगनासखः ॥ पाणिनाचसशरंशरासनंपूर्तयेसप
दिविप्रवासयोः ॥ १९ ॥ विनिर्गतोसौविशिखानिवस्वकान्विमुक्तजीवोन्विरचय्यतस्करान् ॥ नितांतवेगामिवगोपरंपरांनि

१ विप्रवासयोः विशेषेणप्रवासः विप्रवासनाचतयोः २ विमुक्तजीवान् मुक्त प्राणान्मुक्तमौर्वींश्च.

वर्त्तयामासशुचांद्विजन्मनः ॥ २० ॥ प्रयाणनम्रेतदनुस्वमौलौपार्थस्यजज्ञेनियमाभिषेकः ॥ प्रागेवतीर्थोपगमात्पवित्रैर्बाष्पैर्नरेंद्र
स्यवियोगभीरोः ॥ २१ ॥ गद्यं ॥ सधीरधीरत्युच्छ्रितेनकृच्छ्रेणराज्ञोगृहीताभ्यनुज्ञोवल्कलंघनंकल्क[1]लंघनायपरिधायमलयानिलइ
वमनु[2]ष्यधर्मणाराजन्वतींकाष्ठांप्र तिष्ठमानस्तपः प्रसादितस्यभगवतोभवानीवल्लभस्यसाक्षात्कृपामिवभगीरथरथानुसारणींतरंगि
णीमुपगम्यतत्रपवित्रासुवीचिषुसायंतननियमायऋचोघमर्षणीर्जपन्मज्जनमकार्षीत् ॥ पद्यं ॥ ना[3]लीकात्कुवलयसंक्रमेस्खलि
त्वामग्नाधः पयसिरमेवतत्रकाचित् ॥ तंदृष्ट्वाभुजगसुतामिथोरिरंसुः संतुष्टात्हृदयमिवानयत्स्वगेहं ॥ २२ ॥ प्रत्दृष्यत्हृदितत्रै
पामनुष्यंफणिनांरतैः ॥ संतर्पयितुमुत्सेहेकंदर्पसममर्जुनं ॥ २३ ॥ भोगायतस्याभुजगेंद्रपुत्र्याः फूत्कारएवस्फुटसीत्क्रियासीत् ॥
कस्तूरिकांकोजनिकंठनैल्यंफणामणिः पल्लवशेखरोभूत् ॥ २४ ॥ पाण्योर्ज्यामर्शकाठिन्यंतस्यतत्कुचमर्दने ॥ तस्याश्चतन्मुखा
स्वादेफलायाभूत्द्विजिव्हता ॥ २५ ॥ सुखाच्चक्षुश्श्र[4]वस्तन्व्यास्सुरतेमीलनंदृशोः ॥ चक्रेमणि[5]तवैदग्धींतस्यका[6]ननकौमुदीं ॥ २६ ॥

१ कल्कंपापं २ मनुष्य धर्मणा कुबेरेण ३ नालीकात् कमलात्. ४ चक्षुश्श्रवस्तन्व्याः नागकन्यायाः ५ मणितं रतिकूजितं ६ काननकौमुदीं अरण्यचंद्रिकां व्यर्थामित्यर्थः.

श्लाघाकंपात्प्रियरतेश्शिरसोंतः पथादधः ॥ च्युतोमणिरिवैरावान्सुषुवेतनयस्तया ॥ २७ ॥ इत्योकिकांसरजनीमपनीयतत्रश्वा सैस्समंस्वकुलसंभवपृष्ठमित्रैः[1] ॥ मुक्तस्तयातटगतोनुचरान्द्विजातीनंतर्वतो[2]द्भुतरसैरतनोत्स्ववृत्त्या ॥ २८ ॥ उलूपिकायारतिदं शनैस्तैरुन्मस्तकंमोहमिवापनेतुं ॥ उदग्रवीर्योंषधिजन्मभूमिमुमागरुंशैलमयंप्रपेदे ॥ २९ ॥ भालस्यपंचविशिखेपदयोः कृतां तेहासस्यदानवपुरेष्ववलोकनस्य ॥ शंबा[3]युधेपशुपतेरप[4]दानपद्यंगायंतिसिद्धमिथुनान्यशृणोत्सतस्मिन् ॥ ३० ॥ गद्यं ॥ तत्रतत्र सतस्यहिमाचलस्यखुरपुटविनिमयविन्यासचंद्रकितैरवतारपथैरपिरोमंथफेनशकलतारकितैः प्रतीरनमे[5]रुतलोपवेशैरप्यनुमेयहर वृषभस्वैरविहारासुकटकसरसीषुवृजिनानिविशोध्यवनमदावलकलभविदलितसरलद्रुमप्रवालपरिमलसुरभिलेनोपत्यकावर्त्म नादिविभुविभरणकुशलाभ्यांमहें[6]द्राभ्यांपरिगृहीतांहरितमवजगाहे ॥ पद्यं ॥ पंफुल्यमाननवकेतकपांसुगर्भैः पर्यंतनिर्झरजलैः

१ स्वकुलसंभव पृष्ठमित्रैः स्वकुलं उलूपिका कुलंतत्संभवाः नागाः तेषांपृष्ठानि दीर्घाणीतिप्रसिद्धिः तेषांमित्रैः सदृशैः दीर्घैरित्यर्थः २ अंतर्वतः गर्भवतः स्थूलोदरानित्यर्थः ३ शंबायुधेइंद्रे ४ अपदानं वृत्तंकर्म. ५ नमेरु वृक्षविशेषः ६ महेंद्राभ्यांइंद्रेण महेंद्राख्य कुलाचलेनच.

कलिताभिषेकः ॥ पार्थस्सतत्रजनकाभिधयेवत्दृष्टः [1]पादेचिरंपरिचचारगिरिंमहेंद्रं ॥ ३१ ॥ निजनगरनिरीतोवासविर्दिक्षुसर्वा स्वापिपरिणयहेतौक्कापियात्रामुहूर्ते ॥ जनकपरिगृहीतासादिगित्येवतस्यांकथमपिनसजातांकन्यकांपर्यणैषीत् ॥ ३२ ॥ जलधि तटपदव्याझर्झरैश्श्रीरशब्दैरवमयमनुकुर्वन्राजतालीवनानां ॥ रति[2]पतिरथकारेणाद्रिणालांछितायांदिशिविविधतटिन्यांदत्तचक्षुः प्रतस्थे ॥ ३३ ॥ शैलोगर्भेशिशुरिवभुवः शासनाद्यस्यशेतेवातापिर्योजठरदहनेवर्त्तयामासहव्यं ॥ क्षोणीनग्नंकरणमहिमाकोप लेशोयदीयस्तस्यावासंदिशमभिययौतापसस्येंद्रसूनुः ॥ ३४ ॥ धृत्वाफलेषुसलिलानिकवेरजायाः साम्यंपरीक्षितुमिवाभ्रसरिद्गु णौघैः ॥ अभ्रंलिहैर्निबिडितांतटनारिकेलैरालोक्यचोलवसुधामयमभ्यनंदत् ॥ ३५ ॥ वाराशिवासजडमात्मवपुर्विशोषमानेतु मातपभरात्तटमुत्तरेण ॥ लंकामिवागतवतींनिजपौरवर्जंपार्थोविवेशनगरीमथपांड्यगुप्तां ॥ ३६ ॥ तत्रचित्रांगदातेनव्यूढाराज कुमारिका ॥ दर्शनेदौ[3]र्हृदार्तौचद्वयोरासीदनंग[4]दा ॥ ३७ ॥ एलालवंगतरुपिप्पलिकापटीरतांबूलिकाक्रमुकदंपतिभावरम्यां ॥

१ पादेप्रत्यंतपर्वतेचरणेच २ रतिपाते रथकारेण रतिपातिः कामः तस्यरथः सुगंधवायुः तस्य उत्पादकेन ३ दौर्हृदार्तौ गर्भपीडायां ४ अनंगदा कामदात्रीअंगदरहिताच.

उद्यानभूमिमुपगम्यतयासपार्थस्सुख्यान्पितुः पदममन्यतबल्वजेभ्यः ॥ ३८ ॥ दिवसेसुभंयुगुणकोरकितेदयितंत्वदिदिस्थितामिवा
र्त्तिमती ॥ अवतार्यसाभुविकुमारमभादथबभ्रुवाहनइतिप्राथितं ॥ ३९ ॥ गद्यं ॥ इतितत्रदिनानिकानिचिदुषित्वाप्रयामीतिभा
षितस्यपक्ष्मावलंबिबाष्पमेवोत्तरयंतींप्रेयसींरहासिदृढालिंगनतरंगितवल्कलोत्तरीयमर्मरसहाध्यायिसीत्कारंपुलकझर्झरेकपोलेप
रिचुंब्यतस्याः कथंचिदुदंचितानुमतिर्निर्गत्यरक्षोयोधिभिरिक्ष्वाकुपतिसेनाध्यक्षैरुत्पाटितानांमलयदर्दुरमहेंद्रपादानांमूलशिला
तलपरिदृश्यमानकठिनतरतत्करांगुलिनखरेखाव्यावर्त्तितकुलिशभयोच्चलितशैलसंस्थानबुद्धिभिस्सन्निवेशावटैः स्थपुटितामट
वींविलंध्यपुत्रीन्यक्काररुषापुलस्त्यान्वयस्यपुरीमुन्मूलयितुंप्रसारितेनभुवोभुजेनेवसेतुनाकृतसीमंतमुदन्वंतमभजत ॥ प० ॥
समीक्ष्यसेतुंरघुवीरनिर्मितंसाचित्रभित्त्चाकृतधीर्धनंजयः ॥ दिनेशवंशस्यतपोविचारणेचिरावकाशंविततारचेतसे ॥ ४० ॥ अब्धौ
वानरपातिताचलशिलाभंगाभिघातैश्चिरादक्षणांधैः कुणिभिः करेणचपदाखंजैः पयोमानुषैः ॥ वीचीवीथिषुकीर्त्यमानमनघंवृत्तंरघू

१ बल्वजेभ्यः तृणाय तृणवदित्यर्थः २ चित्रं आश्चर्यं आलेख्यंच.

णांप्रभोः श्लाघंश्लाघमसौतटेनहरितंप्राचेतसीमभ्यगात् ॥ ४१ ॥ गोकर्णमेत्यसकुलाद्रिसुताप्रियस्यपुष्पाणिमूर्ध्निनिदधेपुरुहूतसूनुः ॥ आगामिनांनिजशरासनताडनानामत्रावकाशइतिसूचयतेवदोष्णा ॥ ४२ ॥ पापापनोदेफालितेऽर्जुनस्यप्रागेवसेतोरवलोकनेन ॥ प्रभासतीर्थेनियमावगाहः पश्चात्सु[1]भद्रागमहेतुरासीत् ॥ ४३ ॥ पाठांतरं ॥ पापापनुत्यैपरिकल्पितोयः प्रभासतीर्थेप्रथितेभिषेकः ॥ सेतुंदृशास्पृष्टवतोस्यसोसौसाध्यंविनाजागरिताबभूव ॥ ४४ ॥ गोपृष्ठलग्नंकुलशैलकन्यासहायमंतः सततंदधानः ॥ आश्चर्यमैक्षिष्टतमेवदेवंगोकर्णवा[2]संकरुराजसूनुः ॥ ४५ ॥ ततोघनाविर्भवनाद्धियेवतत्राम[3]लंमान[4]समस्यभेजे ॥ कर्णांतरक्रौं[5]चंपथेनशोभायशोम[6]रालोयदुकन्यकायाः ॥ ४६ ॥ स्मृतिपथस्थितयापिसुभद्रयाजनसमक्षमिवासितुमात्तभीः ॥ द्विजकुलानिसतत्रसमत्यजत्सहचराणिरतशिवशंवदः ॥ ४७ ॥ पयसापरिपूरितौघटौपरिपश्यन्पथिपाकशासनिः ॥ कमलाक्षकनीयसीकु

१. सुभद्रागमः सुभद्रस्यआगमः प्राप्तिः पक्षेसुभद्रायाः २ गोकर्णवासं गोः कर्णः तस्मिन्वासोयस्य पक्षे गोकर्णं तत्संज्ञंक्षेत्रंतस्मिन्वासोयस्य. ३ अमलं निर्मलं पापरहितंच ४ मानसं चित्तं मानससरश्च ५ क्रौंचः क्रौंचपर्वतः ६ मरालोहंसः

चौकलयामासकरास्थिताविव ॥ ४८ ॥ तदानींखलु ॥ चक्रांगीमिदपश्यतो[1]हरचलच्छंपासमुन्मेषणैः पुष्यत्केतकगंधसिंधुविलुठत्पुष्पंधया[2]ंधीकृतैः ॥ मेदस्वीकृतकेकिनीकलरवैर्मेघंकराशामुखैः पांथानामपमृत्युभिः कतिपयैः प्रादुर्बभूवेदिनैः ॥ ४९ ॥ कालांबुदालिनलिकात्क्षणदीप्ति[3]वर्त्यासंधुक्षितात्सपदिसध्वानिनिसराद्भिः ॥ वर्षाश्मसीसगुलिकानिकरैः कठोरैर्घर्मार्भिया[4]तिमवधीद्घनकालयोधः ॥ ५० ॥ माध्वीलिहाविरुरुचेमालिनीकृताग्राकांतारसीम्निनवकेतकबर्ह[5]रेखा ॥ दग्ध्वांचलेस्मरभियादायिताजनेनसंप्रेषितापथिकभर्तृपुपात्रिकेव ॥ ५१ ॥ अर्जुने[6]षुसकलेषुविकासिष्वाद्रिसीम्निधृततादृशशब्दः ॥ एकएवाविशुशोषाविशेषादेतदंबुभृद[7]नेहसिचित्रं ॥ ५२ ॥ वियत्यशेषासुविदिक्षुदिक्षुवियोगशिल्पींद्रविनिर्मितायाः ॥ तस्यामृगाक्ष्याश्वतडित्ततेश्वधनंजयस्संविविदेनभेदं ॥ ५३ ॥ मन्मथेज्वलतिवासवसूनुर्मानसेपरिणयेयदुपुत्र्याः ॥ लाजवापमिवकर्तुमुपेद्रंतत्सगर्भ्यमथचित्त

१ पश्यतोहरः पश्यतः पुरुषस्य हरतीति भामटा इतिप्रसिद्धं २ पुष्पंधयाः भ्रमराः ३ क्षणदीप्तिः विद्युत् ४ अभियातिंशत्रुं ५ बर्हंपत्रं ६ अर्जुनेषु वृक्षविशेषेषु ७ अंबुभृदनेहसि अंबुभृतां मेघानां अनेहा कालः तस्मिन् .

मनैषीत् ॥ ५४ ॥ अणुमात्रमिदंसहेतवोढुंनहिविश्वंभरमद्यमामितीव ॥ मनसोप्यवरुत्वतस्यदृष्टेः पुरतः प्रादुरभूत्पुमान्पुराणः ॥ ५५ ॥ स्वस्वचेष्टाकथानद्याद्द्वितीयर्तुगुणज्ञया[1] ॥ नबभूवेतयोस्तत्रनयनानंदिनोर्मिथः ॥ ५६ ॥ विजयोमधुरास्मितस्यभावंविदुषस्तस्यमतेनभिक्षुवेषः ॥ कुसुमास्त्रभयादिवातिगूढः कुहरेरैवतकस्यतिष्ठतिस्म ॥ ५७ ॥ कथंसुभद्राकमनीयतायाः कल्पेतनुत्यैकविरुन्नतोपि ॥ चतुर्थमप्याश्रममस्ययेनतांसाधनीभूयदिदृक्षतेस्म[2] ॥ ५८ ॥ तदात्वएवाद्रितटात्पातिः श्रियः परिप्लवंतंप्रकृतेशुभागमे ॥ यदाशयेतेशयएवतद्भवेदितिब्रुवन्द्वारवतींपुनर्ययौ[3] ॥ ५९ ॥ ग० ॥ तदनंतरमहस्करमहतस्करमहामहान्मस्करी[4]रैवतकागिरेरुपस्कुरुतेतस्यनमस्करणमस्माकंश्रेयस्करणमितिपुरोधोजनबोधनात्कुतूहालिनाहालिनानगरमानीयमानंबहिरपिज्वलता विरहानलज्वालेनेवकाषायवाससाऽवगुंठितवपुषंसव्यसाचिशब्दमत्सरेणस्मरवीरेणप्रवासरंध्रमन्विष्यपन्नगपांडययदुकु

१ द्वितीयर्तुगुणज्ञया द्वितीयर्तुः ग्रीष्मः तस्यगणः शोषः तद्ज्ञया शुष्कयेत्यर्थः २ अपिशब्दः त्यक्तदारैषणस्यापि नपुंसकस्यापिच तद्दर्शनेच्छेति सौंदर्यातिशयद्योतनार्थः ३ शयेहस्ते ४ मस्करीयतिः ५ सव्यसाची सव्येनापिहस्तेन धनुः साचीकर्तुंसमर्थः

मारिकाणाकृते पृथक्पृथगीरितांत्रिसरकांडीमिवत्रिदंडीं बिभ्राणंनिजपल्लवकोमलिम निर्जयशोकादिव शुष्केणपटीरतरुणापादुकीभूयपरिचर्यमाणपादयुगंतंभावनाभिक्षुंसंभ्रमेणवंदमानेषुयदुवृंदेषुमुकुंदोपिसविनयमुपागतश्चेतः पूरणावशेषैः स्वसोदरीप्रेमरसैरिवतीर्थजलैः पूरितंपिचंडिलंकमंडलुंतदीयपाणेरादायभगवान्नितइतइतिराजभवनमुपनीयकन्यांतः पुरेनिवेशयामास ॥ पद्यं ॥ मार्गेशरत्रयममुष्यकृतेविमुच्यशेषंद्वयंपुनरिवोज्झितुमात्तलोभः ॥ शुश्रूषितुंतदनुसोदरचोदितायास्तन्व्यास्स्मरोनयनमेवशरंव्यतानीत् ॥ ६० ॥ वपुषामधुरेणसुभ्रुवाधनुषाचित्तभुवाचतर्जितः ॥ तपसेवदिनेदिनेतनोस्तनिमानंजगृहेसमस्करी ॥ ६१ ॥ प्रतिनिश्वसितेदीर्घंपाणिनानासिकांस्पृशन् ॥ भावयामासपार्थोयंप्राणायामसमापनं ॥ ६२ ॥ प्रणवोच्चरणेपुरः प्रसर्पत्प्रबभासेयतिनस्तदाधरोष्ठं ॥ मुहुरग्रगतावनींद्रपुत्रीमुखमास्वदयितुंकिलोज्जिहानं ॥ ६३ ॥ कन्याकरेमृद्नातिपादपद्मंपुष्पंतिगात्रेपुलकांकुराणि ॥ हरेहरेमाधवमाधवेतिहरिस्स्मृतेरन्यथयांचकार ॥ ६४ ॥ गद्यं ॥ एकदानिर्वर्त्यप्रत्यवसानकृत्यंप्रतिक्षणमिक्षुचापक्षुरप्रसंतक्ष

१ भावना कपटं २ संभ्रमेण त्वरया ३ प्राणायामं प्राणस्य दैर्घ्यंप्राणायामंच. ४ प्रत्यवसानं भोजनं.

णेनसमंतात्पतितैः सत्वगुणशकलैरिवश्वेतबिंदुभिर्व्याकीर्णांचामूरवींत्वचमध्यास्यविश्राम्यंतं*धवित्रेणवीजयंतीसुभद्रातैस्तैरिंगि
तैर्यतित्वेसंशय्यतस्यतत्वजिज्ञासयासाविनयमनुरहसिव्यजिज्ञपत् ॥ पद्यं ॥ तपस्विन्नद्यमेप्रीतिस्तवाभ्यागमसंभवा ॥ कन्[1]या
मौनावकीर्णित्वेकल्पशाखाशिखायते ॥ ६५ ॥ इदानीममी ॥ यदवः खलुपुण्यराशयोयतिनामिंद्रतवांघ्रिसंगमे ॥ शिरसायदवा
प्यतेरे[2]जोमनसाऽन्यत्परिवर्ज्यतेचयैः ॥ ६६ ॥ भगवन्नखिलंविबुध्यसेपरमा[3]र्थंवदभाविमेशुभं ॥ प्रयतायतयोभवद्विधाः प्रणि[4]धाने
नहिदिव्यचक्षुषः ॥ ६७ ॥ अवकर्ण्यतदेषमीलितः क्षणमक्ष्णोः प्रतिवाचमाददे ॥ बहुनाकिमयिस्वकैर्गुणैर्वि[5]जयंप्राप्स्यसियोषि
तांकुले ॥ ६८ ॥ पादांगुष्ठनखंयस्तेफाले[6]कुर्याद्विशेषकं ॥ सनरो[7]पिस्मरेणार्त्तः सद्यस्स्यादामिषंदृशोः ॥ ६९ ॥ गद्यं ॥ इतिसात
स्यवक्रिमस्पृशावचसाश्रवसाचनिपीतपूर्वैस्तैस्तैर्लक्षणैश्चसोयंसंक्रंदननंदनइतिनिश्चयमणित्वद्दयपेटकपुटेनिधायभगवन्भवद

* मृगचर्म व्यजनं. १ कन्यामोनावकीर्णित्वे कन्योचितंमौनं तस्यअवकीर्णित्वे क्षतौ २ रजः धूलिः पापंच ३ परमार्थं यथार्थं. ४ प्रणिधानेन योगेन
५ विजयं जयमर्जुनंच ६ विशेषकं तिलकं ७ नरोपि मनुष्योपि अपिशब्दः पूर्वश्लोकार्थ समुच्चायकः पक्षे नरावतारोपि.

भिहितयोर्विजयनरशब्दयोर्धर्मिपरताविशेषनामपरताचतवकृपयाभवेदितितस्मैव्रीडतरलनयनंवदनमवनमयंतीतस्थे ॥ पद्यं ॥ यमेवमुद्दिश्यतवोक्ति[1]भंगीसएषदासोस्म्यनुकंपनीयः ॥ इतिप्रकाश्यक्षणमर्जुनत्वंचुचुंबतांचोरयतिः कपोले ॥ ७० ॥ स्वेदांबुपूरभरितेसुदृशस्तदास्याः क्षेत्रे[2]स्वेकिंशुकशिलीमुखसीरकृष्टे ॥ पुष्पास्त्रकर्षकवरः पुलकछलेनशृंगारबीजनिकरान्निबिडानवाप्सीत् ॥ ७१ ॥ तस्यामेववधूमिमांसरजनौसद्योनुकूलांरहः पाणौकृत्यविलोकितोत्सवभरोद्बाभ्यां[3]हरिभ्यामपि ॥ पौरेषूभयथाजनेष्वब[4]लतांप्राप्तेषुपार्थस्तयाजाग्रत्साराथिविद्ययासहरथारूढः पुरान्निर्ययौ ॥ ७२ ॥ आकर्ण्येदंजृंभितानां[5]यदूनांपार्थोद्देशात्क्रोधनत्वस्य[6]जातेः ॥ म्लानिंदातुंमाधवो[7]मांधवोभूद्यत्रायत्ताकौरवी[8]सासमृद्धिः ॥ ७३ ॥ रणोत्साहेशांतेयदुजडिमकीर्तिध्वजलतांमुहुस्स्मारंस्मारंकपटयतितांवल्गितकुचं ॥ हसंत्याः प्रेयस्यादशनरुचिमित्रीकृतयशाश्शतांगे[9]नाविक्षत्सुरपतितनूजोनिजपुरीं ॥ ७४ ॥

१ भंगीरीतिः २ क्षेत्रे शरीरेकेदारेच. ३ हरिभ्यां इंद्रोपेंद्राभ्यां ४ अबलतां निर्बलतां बलरामरहिततां ५ जृंभितानांबद्धपरिकराणां ६ जातेः जातिवल्याः ७ माधवः वसंतः ८ कौरवी कुरुसंबंधिनी कुरवकसंबंधिनी. ९ शतांगेन रथेन

ततोमुहूर्त्तेसकलाभिनंद्येकुरूद्वहानांकुशलोदयाय ॥ सुतंसुभद्रासुषुवेऽभिमन्युंप्रवीरसूस्तातमिवप्रवीरं ॥ ७५ ॥ पांचालपुत्रीचप
तिव्रतानांप्रधानभावेकृतपट्टबंधा ॥ पंचापिसद्यः प्रतिभूर्खिस्वान्पतीन्पितॄणामनृणानकार्षीत् ॥ ७६ ॥ ग० ॥ अथतेषांतादृशंपु
त्रोत्सवमाकर्ण्यऋतुर्वसंतः सामंतराजसंबंधितयाहर्षादिवसमाजगाम ॥ तदानींभगवान्पवमानस्तुभीमस्यसुतोत्पत्तिनिमित्ताशौ
चवत्तयालोकस्पर्शायसंकुचन्निवकतिचनदिनानिमलयंविहायपदमेकमपिनचचाल ॥ पद्यं ॥ एतेनखल्वकरुणेनतपागमेनर्जा
वातुरद्यममदेशतएवदूरात् ॥ उत्सारितोमधुरितिविरुषावनांतेतत्स्वागतंपरभृतोनसमाचचार ॥ ७७ ॥ शिरीषपंक्तेः कुरुकामि
नीनांशररिवक्ष्ययासहमार्दवेन ॥ उपस्थिताभूदुपमातदानींतपस्थितानांसुलभांहिसर्वं ॥ ७८ ॥ कुरुकेलिवनेषुमाल्लिकाकुसुमेषुभ्र
मरावलिर्बभौ ॥ ऋतुनामधुगंधगुप्तयेजतुनाग्रेनिहितेवमुद्रणा ॥ ७९ ॥ शुभसौरभसंभृतानिभूमौशुचिभूतान्यपियानिपाटलानि ॥

१ प्रतिभूः जामीनइतिप्रसिद्धं. २ तपस्थितानां तपेग्रीष्मेस्थितानां पक्षे तपआचरतां ३ शुचिभूतानि धवलानि ग्रीष्मर्तूत्पन्नानिच ४ पाटलानि रक्ता
निपुष्पविशेषाणिच.

कलयेयुरतीवचित्रभावं[1]क्षणपीतानि[2]दृशाकथंनतानि ॥ ८० ॥ सीमंतविद्युदवतंसशिरीषचापंकैश्यंघनोयमितिकैः सुदृशांनजज्ञे ॥ तस्याधएवनिटिलेसततंयदासीत्तत्तादृशीसलिलशीकरदुर्दिनश्रीः ॥ ८१ ॥ उग्रैः करैरुष्णरुचेः समंतादूष्मायमाणाखिलादिङ्मुखस्य ॥ आगंतुमन्हः सविधंस्वकालेप्यनीश्वरेवापससर्परात्रिः[3] ॥ ८२ ॥ वर्षास्वियंत्वरितमस्मदुपांतभूमेरुन्मूलनंकलयतीतिरुषावलीढैः ॥ तीरद्रुमैः स्वनिकटादपसारितेवमध्यंजगामसरितांसलिलस्यवेणी[4] ॥ ८३ ॥ देशेदेशेजाडिमकुरंगास्तेजोभल्लैर्दिनकरभिल्लै ॥ धावंधावंप्रहरतिराज्ञांधारागेहं[5]शरणमवापुः ॥ ८४ ॥ अंगांगसंगासहनेतपर्त्तावन्योन्यमेवाभिमुखंयुवानः ॥ वाचापिकेचिन्मनसापिकेचित्दृशापिकेचिदृढमालिलिंगुः ॥ ८५ ॥ गद्यं ॥ एवंपचेलिमांहेलि[6]मयूखकेलिंतस्यतनयायैनिवेदयितुकामाभिरिवरामाभिर्निरंतरोपांतौदृगध्वनिवसंतौ[7]वसंतरतिकांताविवजयंतजनकानंतरजकौंतेयौपरिपाटलहंसपाद[8]दुरवगाहवनं[9]जातसना

[1] चित्रभावं आलेख्यत्वं आश्चर्यंच [2] पीतानि प्राशितानि पीतवर्णानिच. [3] ग्रीष्मर्तौ दिवसानांदैर्घ्यमिति उत्प्रेक्षयाद्योत्यते [4] वेणीप्रवाहः [5] धारागेहं जलमंदिरं [6] हेलिः सूर्यः [7] दृगध्वनिवसंतौ मूर्तिमंतौ [8] हंसपादाः हंसानांपक्षिविशेषणां पादाः पक्षे हंसस्य सूर्यस्य पादाः किरणाः [9] वनजातं कमलं अरण्यसमूहंच.

थेपाथसिरोधसिचविहारैस्तेषांदिनानामौपयिकमातिथ्यमापादयितुंभगवतींतामेवसारितमापततां ॥ पद्यं ॥ कल्लोलवेगकपटेन कलिंदपुत्र्यापादंप्रतिप्रससृपेपरमस्यपुंसः ॥ तिष्ठंतिमेपुनरहत्रिजगत्पवित्राः सख्यः कतीतिसमवीक्षितुकामयेव ॥ ८६ ॥ तस्याजलेषु[1]तरुणांबुदजातिवैरिष्वावर्त्तजालमनयोरुभयोरतानीत् ॥ वीचीकराग्रविनिवारितरामसीरव्या[2]वल्गनोपजनितव्रणगर्त्तशंकां ॥ ८७ ॥ मुरारिनारीमुखपद्मपंक्तिर्जवेनयोद्धुंजलदुर्गपद्मैः॥ तीरेवतस्थेतिलकापदेशात्कृत्वापुरः खे[3]टकमंडलानि ॥ ८८ ॥ तासांविलासगमनंसमवेक्ष्यतत्रलाल्यत्वहेतुरपिलज्जितचेतनायाः ॥ वेगात्तिरोभवनविघ्नतयामराल्यागर्ह्याबभूवनितरांगतिमांदिमश्रीः ॥ ८९ ॥ ग० ॥ शनैः शनैस्तासुसरितमवगाहमानासुकासांचिदीर्ष्ययेवनितंबबिंबानिनिजावकाशदानावलंबितोन्नतिभिरंबुभिः पुलिनानिनिचो[4]लयांचक्रुः॥ अपरासामसूययेवनाभिकुहराणिजलचूषणादावर्त्तकुलजवावलेपमवलुंपन् ॥ इतरासांक्रुधेव कुचयुगलानिक्षोभणात्कोकनदकोशान्विदलयामासुः ॥ पद्यं ॥ वक्षोजकुंभनिवहाद्वनिताजनानांग्रीष्मर्तुनाविनिहितंग्रहराज

१ तरुणां बुदजातवेरिषु सजलमेघसमूहसदृशेषु श्यामेष्वित्यर्थः २ व्यावल्गनंप्रहारः ३ खेटकः ढालइतिप्रसिद्धं ४ निचोलयांचक्रुः आच्छादयामासुः

पुत्री ॥ तापंपितुः स्[1]वंमहरत्तरलोर्मिहस्तैरन्यंनयातिहिविभूतिरपत्यभाजां ॥ ९० ॥ सुरनायकानुजमनोवशीकृतौसुदृशोमुखैर्नि
पुणतांयथाययुः ॥ सरसीरुहैर्ननलिनीलतास्तथासकचान्यमूनिवि[2]केचानितानियत् ॥ ९१ ॥ यमः स्वसुः सन्निधिमेत्यरात्रौस्व
कांतिचोरंसुदृशामुरोजः॥ नालाग्रशूलेनलिनंनिवेश्यववल्गहर्षादिववारिमध्ये ॥ ९२ ॥ व्यौ[3]त्युक्षिकायांविपुलेक्षणासुवर्षन्नखद्यो
तवलक्षमंभः ॥ सखीमुदारांसरितस्तुतस्याः करोप्यसावीदिवकंसहंतुः ॥ ९३ ॥ उल्लासभाजाहरिणाप्रियायाः कल्हारमाल्येक
लितेकबर्यां ॥ अस्त्रैरसूयाहसितैश्चाचित्रमु[4]क्तंसितंवक्त्रमभूत्सपत्न्याः ॥ ९४ ॥ ग्लै[5]हंनिमग्नग्रहणेषुकल्पयन्स्वयंग्रहाश्लेषसुखंयदू
द्वहः ॥ सव[6]र्णवर्ष्मासलिलेतडित्तनूः सुखादगृण्हात्सुदृशस्तुतानतं ॥ ९५ ॥ फूत्कृतैः क्वचिदधः स्थितिचिन्हंबुद्बुदंहरिरुदस्यनि
मग्नः ॥ वंचयन्प्रतिवधूः क्वचिदूरुस्तंभमंबुषुचुचुंबवरांग्याः ॥ ९६ ॥ क्रीडतीमंडलीभूयकृष्णयोरप्सुयौवते ॥ तटिन्यास्तटयोः

१ स्वंद्रव्यं २ विकचानि केशरहितानि प्रफुल्लानिच ३ व्यात्युक्षिकायांजलक्रीडायां ४ उत्तं सितं भूषितं पक्षे उत्तं आर्द्रं सितं शुभ्रं ५ ग्लहं पणं
६ सवर्ण वर्ष्मा तुल्पशरीरः

प्रांतेताटंकेइवरेजतुः ॥ ९७ ॥ गद्यं ॥ इतिचिरंविल्द्दत्यप्रतीरमुत्तीर्णाभिर्जलमेलनव्रीडादिवसंकुचितात्माभिः कुचैरानामिताभि
स्तदंगसंगमशर्माणिमर्मरगिरासंस्तुत्यपवनचंचलैरंचलैः श्लाघमानानीववसनानिवासितवतीभिः कायकांतिकनकलताकोरका
णीवकनकाभरणानिकामनीयकपुनरुक्तिमात्रस्यपात्रयंतीभिर्वधूटीभिः सहतटाटवींपर्यटतोस्तयोरग्रेदिशिदिशिक्रशिताशिशिरेत
राभीशुप्रकाशोजनदृशांकोशिकारदेशिकः कोपिमहसांराशिराविरासीत् ॥ पद्यं ॥ उन्मिष्योन्मिष्ययत्नात्परिचालितयथापू
र्वशात्त्याथदृष्टयातन्मध्येवीक्ष्यकंचित्पुरुषमनुदितछायहस्तातपत्रं ॥ अक्ष्णाज्ञांतेयंमोतोविंदधतमनयोः प्रश्रयाश्चर्यदत्तद्वैराज्या
दाकुलाभूद्यदुकुरुवरयोस्तत्क्षणंचित्तसीमा ॥ ९८ ॥ मुखेतिरोवेपथुभिर्वयः कृतैर्मुकुंदवध्वः कृतसूचनाइव ॥ द्विजातिवृद्धस्यप
थोस्यपार्श्वयोर्द्विधापसस्रुः सहसातिभीरवः ॥ ९९ ॥ ताभ्यांततस्तस्यपदोः पुरस्तादपंकमात्मानमहोविधातुं ॥ स्पृष्टान्युदंचद्व

१ जलमेलनं जलसंगमः मूर्खसमागमश्च २ अभीशुः किरणः ३ उपरिसूर्यः अधः अग्निः अतः सत्यपिछत्रे छायाभावः ४ ज्ञातेयं बंधुत्वं ५ ओतोः
मार्जारस्य.

मघर्मतोयैरष्टाभिरंगैरवनीरजांसि ॥ १०० ॥ परस्परासंगफलप्रदित्सयास्वजन्मतारैंदववासराविव ॥ उपस्थितौतावुपसृत्यसं भ्रमात्तदाशिषोनंतरमेवमब्रवीत् ॥ १०१ ॥ क्षुत्प्रपीडयतिमामयिवीरौकुक्षिमेत्यचकितेवयुवाभ्यां ॥ याचतेतदशनंबहुभोक्तुंयस्य तृप्यतिपुरातिथिरेषः ॥ १०२ ॥ इत्थंस्वदक्षिणकरंपुरतः प्रसार्यतस्यार्दतोवचनपाष्ण्र्यनुधाविवेगा ॥ तभ्यांतथेतिभणितिस्तुस माललंबेसत्स्वर्थनाफलमदौत्द्ददमेवसूते ॥ १०३ ॥ गद्यं ॥ अथमुदाकथितात्मयथातथभावोभगवान्बृहद्भानुर्दतपटीजवनिकांतर्नटी भवत्स्मितयोर्देवकीपृथासुतयोर्धुरिगिरिदरीवसतिधुरीणविभावरीचरसरीसृपदिविषदरीशमेदुरीकृतदुरीहिततांडवस्यजगत्कंठे गडुत्वंतत्परिरक्षणदक्षस्यऋभुक्षणस्तक्षकेपक्षपातंचविनिवेद्ययुवयोः कटाक्षबलेनक्षणाद्दिधक्षामीतिस्वयमपेक्षितविशेषमाचचक्षे ॥ पद्यं ॥ भ्रूसंज्ञयायदुपतेः पुरुहूतसूनुः संतुष्यतोऽथजगृहेसतनूनपातः ॥ तूणीचगांडिवसरवौतुरगांश्वशुभ्रान्कांतंरथंचनटताक

१ परस्परासंग फलप्रदित्सया परस्परस्य आसंगः योगः तस्यफलंअन्नं तद्दानेच्छया २ यस्ययेन तृप्यतेर्योगात्षष्ठी ३ अर्दतः याचनांकुर्वतः ४ अदौत्द्ददं दोहदलक्षणरहितं ५ गडुत्वंरोगविशेषः

पिकेतनेन ॥ १०४ ॥ मरुन्मनोमार्गणवैनतेयपृथग्जयाप्तैरिवकीर्तिशावैः ॥ चतुर्भिरश्वैः समुपास्यमानंसफाल्गुनस्तंरथमारुरोह ॥ १०५ ॥ दशमुखनगरेपुरानुभूतंदहनहठात्करणंपुनर्दिदृक्षुः ॥ उपगतइवमारुतिः ससाक्षादुदलसदस्यरथाग्रकेतनांकः ॥ १०६ ॥ तद्भुजावनुधावंत्याः संग्रामेषुजयश्रियः ॥ जंघाद्वयधियंतूर्णौजनयामासतुस्तदा ॥ १०७ ॥ पवनसखदृशोर्मुदंवितन्वन्पटुतरटंकृतिकंपिताटवीकः ॥ कुटिलमतनुतासकृत्कराभ्यांगुणमपिदंडमिवास्यगांडिवस्य ॥ १०८ ॥ अथगरुडवलीमुखध्वजाभ्यामनुमतिमेत्यससन्ननाहहर्षात् ॥ बलरिपुमणिनीलमुत्प्रवालं[1]वनं[2]मशितुंवडवास्यभूरिवाग्निः ॥ १०९ ॥ शोणरुचाशिखयातिमहत्याबाणपुरावृतिवासनयेव ॥ चंडतरस्यवनस्यसमंतात्कुंडलनंकलयन्ववृधेऽग्निः ॥ ११० ॥ प्रथमंपावकपिङ्गे[3]परिरभ्यगृहीतपल्लवोष्ठपुटे ॥ उपकंठं[4]वनराजेरुदगादाकुलकपोतनादततिः ॥ १११ ॥ गद्यं ॥ क्रमेणप्रबलीभवतोभगवतः पवमानसखस्यतमालादिषुकेषुचित्द्रुमेषुपत्रोच्चयायमानैर्धूमैः किंशुकादिषुकेषुचित्स्तबकायमानैर्ज्वालाकंदलैस्तिलकादिषुकेषुचित्पक्वत्रिमफलबी

१ उत्प्रवालं उत्कृष्टाः पल्लवाः विद्रुमाः श्वयस्मित् २ वनं अरण्यं उदकंच. ३ पिङ्गेजारे ४ उपकंठं समीपदेशंकंठेच.

जायमानैः स्फुलिंगैर्हरिचंदनादिषुकेषुचिद्दूल्कायमानैरालोकैर्नीडवत्सुकेषुचित्परस्परपक्षिपक्षताडनरटनायमानैः प्लोषै[1]चटचट त्कारैश्चसर्वतः परीतमपितद्वनंमुहूर्तंयथापुरमवतस्थे ॥ पद्यं ॥ हुताशनपरित्रासादुच्चलंत्यावनश्रियः ॥ कबरीवश्लथावेगा त्कापिधूम्याखमानशे ॥ ११२ ॥ वलयंधूमरेखायावर्त्मनिद्युसदांबभौ ॥ भाविनः शरकूटस्यपरितोमानसूत्रवत् ॥ ११३ ॥ अस्यैवगांडिवभृतोभुविहेजनत्वंमल्लंतृणायमरुतामपिमन्यमानः ॥ बाव्होर्बलंपठपठेतिवदन्निवाग्निः स्फोटारवंसझटितिस्फुटयां बभूव ॥ ११४ ॥ स्वपार्श्वयुग्मज्वलदग्निकंदलावनांतभाजोजगरामहत्तराः ॥ निशातवज्रक्षतिनिस्सृतासृजांदशामयत्नाज्जगृ हुर्महीभृतां ॥ ११५ ॥ गद्यं ॥ तत्रनिकुरुंबा[2]णिस्तंबेरमाणामामूलमनलार्चिरवलंबितदंतमुसलानिप्रेमपरवशतयावशा[3]सुवितरि तुंस्वसृक्काविन्यस्तजग्धार्धसल्लकीपल्लवकवलानीवक्षणमलक्ष्यंत ॥ पद्यं ॥ सविधज्वलनोष्मवीचिभिः सपदिम्लानकपित्थशा खिनां ॥ परिपाकसिताः फलव्रजाः प्रबभुस्स्फोटकबुद्बुदाइव ॥ ११६ ॥ निशिकेवलंतमसिदीप्ततनुंनिजजातिमौषधितरुंनि

१ प्लोषः दाहः २ निकुरंबाणि समूहाः ३ वशासु करिणीषु.

खिलं ॥ इतरेविजेतुमिवतेतरवोदिवसेपिजज्वलुरतीवतरां ॥ ११७ ॥ दृप्तदानवनिशाचरवर्गस्तत्रगांडिवभृतानिहतोपि ॥
तान्निषंगयुगबाणगणानांसंख्ययाप्रतिभटत्वमकार्षीत् ॥ ११८ ॥ ज्वालतापभरकुंडलितांगीः क्ष्वेडसारघृतसेचनमृद्वीः ॥ सर्पपुंग
वततीरतितृष्टः शष्कुलीरिवचचर्वकृशानुः ॥ ११९ ॥ तावत्तक्षकरक्षणायसहसाशक्रोऽधिरुह्यद्विपंवज्रंन्यस्यतदीयमूर्ध्निमरुतां
सन्नाहयन्वाहिनीं ॥ ब्रह्मांडप्रतिरोधनेनविमुखैर्धूमैरिवारण्यजैरातस्तारनभस्तलंजलधरैरारब्धघोरारवैः ॥ १२० ॥ गद्यं ॥ ततस्तै
र्नाकौकसामनीकैर्मत्सरेणतदुपरिनिपात्यमानदिग्भित्तिशिखराणामिववेगादापततांवारिधौवाडवहव्यवाहोपिकवलितोयमस्मा
भिरितीवविद्युतः प्रकाश्यगर्जितेनतर्जयतामिवपर्जन्यानामासारसर्वाभिसारेणनिर्वापितेवनेमनाक्श्यामायमानेसतिशोणायमान
लोचनेनकपिकेतनेनतत्प्रतिचिकीर्षयाशरकदंबैरंबरेनिरवलंबमाकालितांशरशालांछत्रीकृत्यपुनरपिसमुन्नीयमाननिजकेतुरूपर्बु

१ प्रतिभटत्वं सादृश्यं यथा अर्जुनबाणाः असंख्याः तथा मृतानामपिसंख्या नासीदित्यर्थः २ तत्प्रतिचिकीर्षया तस्यप्रतीकारस्य निराकरणस्येच्छया. ३ निजकेतुः स्वध्वजः धूमइत्यर्थः

धोभगवानुद्दिदीपे ॥ तत्रांतरेप्रोषितवल्लभतयाप्रेम्णाकुमारमश्वसेनंनिगीर्यदहनार्चिरुष्णासहिष्णुतयापुनरपिनिवृत्यदिवंप्रयांती भिर्घनधाराभिरिवपन्नगकन्यकाभिः सहवनादुत्पतंतींतक्षककुटुंबिनीमविलंबितमेवश्वेतवाहनश्शातमुखेनाशिलीमुखेनरसनाया मिवग्रीवायांद्विधाविदलितांचक्रे ॥ पद्यं ॥ नभसिकृतेशरकूटेनपपाताशुगैर्विनुन्नमंबुमुचां ॥ तास्मिन्खांडववन्हौतक्षकपत्न्याः कबंधमेवपरं ॥ १२१ ॥ गद्यं ॥ अथसकुपितस्स्वयंकौशिकोपिचाकितचाकितांविनयाविहितोपसरणंनवजननीशोकदयनीयंत्द्दत वालंतमहिबालंपरिगृह्यलालनयापरितोषमनैषीत् ॥ प० ॥ सुतंतमभ्येत्यसुरैरशेषैः क्रुध्यन्नथायुध्यतघोरमिंद्रः ॥ चक्रेसदावस्य चतक्षकस्ययदाग्निमत्तांयदनाग्निमत्तां ॥ १२२ ॥ वनस्यतस्योपरिकेवलंतदासहस्रनेत्रस्यचसव्यसाचिनः ॥ निषंगनीडोत्पतिता निर्पत्रिणांकुलानिकोलाहलकेलिमादधुः ॥ १२३ ॥ शरान्विपाठानपिपारदृश्वनः श्रुतेर्विधायाशुविमुंचतस्ततः ॥ कुरूद्वहात्सा

१ शरकूटे शरच्छत्रे २ आशुगः बाणः वायुश्च ३ कबंधं उदकं मूर्धरहितं शरीरंच ४ कौशिकः इंद्रः नकुलश्च ५ त्द्दतवालं पुच्छरहितं ६ अहिबालं सर्पपुत्रं वृत्रासुरपुत्रंच अथवा त्द्दतवालमहिबालं बवयोरभेदात् त्द्दतबालं बालशब्दरहितं अहिबालं नामअहिंवृत्रं ७ अनाग्निमत्तां अग्निमत्ता अभ्याधानाधि कारत्त्वं तदभावं मृतपत्नीकत्वात् ८ पात्रिणां बाणानां पक्षिणांच ९ विपाठान् पाठरहितान् बाणविशेषांश्च १० श्रुतेः वेदस्य कर्णस्यच.

ध्वसरोगिणोहरेरभूद्भिषग्दूरतरापसर्पणं ॥ १२४ ॥ जयंतमेकंयुधिसोढुमक्षमेजयंते[2]मन्यंसुतमीक्षितुंगते ॥ पुरींबलद्विषिणिघोषकैत
वाज्जहासशंखद्धितयंचकृष्णयोः[3] ॥ १२५ ॥ ततः कृशानोर्वि[4]परीतवर्णस्वनामवाच्यादिवभीतभीतं ॥ मयंवनेदैत्यमयंररक्षसच
कृपाणेरिवशक्रसूनुः ॥ १२६ ॥ क्षेत्रमप्याधिपतिंकुरुपूर्वसंश्रितौसपदिदैवबलेन ॥ चर्वितुः सकलखांडवमग्नेस्तै[5]क्षकावभजतांवि
घसत्वं[6] ॥ १२७ ॥ अथास्मित्वातुंदंपरिमृशातिमंदायितगतौसमापृच्छयप्रीत्यात्रिदिवमभियातेहुतवहे ॥ रथाभ्यांमौनिभ्यांघनसलि
लसेकेनमहताविजेत्रौतौकृष्णौविविशतुरुपांतंनरपतेः ॥ १२८ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेतृतीयस्तबकः ॥ ॥
यातेततोनिजपुरींयदुवंशकेतौराज्ञेमयोमणिसभांरचयांबभूव ॥ यस्यारुचंसमवलोक्यशुचाऽधुनापि[7]जीवंगतागतजुषंवहतेसुधर्मा
॥ १ ॥ तामधिष्ठास्नुमागत्यतंमखंकर्तुमन्वशात् ॥ विपंचीरवसारज्ञोनृपंचीरवसांवरः ॥ २ ॥ ग० ॥ ततोदूताहूतः पुरहूतानु

१ भिषक् वैद्यः २ जयंतं इंद्रपुत्रं. ३ कृष्णयोः अर्जुन कृष्णयोः ४ विपरीतवर्ण स्वनामवाच्यात् मयइत्यस्य विपरीतवर्णवाच्यात् यमात् ५ तक्षकौ मयः सर्पश्च ६ विघसत्वं भोजनशेषं ७ जीवं गीष्पतिंप्राणंच ८ विपंचीवीणा.

ज्ञोनिरंतरायमेवमहांतंसप्ततंतुमाहर्तुमनसः कौंतेयस्योपांतेरहसिमुहूर्त्तंसंमंत्र्यसाक्षादुत्साहप्रभावाभ्यां मूर्त्तौमंत्रइवतत्प्रहिताभ्यां गंधवहसुधांधोधिपनंदनाभ्यामनुसंधीयमानगमनोनदीतटाकैर्द्विमातृकतयास्वपालयितारमिवानुकुर्वतोविविधान्यदुर्लभवसुधान्यसमेधितवसुधान्मगधानधिगम्य विशृंखलहर्षितगिरिव्रजम पिशृंखलाखेदितमहीभृत्कुलंजराघ टितदेहम पिदेदीप्यमानदेहबलसंपदमाशाजेतारमपिपरार्थापहारजागरितारंमागधमपिविगीतव्यापारंद्विमातुरंमहारथंपृथिवीनाथमुपेत्यप्रधनंननाथ ॥ तत्क्षणमतितिक्षुतयात्वमष्टादशकृत्वोदृष्टापजयोस्ययंपुनरितरः किशोरइतिकृष्णावुभावप्यवधीर्यहिडिंबकुटुंबशोकोदयादारभ्यप्रवीरजनकर्णिकामौक्तिकायमानभुजकीर्तिरात्मनस्संमुखीनंदृढतरपरिकरबंधंसमीरकुमारः पंचदशादिनानिनियुध्यतेषांतृतीभागपरिसंख्यानपदाभिधेयेनसहघटयांबभूव ॥ पद्यं ॥ हतेतास्मिंस्त्रयोदीप्राहरिप्रस्थमुपाययुः ॥ आगामिनिमखेहव्यमादित्सवइवाग्नयः

१ सुधांधाः देवाः २ द्विमातृकतया नद्यंबुवृष्ट्यंबुसंपन्नतया ३ वसुधान्यानि द्रव्यसस्यानि ४ गिरिव्रजः पर्वतसंघः देशविशेषश्च ५ महीभृतः पर्वताः राजानश्च ६ जरा वार्धक्यं राक्षसीच ७ आशा दिशातृष्णाच ८ मागधं मगधराजं स्तुतिपाठकंच ९ विगीतव्यापारं निंदितव्यापारं पक्षे विगतः गीतव्यापारोयस्य १० प्रधनं युद्धं. ११ तृतीय भागपरिसंख्यानपदं पंचइतिशब्दः तस्याभिधेयेन पंचत्वेन मरणेनेत्यर्थः

॥ ३ ॥ कृष्णेगतेयदुपुरींक्षितिपानुजानांजित्वादिशः प्रतिनिवृत्तवतांचतुर्णां ॥ कोशे[1]ममुः परमसिप्रवरागृहीतादोष्णोर्बलेनमहता
नतुहेमपुंजाः ॥ ४ ॥ उपायनत्वेननृपायसर्वैर्दत्तेषुवित्तेष्वखिलेषुभूपैः ॥ पार्थस्यपुर्याः क्षितिरेवभेजेवसुंधरावाचकवाच्यभावं
॥ ५ ॥ नरदेवमगाज्जयेप्रतीच्यानकुलेनैववसूनिविस्मृतानि ॥ दधदानकदुंदुभिस्वनैर्यादलयन्नानकदुंदुभेः कुमारः ॥ ६ ॥
हरिणासततः कृताभ्यनुज्ञोहाविरादातुमिवागतेनसाक्षात् ॥ क्रमविद्भिरथर्त्विजांसमाजैः क्रतुमाहर्तुमुपक्रमंप्रचक्रे ॥ ७ ॥ प्राग्वं[2]
शेप्युत्तमेतिष्ठन्प्राग्वंशंपुनराविशत् ॥ कुरीरा[3]शिरसापत्न्याकुरुवीरः सदीक्षितः ॥ ८ ॥ आप्सातुमिच्छुरनलोहविरत्ररुच्यमानील
धूमकुलनिर्गलनापदेशात् ॥ जग्धान्पुराजतुनिकेतनभित्तिखंडान्कुक्षिस्थितानिवववामगुरूनजीर्णान् ॥ ९ ॥ तत्रप्रवर्ग्य[4]जनितं
दिविधूमचक्रमालक्ष्यतेस्मविबुधान्प्रतिपावकेन ॥ आनाकदुंवहहविर्द्रविणेनवेगादाव्हानपत्रवलयंकिलनीयमानं ॥ १० ॥
मेदास्विनांविपुलखांडवभक्षणेनदेहंनिजंचलयितुंशिखिनोक्षमस्य ॥ उद्भ्रम्यसंज्वलितुमुत्तरवेदिकायामालंबनायकिलयूपवरोऽति

१ कोशे खड्गपिधाने भांडारगृहेच २ प्राग्वंशे प्राक्पूर्वं वंशोइतिपदच्छेदः पक्षे प्राग्वंशं हविर्गेहपुरोभागं ३ कुरीरं तंतुनिर्मितं जालकं. ४ प्रवर्ग्यं यज्ञकर्म.

केऽभूत् ॥ ११ ॥ बिंबेनसंगंबिसं[1]पुष्पबंधोर्नाथः कलानांनयथाविदध्यात् ॥ तथैवदेवास्ततृपुस्तदानीमत्यद्भुतानांहविषां[2]मशेषाः
॥ १२ ॥ सर्वेषु[3]वर्णेष्वपिदातुरस्मात्संप्राप्तवत्स्वर्थं[4]मजातशत्रोः ॥ नवर्णएकस्तुकदापिलेभेनार्थंक्रतूनामिहसार्वभौमे ॥ १३ ॥ गद्यं ॥
तत्रनानाजनपदमेदिनीवल्लभमल्लमुकुटमणिकिरणपल्लवितेयज्ञवाटेत्रिपथापृथातनूजाभ्यांनियुक्तोवैमात्रेयैर्भ्रातृभिर्जतुभवनवनस
वनेषुपृथक्पृथगाराधिततयास्वेनाप्यातिथ्यायनिमंत्र्यमाणेनवीतिहोत्रेणेवज्वलताहेमपात्रेणपरिष्क्रियमाणपाणितलस्सहदेवोनि
खिलभक्तजनकृत्यनिर्वाहभारेणेवनिभृतावयवंसभ्यलोकलोचनपक्ष्मयुग्मपंक्तिपरस्परवैमुख्यवदान्यरूपकोमलिमानंमहर्षिंजन
वलयमध्यमहेंद्रनीलरत्नंचिरत्नंपुमांसंसमासाद्यप्रथममर्घ्येणपरिपूजयांचक्रे ॥ पद्यं ॥ तावत्प्रकोपात्तरलाधरस्यप्रतिक्षितिशा
नभयानकस्य ॥ वेदीभुवंतत्रविहायवन्हिश्चेदीशितुश्चित्तमिवाविवेश ॥ १४ ॥ सदसिनविकृतोयदुच्युतोभूत्सतुपरुषाक्षरमंडले

१ विसपुष्पबंधोः सूर्यस्य २ हविषां हविर्भिः तृप्यतेर्योगात्षष्ठी. चंद्रः रविसंगं कृत्वाअमृतमाहरतितद्देवाः पिबंति यदितेषामन्यथाचरितार्थः स्यात्तर्हि देवमूलकं रविसंगं चंद्रः नकुर्यादितिभावः ३ वर्णेषु जातिषु अक्षरेषुच ४ अर्थं द्रव्यं अभिधेयंचं.

नशत्रोः ॥ बहिरिवसं[1]दुपेत्यतच्छ्रवोभ्यांबहुतरकुंडलनीलरत्नलक्ष्यात् ॥ १५ ॥ अश्लीलवागिहसमाप्तिमतीनवेतिसंद्रष्टुकाममिव दानववैरिचक्रं ॥ कल्पांततिग्मकरकल्पमनल्पवेगंकंठेबिभेदरणसीमनिदामघोषिं ॥ १६ ॥ ग० ॥ इतितस्यदुर्मतेरायुषासहस मापितेसवनकर्मणिनिर्मितावभृथाप्लवनमुपदात्वेनदत्तपूर्वाणिवित्तान्यु[2]त्तमर्णानिवपुनर्द्विगुणमेवग्राहितान्सर्वानुर्वीपतीन्प्रस्थापि तवंतंपौरवंतमनुज्ञाप्यचैद्यनिधनोत्सवेनसुदर्शनस्येवपौरजनस्यापिनवास्र[3]कणिकार्द्रतामनुभावितुमनाइवसनातनः पुमान्पुरींपुरा नुभूतकुशस्थलीनाम्नींप्रतस्थे ॥ पद्यं ॥ अंधभूपतनयोपिबलौघैर्हास्तिनंपुरमवाप्यविलक्षः ॥ सौबलिंगिरमसौबलवंतंदुर्विचार रचनासुचचक्षे ॥ १७ ॥ अग्नेरपत्यामितिहेमयदाहुरेतान्मिथ्यानमातुलविरोधिमखेनुभूतं ॥ तत्स्मर्यमाणमखिलक्षितिपोपनीतंनक्तं दिवंदहतिचित्तमिदंयतोमे ॥ १८ ॥ वल्गत्कुचंपरिजहाससभावलोकेमांद्रौपदीमणिभुविस्खलितंयदुच्चैः ॥ तत्साधुजातमितिव कुमिवस्नुषांस्वांमत्प्राणवायुरयमुत्क्रमणेच्छुरास्ते ॥ १९ ॥ अधुनायुधिसेनाभिर्विधुनानोधरातलं ॥ निधायनिधनंतेषुनिगृण्ही

१ सत् विद्यमानं २ उत्तमर्णान् धनको इतिप्रसिद्धं. ३ अस्रं रुधिरं अश्रुच.

यामिमांशुचं ॥ २० ॥ गद्यं ॥ इतिनिगद्यव्रीडाव्यथानद्योः संगमेनिमग्नमेनमभग्नकैतवबंधोगांधारपतिरुत्तारयितुमेवमुत्तरमाद त्त ॥ पद्यं ॥ जय्यतांकथमुपैतितेर्जुनोवत्सयद्युधिभयात्पलायिताः ॥ केवलंहरिमुखाननामतोवेगतोपिमरुतोभवन्सुराः ॥ २१ ॥ अपिच ॥ तंवीक्षितुंजगतिशक्नुयुरत्रकेवाभीमंप्रकोपधृतभीमगदांकबाहुं ॥ एकैकमुष्टिहतयेस्मभवंतिनालंयस्याहवेबकबृहद्रथ भूहिडिंबाः ॥ २२ ॥ ताभ्यामुपास्यमानस्यतपसस्तनुजन्मनः ॥ व्यापादेपिप्रसक्तिः काविशेषान्मादृशांरणे ॥ २३ ॥ ग० ॥ तथाप्यहंतुतवचतेषांचपरस्परंस्यविभवेपरिपणनपदाधिरोहिणिक्षणादक्षममाणेनजगत्सामान्यतामक्षसंप्रदायेनतंपराजयघंटापथे संचारयिष्यामीति ॥ प० ॥ वित्तेत्द्दतेदरिद्रास्तेविसृष्टाबंधुभिः स्वयं ॥ विनाशंवाशुचायायुर्विदेशंवाथलज्जया ॥ २४ ॥ त्वंतत स्तुसुखमात्मसंयुतैस्सोदरैस्सदृशसंख्यकास्समाः ॥ नीरराशिहरिनिलिमेखलांनिः सपत्नमनुभुंक्ष्वमेदिनीं ॥ २५ ॥ ग० ॥ इत्थंकारंरहसिकल्पितेकैतवदुरध्वेतावुभावप्यनुधावितुंदिव्यचक्षुषातेनांधेनवसुंधराधिपतिनानवमाणिमंडपिकाप्रवेशोत्सवव्याजा

१ उत्तरं प्रतिवाक्यं नौकांच. २ मरुतः देवाः पवनाश्च ३ तपसः यमधर्मस्य ४ व्यापादेद्रोहचिंतने ५ घंटापथे राजमार्गे.

दाहूतः सानुजोधर्मानुजः कुरुपत्तनमुपेत्यबंधु[१]तयाप्रत्युद्गम्यमानोदुस्तरंभाविवनवासवर्षमेकैकमेकैकप्रणिपातपुण्येनसुप्रतरंकरि
ष्यन्निवपितृव्यंद्वादशकृत्वः पादयोः प्राणंसीत् ॥ ५० ॥ अव[२]भृथांबुकणैरिवनूतनैरधिगतामथजालकमौक्तिकैः ॥ स्वकबरींद्रुप
दस्यसुतापिसासुबलजापदयोस्समनीनमत् ॥ २६ ॥ अनुजाभिरना[३]मयानुयुक्तैरभिनंद्यक्रतुलाभलालनाभिः ॥ सदनायससर्जतं
विनीतंसधृताकारनिगूहनोमहीपः ॥ २७ ॥ तावन्मदीयतनुभेदिभटांतहेतुवैरंमिथः प्रभविताकुरुभूभुजांश्वः ॥ इत्यंतराहितशुचे
वदिशिप्रतीच्यांमंदायमानमहसारविणानिपेते ॥ २८ ॥ दिग्धेसंतमसैस्सांद्रैर्दिशापादिशाचत्वरे ॥ सर्वाः प्रजास्तदाराज्ञः समा
रुक्षन्दशातुलां ॥ २९ ॥ मनुजावलीनयनवर्त्मनेपुनर्मघवादिदेवममभावगोचराः ॥ ककु[४]भोविभेजुरमृतांशुभानवः क्षणमेवताः प्रथ
मशैलरोहिणः ॥ ३० ॥ अथोपका[५]र्यामधितिष्ठतोस्यसंदर्शनायानिशमापतद्भिः ॥ अशेषपौरैरतिबालमित्रैरशोषिकिंचिन्नतयारज

१ बंधुतया बंधुसमुदायेन २ अवभृथः यज्ञांतेस्नानं ३ अनामयं आरोग्यं क्षत्रियस्यानामयमिति ४ ककुभः दिशः ५ उपकार्या मुपरिगृहं.

न्यां ॥ ३१ ॥ धर्मजन्माततः कर्मनिर्मायाहर्मुखोचितं ॥ सभांसभासुरांपौरैर्भूयः प्रापाक्षदेवि[1]भिः ॥ ३२ ॥ गद्यं ॥ तत्रचित्रीयमाणेष्वनल्पचतुरिमजल्पाकेषुसभाशिल्पेषुदृशंपरिकल्पयतः प्रज्ञादृशं निकषा[2]मूर्तैर्गुणइवतृतीयेदिविषदृषभनीलदृषदासनेनिषीदतोऽमुष्यकुरुकुलप्रदीपस्यप्र[3]तीपंनिविशमानः शकुनिस्स्थानात्द्रशयितुंसाक्षात्कृतसन्निधिरमध्यमवर्णयातदीयाभिख्ययावाच्योग्रहविशेषइवप्रासंगिकेनपथादुरोदरविहारेवतारमचिरादभिरोचयामास ॥ पद्यं ॥ अथसदसिमहत्याचाज्ञयासौनियत्[4]याः सुमतिमपिविमुह्यद्यूतमार्गेप्रवृत्तं ॥ बहुषुजनपदेषुप्राप्तवत्सुग्लहत्वंसपदिसुबलसूनुर्धर्मसूनुंविजिग्ये ॥ ३३ ॥ एकेनयत्सुबलभूर्यगपद्गृहीतुमंक्षेणसर्वविषयान्नृपतेरशक्नोत् ॥ अस्मात्परंजगतिवाच्यतयाऽभ्युपेत्यतिष्ठेतकिन्नुपरमाद्भुतवाचकाय ॥ ३४ ॥ प्रतिदेवनमेवमेवभूपाः प्रचुरान्रत्नचयांश्चहेमकोशान् ॥ सहजान्सहजाययास्यजित्वासतुगांधारपतिर्जगर्जहर्षात् ॥ ३५ ॥ घटीचेटीनोभूद्बहुपति

१ अक्षदेविभिः कितवैः जुगारी इतिप्रसिद्धं २ निकषासमीपे ३ प्रतीपं संमुखं ४ नियत्याः दैवस्य ५ अक्षं इंद्रियं पाशश्च.

जधूटीद्रुपदजावराकींतामत्रानयपरिषदीत्यग्रजागिरं ॥ हरन्द्वैतीयीकः[1] सुबलतनयासूनुषुजवात्समुत्तस्थौसाक्षाद्धरणिमवतीर्णोर्थ मइव ॥ ३६ ॥ दृष्ट्वाभियासदसिधावनमाचरंत्याः कैश्येचकारसकरांगुलिमानतांग्याः ॥ वक्षोरुहेषुचमहीपपुरंध्रिवर्गानासाग्रसी न्निसुधियश्चनदीसुताद्याः ॥ ३७ ॥ गद्यं ॥ तत्रसदुर्मेधाबलवदाकर्षणभयोद्विदुराणिस्वेदपृषंतीवभूषामुक्ताफलानिधारयंत्याश्चि कुरभरात्करतलनिष्पीडनानिर्गलितांकालिमधारामिवानिर्भरकुवलयगर्भकमोल्थरसझरीमश्रुभिस्सहवर्षंत्यास्तस्याः पातिव्रत्यल क्ष्मीनिवासस्फटिकप्राकारमिवदुकूलमपहर्तुंप्रावर्तत ॥ पद्यं ॥ तादृक्षेसमुपस्थितेपरिभवेसभ्येषुवाचंयमेष्वाध्यायत्सुविधेर्बलंस्व दयितेष्वन्येष्वशक्तेष्वपि ॥ निश्चित्यार्तिमतांगतिंयदुपतिंनीव्यांकरौकुर्वतीसाचक्रंदतमुच्चकैरिहहरेत्रायस्वहामामिति ॥ ३८ ॥ तस्यांसभायांव्हियमाणवस्त्रात्तन्व्यानितंबात्सहसाविरासीत् ॥ कंसारिकारुण्यपयः पयोधेः कल्लोलमालेवदुकूलपंक्तिः ॥ ३९ ॥ त्वतेत्वतेवासासित्वद्यरूपंवासोंतरंयद्ववृधेवरांग्याः ॥ नरस्यतेनैवनकस्यतत्रचित्तस्यनौव्योजनि[2]चित्रपूरः ॥ ४० ॥ अदृश्यस्याप

१ द्वैतीयीकः दुश्शासनः नग्राव्हं नामपापानामित्यभिधानात् कंठतः नामनोक्तं. २ नाव्यः नौभिस्तार्यः महानितियावत्.

हारेपिवर्द्धितानेकवाससः ॥ अंबरप्रायतातस्यमध्यस्योभयथाप्यभूत् ॥ ४१ ॥ चैलानिकर्षन्नचिरमंध्रसूनुस्तस्यास्तुनग्नंकरणस्स नाभूत् ॥ श्रमात्स्खलित्वाधरणौपतन्सन्दंतावलैरेवजनव्रजानां ॥ ४२ ॥ गद्यं ॥ अथतथाभूतपरुषयोषाभिषंगरोषकलुषेणपृषद श्वजनुषापरिषदिभीषणमेवंबभाषे ॥ पद्यं ॥ उरसिस्खलदूष्मलंमृगाक्ष्यास्समितावस्रमिदंयथाहमक्ष्णा ॥ द्विषतः कचकर्षिणोप्यमु ष्यारसनेनानुभवेयमेवमेव ॥ ४३ ॥ गद्यं ॥ किंच ॥ सरसीवाविचलत्कबंधबंधुरेसमराजिरेतामरसच्छदानिवशातमपिविमतान्हेमंत इवाहंधार्तराष्ट्रशब्दशेषांमहागदापत्तिंगमयिष्यामीति ॥ तत्रसुत्राम्णः पुत्रोप्येवंप्रतिजज्ञे ॥ पद्यं ॥ उत्सेकात्कृतहस्ततालममु नागांधारपुत्रीभुवाराधासूनुरसौजहासस[दसि]ग्राम्यंब्रुवन्यत्ततः ॥ यस्यांजात[ापि]देहिनोभ्युदिततानैर्वाभिनिर्मुक्तास्यातांद्वेअपि गांडिवोममतुतांनिद्राममुंनेष्यति ॥ ४४ ॥ गद्यं ॥ इतितयोस्तादृशेनवीरवादेनसुखमिहास्स्वेतिकरास्फालनदर्शितेसक्थिन्येवत

१ अंबरप्रायता आकाशसादृश्यं वस्त्रबाहुल्यंच २ अस्रं बाष्पं रक्तंच ३ कबंधं जलं अपमूर्धकलेवरंच ४ धार्तराष्ट्राः धृतराष्ट्र पुत्राः हंसाश्च ५ गदापत्तिं रोगेण विपत्तिं पक्षेगदया ६ उत्सेकात् गर्वात्. ७ अभ्युदितता सूर्योदयकाले निद्रितत्वं ८ सूर्यास्तकाले निद्रितत्वं.

वमृत्युः स्यादितिसुयोधनंप्रतियाज्ञसेन्याः शापेनचभयात्तगंधा[1]भ्यामंधदंपतिभ्यांयथापुरंराज्यंप्रत्यर्प्यहरिप्रस्थंप्रस्थापितोयुधिष्ठिरः
पुनरपिकृतमंत्रैरमित्रैराहूतमात्रोयमर्द्धपथाद्विधिनागे[2]लहस्तिकयानिवर्तितइवतामेवसभांप्रत्यावर्त्तत ॥ पद्यं ॥ भूताभिविष्टइवबोध
वतांवरोपिभूयोपिधर्मतनयस्सहसौबलेन ॥ आधत्तदेवनविहारमनार्यजुष्टमाद्याक्षरंविजहदेवपणोऽपिसोभूत् ॥ ४५ ॥ कितवेश
कुनौवशंवदान्किरतिस्वेनकरेणपाशकान् ॥ विजयेनसदापुरस्कृतोप्यभवत्तेनसपृष्ठतः कृतः ॥ ४६ ॥ उत्थायाथक्षितींद्रः क्षण
मपिधरणौस्थातुमस्यांनयुक्तंप्रत्यर्थिस्वीकृतायामितिसहसहजैः सत्यसंधस्सजानिः ॥ पाणौक्षत्तुर्निधायप्रसुवमतितरामंतरुत्तप्य
मानांपभ्द्यांप्रापद्व[3]नानिव्यथिततद्धृदमुचत्पौरलोकस्तुदृग्भ्यां ॥ ४७ ॥ कांतारसीमनिमृगाः पुरतोनिषण्णाः शांताकृतेस्सधनुषो
पिनिषंगिणोपि ॥ उत्थाप्यतस्यपटुमर्मरचारुचीरंरोमंथलोलचिबुकेनमुखेनाजिघ्रुः ॥ ४८ ॥ परागपूर्णपथितस्यपादरेखाघटस्यप्र
तिमामनोज्ञाः ॥ भक्त्योपनीतावनदेवताभिः पाद्योदकुंभाइवजाग्रतिस्म ॥ ४९ ॥ गद्यं ॥ क्रमेणतेविलंघ्याविविधानिवनानिज

१ आत्तगंधाभ्यां पराभूताभ्यां २ गलहस्तिकया अर्धचंद्रेण. ३ वनानि अरण्यानि जलानिच.

न्हुमुनिकर्णशष्कुलिकापथेनशिक्षितैर्गतिविशेषैरिवगंभीरैरावर्त्तैरुपासकजनादाल्हता निसंसारचक्राणिवदर्शयंतींकोकनदवद नोदीरितैरिवकोककुटुंबिनीकूजितैः कुमारस्यदेवव्रतस्यकुशलमिवपृच्छंतींभागीरथींपुरस्कृत्यतत्रतांनिशीथिनींपश्चाच्चक्रुः ॥ अ परेद्युरतिमात्रबुभुक्षितानुयात्रिकसत्रिजनपरित्राणायपवित्रैस्स्तोत्रैःप्रसेदुषाचित्रभानुनादत्तमक्षय्यमन्नपात्रमादायकलत्रेनिदधुः ॥ ॥ प० ॥ वनंततः काम्यकमेत्यतेषुवसत्सुभीमस्तुनियोद्धुकामं ॥ किर्मीरमुग्रंकुणपाशनेंद्रंक्षिप्रंतदा[1]हारदशामनैषीत् ॥ ५० ॥ ततश्चिरंद्वैतवनेससार्धंवध्वाकदध्वालसतामबुध्वा ॥ मूलानिसर्वस्यशुभस्यभूपोमूलानिजग्राहमुनींद्रसंघात् ॥ ५१ ॥ तत्राथतेसत्यवतीसुतस्यपादारविंदात्प्रविसृत्वरीभिः ॥ नखप्रभाभिर्नवपुष्पपंक्तीर्जटालतानांजनयांबभूवुः ॥ ५२ ॥ तस्मिन्[2]क्वैतापसयूथनाथेस्वातीमिवाजग्मुषिवासभूमिं ॥ तेषामतिक्षामतयायुतानांशुचाक्षिदेशेष्ववतिवृष्टिरासीत् ॥ ५३ ॥ प्रसृमरतनुभासाप्रावृषेण्यान्समेघान्दिशिदिशिविदधानोदीर्घदर्शीतदानीं ॥ [3]कुरवइतिमहांतंशब्दमाबिभ्रतोपिस्ववचननिपुणिम्नातानशो[4]कानकार्षी

१ तदाहारदशांतस्य राक्षसस्य आहारःशवंतस्यदशां २ क्वौव्यासे शुकेच ३ कुरवइति कुरवकइति पक्षे इत्यस्य बहुवचनं ४ अशोकान् शोकरहितान् वृक्षविशेषांश्च.

त् ॥ ५४ ॥ अस्मात्प्रतिश्रुतिरितिप्रतिपद्यविद्यामालिंग्यधर्मतनयेनाविसृज्यमानः ॥ पार्थोहिमाचलमगात्परमास्त्रमाप्तुंशंभोः कृ
पाजलनिधेश्चरणार्चनाभिः ॥ ५५ ॥ यस्मिन्हिमानीभृतियक्षवृंदमंगेषुसर्वेष्वपिमंजुलेषु ॥ नखंपचोष्णंमलिनेक्षणानामुरोजमे
वातितरामुपास्ते ॥ ५६ ॥ योवत्सतामेत्यवसुंधरायानिपीतरत्नावलिकांतिपूरान् ॥ मनः शिलावप्रझरीमिषेणदरीमुखैरुद्गिर
तीवतृप्त्या ॥ ५७ ॥ आरोहतस्तंतरसासमीरैकिशोरकः स्वेदजलाणुराजिं ॥ निपीयतस्याननपद्ममाध्वींद्विरेफभावंप्रकटीचका
र ॥ ५८ ॥ शिवाख्ययोरेकतनुत्वकारणंत्रिलोकपित्रोर्महसोस्तपोवनं ॥ मिथोर्च्यमानंमिथुनैस्तपस्विनांतथेच्छुभिस्तत्रननामपांड
वः ॥ ५९ ॥ तत्रदर्भदलमुष्टिमाहरन्सन्निधौस्यदृषभोपदामिव ॥ चित्तमीशपदयोः समादधत्तप्तुमारभतदुश्चरंतपः ॥ ६० ॥
चतुरस्तपः स्थितिविशेषविधौचरणंनिधातुमखिलेननिजं ॥ सजुगुप्समानइवशात्रुजितेप्रपदेनतिष्ठतिभुवस्समतले ॥ ६१ ॥ भा

१ शीतकालेभवेदुष्ण इत्यभिधानात् हिमालये स्तनानां अतीवोष्णत्वं युज्यते २ समीर किशोरः मंदवायुः अस्मिन् शब्दे रेफद्वयं वर्तते तन्मनासिनिधाय कविः अर्जुनमुखकमलस्वेदमधुपानेन तस्य द्विरेफत्वं बोध्यं भ्रमरत्वं प्रतिपादयति. ३ सन्निधास्यत् ऋषभः समीपवर्ती वृषभः

नौललाटंतपभानुजालेप्रविष्टदृष्टिंपरितस्तमग्निः ॥ भूयोपिभोक्तुंविपिनंदिशोतिप्रेम्णोपरुंधन्निवदृश्यतेस्म ॥ ६२ ॥ तपोविधौ सपावकेनसर्वदिक्षुवासाविस्तदाबभूववेष्टितोधनंजयत्वबांधवात् ॥ अजीजनत्तमंगराजमंगवैरिणंभवानितीवरोषितोदिनेशएव चक्षुरक्षिपत् ॥ ६३ ॥ पाराशरिप्रापितमंत्रभागैराराधयन्शंकरमंतरंगे ॥ सप्तापिचर्षीं[१]स्तपसाविजेतुंसप्तत्वमापस्वयमेकएव ॥६४॥ फलपर्णजलानिलाशनानिप्रविहायक्रमशस्तपस्यतोस्य ॥ विषयेषुनलोलतांप्रपेदेविजयस्याक्षगेणः[२] कराग्रएव ॥ ६५ ॥ तत्तादृशेनतपसातरुणेंदुमौलिंतन्वन्कृपापरवशंतनयोमघोनः ॥ पादाग्रमेवधरणौप्रणिधायतस्थौप्रोद्यम्यबाहुमुपरीवफलानिलिप्सुः ॥ ६६ ॥ निरुध्यवायुंनिभृतंतपस्यतः शिरः समुत्थादशदिग्विसृत्वरी ॥ नटत्स्फुलिंगानवधूमसंततिः स्फुटीचकारास्यधनंजयाभिधां ॥ ६७ ॥ तस्याथनारदमुखात्तपसः प्रभावंश्रुत्वाहरास्त्रिगजतामधिपोदयालुः ॥ देव्यादृशासदसिसूचिततद्दिदृक्षोदित्सन्नभीष्टमपिलुब्धकतां[३]मयासीत् ॥ ६८ ॥ हेरंबगंडमदपंकविशेषकांकौ[४]स्कंदौपवाह्यशिखिपिच्छविलासचूडौ ॥ भूषानदीतटतरुहच्छ

१ सप्तत्वं सप्तसंख्याकत्वं पक्षे सप्तजटातद्युक्तत्वं २ अक्षगण इंद्रियसमूहः रुद्राक्षसमूहश्च ३ लुब्धकतां लोभविशिष्टत्वं किरातत्वंच ४ विशेषकं तिलकं.

दक्कृत्तवस्त्रौकोदंडिनौव्यरुचतांकुहनाकिरातौ ॥ ६९ ॥ शबरत्वजुषोवरस्यपुंसः शशिखंडान्नुशकारसंनिधानं ॥ भजतिस्मत
दाशिखंडभावंभगवन्मस्तकभूषणंयदेषः ॥ ७० ॥ गद्यं ॥ तदानीमेवरजतगिरिशिखरान्निर्गच्छंतौकिमेतदितिसांशयिकैरपितद
नुसरणोचितवेषविरचनाकुलैःपारिषदकुलैः परिवार्यमाणौसमुज्वालितलांगूलमितस्ततोधावद्भिर्दूरचारश्रमविदारितवदनलंबमा
नरसनाग्रनिपातिनीभिःसृणिकाकणिकाभिर्वनपत्थतिंशुद्धतरीमिवकुर्वद्भिर्द्रुततरश्वसितकंपमानावयवैस्तेषुतेषुवनगुल्मेषुश्वापदा
न्यन्विष्यान्विष्यहुंकारमाचरद्भिर्विश्वनिगमविश्वकद्रुभिरविमुच्यमानपार्श्वभागौदीपकमृगायमाणनिजहरिणशावकानुधाव्यमा
नपार्ष्णिभागौप्रशमिततुहिनजडिमोद्वेगेनभाविनिपदेपदेवनदेवताभीरच्यमानतरुप्रसवास्तरणेनहिमवतः कटकपथेनसाविला
संसंचरमाणौकोवतावदृष्टपूर्वौवनमस्मदीयमाक्रमतइतिरोषकषायिततयानिवारयितुकामैरपितेजोविशेषप्रतिहतोत्साहैरन्यैः श
बरयुवभिः केवलमवलोक्यमानौजटावल्लरीमूलमुकुलीभवदंजलिभिस्तपस्विपुंजैर्नभसिविमानवेगंनिरुध्यहर्षाश्रुभिः सममभिवृ

१ कुहना कपटं किरातवेष साधनानि गृहएवलब्धानीत्यर्थः २ सांशयिकैः संशयापन्नैः ३ सृणिका लाला ४ विश्वानिगम विश्वकद्रुभिः अशेषवेदैरवश्वभिः

ष्यमाणजयशब्दौतौजगदादिमौदंपतीसविनयमुपासीनस्यशुनासीरसुतस्यतपोवनसीमानंशनैः शनैरासीदतां ॥ तत्रखलु ॥ पद्यं ॥
आपादलंबिजटमातपमात्रभक्ष्यमूर्ध्वीभवद्भुजमुदारतपः कृशांगं ॥ दृष्ट्यानुगृह्यकुरवीरमुनींद्रमेनंत्रेधाबभूवसुतवत्सलताभवा
न्याः ॥ ७१ ॥ क्षोदयन्नथमहींखुरपातैः कोपिकोपकुटिलोवनकोलैः ॥ घोरघूत्करणघोणमुपागात्कुक्षिमाश्रमभुवः कुरुसूनोः
॥ ७२ ॥ तंवीक्ष्यरौद्रवपुषंमृगशावकेषुत्रासाद्विशत्सुकटिलंबितवल्कभागान् ॥ पर्याकुलैःकलकलैरपिपक्षिजालैपार्थोनिवृत्यनिय
माज्जगृहेशरासं ॥ ७३ ॥ मुनिरेषयदाभ्ययाद्वराहंमुखरज्यालतिकोजवाज्जिघांसुः ॥ शबरोददर्शतदानुधावन्धनुराकृष्यसहानु
यायिवर्गैः ॥ ७४ ॥ मामुंचबाणंमदनुद्रुतेस्मिन्नपेहिजाल्मेतिकिरातनेतुः ॥ वचः सलक्ष्यंमनसोनकुर्वन्वराहमस्त्रस्यचकारलक्ष्यं
॥ ७५ ॥ शिलीमुखाभ्यांशिवसव्यसाचिनोः समुज्झिताभ्यांयुगपत्किटेस्तदा ॥ समंविभज्यायुरभुज्यतक्षणात्सहोदराभ्यामिवपैतृ
कंधनं ॥ ७६ ॥ ततः कुपितोपिकुरुप्रवीरस्तपः शांततयानातिपरुषमेवमुवाच ॥ अस्मिन्ममावसथमापतितेमयाप्राग्लक्षीकृते

१ कोलः वराहः २ जाल्मः असमीक्ष्यकारी.

शबरयत्प्रत्द्दतंत्वयातत् ॥ शापस्यवाऽथधनुषोऽसिवशस्तथापिसोढंममाद्यतपसाचभुजोष्मणाच ॥ ७७ ॥ गद्यं ॥ इतितस्यमुनेरंतर्द
र्परसपरीवाहवेणीमिववाणीमाकर्ण्यक्षोणीधरधन्वापिसास्मितंप्रत्यभाणीत् ॥ पद्यं ॥ मृदुबुद्धिरंगवचसैवलक्ष्यसेमृगहिंसनंविपिन
सीमनीदृशं ॥ शतशः स्वधर्मइतिपठ्यतेबुधैः शबरस्यवावदतपोधनस्यवा ॥ ७८ ॥ गद्यं ॥ तत्स्वकुलाचारादप्रमोद्यतेमह्यमयुक्त
कारिणापित्वयाकियद्दूरंप्रकाश्यतेतपसिबाहावप्याहोपुरुषिका ॥ पद्यं ॥ संदृश्यतेखलुतपस्तवशुद्धमेतद्यज्जंतुहिंसनविधौदृढब
द्धकक्षं ॥ आस्तामिदंभुजबलंचमृगात्ययेस्मिन्साहाय्यकंयदुपजीवतिमेशरस्य ॥ ७९ ॥ ईदृशंवचनरीतिमपास्यन्नोहिंसांत्वय
कियानसिमेत्वं ॥ अक्ष्णिकिंचिदरुणिम्निजगत्यामंतकोपिमदतीवबिभीयात् ॥ ८० ॥ गद्यं ॥ इतिशंकरस्यन्यक्कारवादेनसातं
कः कुरुशशांकः पुनरपिगिरंकामप्येवमंकुरयामास ॥ पद्यं ॥ यस्माद्वनेचरकुलाधमजल्पसित्वमेवंमनः पुलकयन्स्वजनस्यदृप्तः ॥
तस्मादसंशयमुपांतजुषः किरात्यास्ताटंकमेवसहसेनकपोलमित्रं ॥ ८१ ॥ तादृग्वचः श्रवणदाहिमुनेर्निशम्यसर्वेगणात्द्ददिरु

१ परीवाहः जलोच्छ्वासः २ अप्रमाद्यते अवहिताय ३ आहोपुरुषिका युद्धसामर्थ्य संभावना.

षानिजिघांसवोपि ॥ देव्याविलोक्यवदनांस्मितगर्भगंडंतूणार्धकृष्टविशिखेनकरेणतस्थुः ॥ ८२ ॥ अथभिल्लमल्लकुरुवल्लभावुभौ परिफुल्लभल्लकुलशल्यपल्लवैः ॥ स्थगितावलोकसरणिंदिवौकसांसमरंभयंकरजवंवितेनतुः ॥ ८३ ॥ श्लथसंधिगरुद्भिरेषबाणैः श्रवणालंबिजपाक्षसूत्रघर्षात् ॥ प्रमथेशमवाकिरत्तदीयंप्रतिमालिंगामिवप्रसूनपुंजैः ॥ ८४ ॥ सरुषीवहरेविकृष्टचापेसहसाशैलसुतापिजातशंका ॥ मघवत्सुतमंगलायदेवीमनसायातइषुश्रुतिंजजाप[1] ॥ ८५ ॥ ससंभ्रमाकृष्टधनुर्गुणोपिशंभुः कृपांभोनिधिरिंद्रसूनौ ॥ संबद्धमात्रान्कतिचिच्चदेहेचक्रेऽपरोद्धान्[2]कतिचिच्चबाणान् ॥ ८६ ॥ विगाह्यशंभुंविजयस्यबाणाः पुनः पदत्वंपुपुषुर्नृदृष्टयोः ॥ नैरादुदारादभिगम्य[3]लुब्धंनमार्गणा[4]यांतिखलुप्रकाशं ॥ ८७ ॥ निस्वेनिषंगयुगलेनितराममर्षीचापेनमूर्ध्निगिरिशंपुर एवदेव्याः ॥ पार्ष्णिप्रमुक्तधरणिः प्रजहारवेगात्कुर्वन्व्रणंसकुटिलंशशिखंडमित्रं ॥ ८८ ॥ धनुषाभिहतात्समुत्थितैर्धरै[5]कन्यारमण

१ स्वजनकपक्षच्छेदकेंद्रतनयस्यापि मंगलाय यातइषुरिति शिवधनुर्बाण सुखावहत्व प्रार्थनार्थां श्रुतिंजजापेति परम कारुणिकत्वं व्यजते. २ अपराद्धान् च्युतलक्ष्यान् ३ नरात् मनुष्यात् अर्जुनाच्च ४ मार्गणाः याचका बाणाश्च ५ धरः पर्वतः.

स्यमस्तकात् ॥ विपुलैरिवरक्तशीकरैर्विनिपेतेमणिभिः फणाभृतां ॥ ८९ ॥ देवस्यतस्यजगतांजनकस्यचित्तेपार्थप्रहारजनुषः
प्रमदांबुराशेः ॥ भूषानदीतटभुविद्विपवत्क्रबाल्यवप्रक्रियाभिरुदितः प्रमदः कणोभूत् ॥ ९० ॥ गद्यं ॥ तत्रसगांडीवदंडोपिखां
डवेतक्षकवधूवधसाधनतयाचिरमयमस्मत्कुलविरोधीतिक्रोधनैस्तस्यजटावनकुटुंबिभिः कुंडलिभिर्भक्षितइवतत्क्षणंनालक्ष्यत ॥
ततोयंदैवविपर्ययः किममुष्यमायाकिमितिचिंतापरतंत्रेणापिधैर्यदत्तहस्तोत्साहेनतिष्ठजडात्मन्नेवमर्जुनंनिर्जित्ययशोर्जितुमिच्छ
सीतिकृततर्जनेनासितवाहनेनवृषभवाहनंप्रतिनियोद्धुमारेभे ॥ पद्यं ॥ पतुषेमुनिमुष्टिताडनेपतितेलुब्धकवामवक्षसि ॥ शिथि
लाजगलुः किरातिकायाः सितगुंजामणिहारयष्टयः ॥ ९१ ॥ उपवासकृशेभृशंमुनेरुरसिस्वीकृतमुष्टिमार्दवः ॥ प्रजहारहरो
पिताडनात्परिहर्तुंस्वमिवास्यतद्व्रतं ॥ ९२ ॥ गद्यं ॥ इतिपरस्परमुष्टिप्रहारवृष्टिपरिमृष्टवनकुसुमपरागभस्मांगरागौसरभसमे
केनबाहुनाजटासुगृहीत्वापरेणवलयितगलनालौतौशबरतपोधनौयदामहत्यामधित्यकायामापततांतदाझटितिघटितद्वारदरीग

१ वप्रक्रियाभिः पर्वततटलीलाभिः.

र्भ निरुद्ध सिद्ध मिथुनहाहाकारस्तीरवणदूरोत्सर्पिवीचिवेगोत्पाटिताक्रुष्टमुनिजनपर्णशालासहस्रसुरस्रवंतीपूरो दर्वीकरविभुकं[1] धराखर्वीकरणपटुतरभारोयमुर्वीधरपतिरासीत् ॥ पद्यं ॥ अवाङ्मुखत्वेननिपात्यशंभुनासमुज्झितोयंददृशेविमोहितः ॥ तवाद्य जामातरिमेदशामिमांनिवेदयेत्याद्रिमिवब्रुवन्रहः ॥ ९३ ॥ पार्थस्यतस्यभुजयोः परमेश्वरोसौवीर्यंविलोक्ययुधिविस्मयमानचेताः ॥ चापव्रणेसुरनदीकणसेकशंकामप्युत्सृजन्मुहुरकंपयदुत्तमांगं ॥ ९४ ॥ गद्यं ॥ तथाविधएवासौचिरादापतितचेतनाचरितस्वागताचारः शनैः शनैः उत्थायपुरतोघंटाभरणघणघणात्करणसहचरेणकंठगर्जितेनकर्णयोः परिकल्पितसुधारसमोक्षेमहोक्षे निषेदिवांसंभुजमूलप्रसारितगिरिजापाणियुगनखरेखांकुरधोरणीद्विगुणीकृतहारमणिरमणीयवक्षसंपारिषदगणांजलिकमलवनमध्यराजहंसायमानंमार्दवभरितशार्दूलचर्मनिर्मितपल्यंयनां[2]कोपरिभागातिर्यगर्पितैकचरणपल्लवसंवाहनपरेणशिलादकुमारेणच दर्पसमुल्लनानिवारणायमुखबंधनकनकशृंखलेनिरुध्यमुहुर्मुहुःकरपुटास्फालितककुद[3]शृंगेणभृंगिरीटिनाचलक्ष्यमाणोभयपक्षभा

१ दर्वीकरविभुः सर्पराजः शेषः २ पल्ययनं पृष्ठासनं ३ ककुदं वृषांगं.

गंगांडीवदंडताडनपीडितंचूडाशशिनमाश्वासयितुमवतरद्भिरुडुनिकरैरिवसुरतरुकुसुमवर्षैरवकीर्यमाणंजटाभासितकुशचीरधा
रिभिस्तैरिवचतुर्भिराम्नायपुरुषैः परिपठ्यमानशतरुद्रीयबिरुदप्रबंधमंबरेसविध्रमवलंबमानैस्तुंबरुप्रभृतिभिः सुरवैणिकैरुपवी
ण्यमानभक्तजनरक्षणापदानप्रकरणंकर्णपूरीकृततमालमंजरीमधुझरीमिषेणकटाक्षात्साक्षात्कृपामिववर्षतंप्रज्वलद्भिः परिष्कार
पन्नगफणारत्नैः नूत्नैः शरव्रणैरिवानुबध्यमानावयवमासन्नावतंसितशशिकलापरिगलितकिरणधारापातशीतासहिष्णुनेवदंत
पटगर्भवर्त्तिनास्मितेनसूचितत्द्दयप्रसादंभगवंतंमहादेवमुद्वीक्ष्यपक्ष्मतटरुहानिमेषविटपिसमुत्पाटनपटुभिः प्रमोदाश्रुपूरैर्नंदीमा
तृकायमाणपुलकप्ररोहः सविनयमुपसृत्यपादारविंदयोः सहस्रकृत्वः प्राणंसीत् ॥ पद्यं ॥ स्वामिन्मयाजडधियात्वयिदेवदेव
वाचाशरेणधनुषादृढमुष्टिनाच ॥ यत्तेचतुर्विधमकारिरणेतदागः क्षंतव्यमद्यभवताकरुणार्णवेन ॥ ९५ ॥ गद्यं ॥ इतिविज्ञापयंत
मेनंपारिजातपल्लवतल्लजप्रातिमल्लस्यपाणितलस्यपरामर्शनेनप्रमुषितव्रणवेदनांगंप्लवंगकेतनमनंगशासनोप्येवमवादीत् ॥ पद्यं ॥

१ उपवीण्यमानं बीणयागीयमानं २ परिष्कारः विभूषणं.

यथातृतीयेनयुधिप्रवीरतवापराधेनभवामित्दृष्टः ॥ तथानभक्त्यातपसांविभूत्यातरुप्रसूनार्चनयाचबव्ध्वा ॥ ९६ ॥ इतिसुधामधुरि
मधुरीणंवचनमभिधाय ॥ तत्क्षणंधनुरिषूनपितांस्तान्सान्निधायाविभुरस्त्रमपिस्वं ॥ पांडवायधनुराहतिरीतेः पारितोषिकामिवप्रादिदे
श ॥ ९७ ॥ तस्याथपाशुपतलाभदुरापदीप्तेरक्ष्णः समक्षमपरिप्लवपक्ष्मपंक्तेः ॥ आश्चर्यवृत्तिरखिलैरनुगामिभिः स्वैरंतर्दधेसभग
वानमृतांशुमौलिः ॥ ९८ ॥ ॥ इत्यनंतभट्टकविकृतौचंपुभारतेचतुर्थस्तबकः ॥ ॥ अथसाविधतपोधनैः कृताशीरमरपतेर्धृत
शासनः सपार्थः ॥ रयजितपवनंसमातलिः सन्रथमधिरुह्यमुदादिवंप्रतस्थे ॥ १ ॥ नाकमेत्यधनुरंकितदोष्णानायकोदिविष
दामतित्दृष्टः ॥ नामफाल्गुनइतिब्रुवतास्वंनंदनेनजगृहेपदयुग्मे ॥ २ ॥ पाणिनापरिमृशन्नमुमिंद्रः पक्ष्मलीकृतजयंतमहेर्ष्यः ॥
आदरेणधुरिनाकिगणानामासनार्द्धमधिरोपयतिस्म ॥ ३ ॥ सदसिवसतितस्मिन्सार्वभौमेकरूणांकपटशबरबाणैः कल्पितार्द्रव्र
णेपि ॥ निखिलसुरवधूनांनेत्रसंघाः समेतानिशितकुलिशकल्पानिर्दयंसंनिपेतुः ॥ ४ ॥ आस्थानसीम्नितनयाद्गिरिशेनयुत्धमाक

१ पक्ष्मलीकृता प्रवृद्धा.

र्ण्यहर्षविकसमन्मसोमघोनः ॥ अंगेऽखिलेप्रसरतांपुलकांकुराणामक्ष्णांसहस्रतयमेवबभूवविघ्नः ॥ ५ ॥ आज्ञयापितुरमर्त्यसमा
जादग्रतः स्वनितमंगलवाद्यं ॥ वारणेंद्रमधिरोप्यजयंतोवैजयंत[1]मनयद्द्विजयंतं ॥ ६ ॥ आनतस्यपदयोरथजिष्णोराशिषोनुपदमिं
द्रपुरंध्री ॥ पारिजातकुसुमस्यपरागैः फालसीमनिललामचकार ॥ ७ ॥ पुनः पुनस्तत्रपुलोमपुत्र्याजयंतशंकांददतः स्वकां
त्या ॥ नरस्यमौर्वीकिणएवदोष्णोर्नामग्रहेपुस्खलनंन्यरौत्सीत् ॥ ८ ॥ पितुरिवास्त्रकलांदिविगायकात्पिककुलाद्दतकंठरवो
दयः ॥ परित्द्दतामृतादिव्यजनावृतः परिशिशीलसगीतकलामपि ॥ ९ ॥ तमुर्वशीतत्रकदाचिदेत्यस्वयंरहः कर्मणिभग्नकामा ॥
अयेपृथापत्यतवाभिधेवक्लीबत्वमेहीतिशशापकोपात् ॥ १० ॥ तद्बुध्वाहरिरूचेतंशापोयंवत्सतेमुदे ॥ चित्रसेनोक्तविद्यायाः
सहे[2]कृत्वाभवेदिति ॥ ११ ॥ गद्यं ॥ कदाचिदस्त्रविद्याशिक्षापरिसमाप्तौसुरसमक्षंगुरुदक्षिणात्वेनविपक्षकुलक्षपणंभिक्षमाणेनस
हस्राक्षेणस्वमस्तकादाक्षिप्यशिरसि निक्षिप्त किरीटोवलक्षाश्वोयंमात लिप रिक लिपतरथ्येननंदनवनमंदपवनसंदीयमानकेतनस्पं

१ वैजयंतमिंद्रप्रासादं २ सहकृत्वा साध्यंकृत्वा.

दनेनस्यंदनेननिर्गत्यविलंघितदूरवियत्पथः पाथोनिधौगंभीरनरिपूरराक्षितरक्षः कुलकोलाहलनीचीकृतवीचिरवरसातलकुहर मुखंनिरुध्यरणप्रस्तावंवितस्तरे ॥ तावदनाकर्णितपूर्वगांडीवविस्फारश्रवणादहंपूर्विकयायुगपदभिषेणयतो[1]दिविषदवध्यभावादध्यातमरणान्क्षिप्रैः[2] क्षुरप्रैर्विश्राणिताविवरादुरसः कृतप्रयाणैः प्राणैस्त्रिकोटिशोनिवात[3]कवचानपिप्रवात[4]कवचानेवविरच य्यनिवर्त्तमानोयंनभसः प्रमादादापतितेनपतंगपरिवेषेणेवस्फटिकप्राकारेणपरिगुप्तिमतोहिरण्यपुराद्विदितबंधुजनवृत्तांततयारोषादभिगम्यकलहायमानान्कालकेयानपिकालगेहातिथीन्प्रथमंपाशुपतेनमंत्रपूर्वंनिमंत्रयांचक्रे ॥ पद्यं ॥ अवायुनेयाः शरदभ्र पंक्तीरविद्यमानास्तमयाश्वताराः ॥ दैतेयसंहारभवाः सजिष्णुर्दिविप्रतिष्ठापयतिस्मकीर्तीः ॥ १२ ॥ हतरिपुंविनिवृत्तमवेक्ष्यतंहरिहयस्यसुरैः सहतुष्यतः ॥ नयनवारिभिरंगमनाप्लुतंनददृशेतिलमात्रमपिस्वकं ॥ १३ ॥ पुरिवज्रिणः सुरनुतिप्रसरत्पुलकावमग्नभु

१ अभिषेणयतः अरीसेनयासह अभिगमनं कुर्वतः २ क्षिप्रैः वेगवाद्भिः ३ निवात कवचान् वातरहित कवचान् शस्त्राभेद्य कवचान्वा पक्षे निवातकवचाख्यान् ४ प्रवात कवचान् प्रकृष्टः वातः वायुः कवचेयेषांतान्.

जचापकिणः ॥ मनसेसपंचशरदो[1]प्सरसांवसतिस्मपंचशरदो[2]विजयः ॥ १४ ॥ तस्यवृत्तमधिगम्यलोमशाद्धर्मजोपिमुदितः सहा
नुजैः ॥ प्राप्ततीर्थमुनिसेवनः क्रमात्पावनंबदरिकावनंययौ ॥ १५ ॥ तत्रब्रह्मपरायणैर्मुनिजनैः संसेव्यमानांतिकौसध्र्यञ्चौ[3]यमिनौ
निरीक्ष्यसनरंनारायणंचाख्यया ॥ अंगेनानिशमांतरेणमहतीमेकांक्षमां[4]संस्पृशन्बाह्यैरष्टभिरंगकैरपिपरांपस्पर्शपार्थः क्षमां ॥ १६ ॥
विलोकनैर्विश्रमशाखिभिस्तयोर्भवाध्वगानांपरिधूनितश्रमः ॥ निवासमालंब्यतपोवनेतदाविवासदुःखाद्विरराम पार्थिवः ॥ १७ ॥
॥ गद्यं ॥ एकदातत्रस्नुषावत्सलतयेवमारुतेनपुरतोनीतमसौसाहि[5]मटवपिर्यटनखेदसंपदामंधंकरणमालिकुलचेतसामासेचनक[6]म
ॠणांकमपिकल्हारमुकुलमादायक्कलभ्येतपुनरेतादृशमितिकुतुकहर्षाभ्यांसूचिततर्षयापार्षत्यारहसियाचितः पार्षदश्विः क्षणंविचिं
त्यतद्विचिचिषयादिशमुदीचींप्रतस्थे ॥ पद्यं ॥ क्षिप्रंविलंघ्यगिरिशैवलिनीवनानिगच्छन्नसौपथिददर्शकपिंमहांतं ॥ दृग्भ्यामवंत
मरि[7]पत्तनदाहकालेनिद्रांभयादुपनतामिवकुंभकर्णात् ॥ १८ ॥ अभीरसौगभीरमभाणीत्व ॥ कस्त्वंनिरुध्यपदवीमविनीतबुद्धेनि

१ पंचशरदः कामदः २ शरदः वर्षाणि ३ सध्र्यञ्चौसहगच्छंतौ ४ क्षमां शांतिं पृथ्वींच ५ असासहिं असहमानं ६ आसेचनकं अतिसंतोषदायकं.
७ अरिपत्तनं शत्रुपुरं लंका.

द्रास्यपेह्निनसहेगमनेविलंबं ॥ क्रोधोभुजामिवममाद्यहिडंबहंतुरुद्यद्द्र[1]दांतवतनूमपिमूढकुर्यात् ॥ १९ ॥ इत्थंगिराकिंचिदुदीक्ष्य
तस्यलांगूलमात्रेतरलः कपींद्रः ॥ कोपारुणाक्षंकुरुसिंहमेनंस्वापारुणाक्षः स्वयमेवमूचे ॥ २० ॥ भद्रस्वस्त्यस्तुभ्यंचिरमिहज
रसानिद्रयाप्यातुरोहंप्रत्युत्थानादिकर्मण्यपटुरवयवैरस्मितस्मात्त्वमेव ॥ जात्यावस्थानरीत्यापिचविपिनपथेप्राप्ततिर्यक्त्व[2]मेवंवा
लाग्रेमांविकृष्यद्रुतमभिलषितप्राप्तयेसाधयेति ॥ २१ ॥ इत्युक्तएषपरिघंधरणौनिधायवल्कंदृढंचपरिधायभुजार्गलाभ्यां ॥ तंकृष्टु
मेवनशशाकसतुप्लवंगोवालस्थयाघनतयास्यमनश्वकर्ष ॥ २२ ॥ गद्यं ॥ तदनुविनयविस्मयव्रीडापारदृश्वनामातरिश्वसूनुना
त्वंवासवलोकवासिषुकोसीतिपृष्टः कपिकुंजरः स्वमंजनायांप्रभंजनेनसंजनितंजानकीजानेर्हृदयरंजकंलेखवाहंव्याजहार ॥
सबहुमानंतस्यवचनमाकर्ण्य ॥ प्रीतिनतेनपुनरप्याधिपः कपीनामूचेतथायदिभवानधुनार्थयेहं ॥ कर्तुंतनुंनयनयोः पथितावकीं[3]
नांतत्तादृशीमुदधिपल्वलतासवित्रीं ॥ २३ ॥ इत्युक्तोयंप्रवृद्धोंगैर्हेलयारुरुधेनिजैः ॥ वैमात्रेयस्यतस्यैवमार्गंदिविषदामपि

१ उद्यद्गदां उद्यंतीगदा यस्यांसा पक्षे उद्यन् गदः रोगः यस्यांसा. २ तिर्यक्त्वं पशुत्वं वक्रत्वंच ३ तावकीनां त्वत्संबंधिनीं.

॥ २४ ॥ त्रस्तस्यतद्वपुरुदीक्ष्यस[1]जातिशंकिमैनाकसंशयकुठारितपक्षलोपं ॥ मोहेयथानयनयोर्मुकुलीबभूवबोधेतथैवकरयोरपियु
ग्ममस्य ॥ २५ ॥ प्रमोदात्परिपुष्यद्भिः प्रतिक्षणमथांगकैः ॥ भीमेनाप्युदघाटीवभ्रातुर्वृद्धिविडंबना ॥ २६ ॥ सविनयमेवंव्यजि
ज्ञपच्च ॥ प्रार्थ्यमानपददर्शनंचिरात्पश्यतः पथिभवंतमग्रजं ॥ विस्मयांबुनिधिरेषमेधुनावीरवर्यभवतापिदुस्तरः ॥ २७ ॥ राघ
वस्यसहजादपित्वयिप्रेमवृत्तिरधिकेतिमेमतिः ॥ यामिनीचरवधोत्सवेयतोलक्ष्मणादधिकमंशमग्रहीः ॥ २८ ॥ आर्यक्षमस्वमम
वागपराधमुग्रमित्यानतंचरणयोश्चिबुकेगृहीत्वा ॥ जिघ्रन्शिरस्यवरजंमुमुचेहनूमान्भीमोप्यमुष्यविरहासहनोश्रुबिंदून् ॥ २९ ॥
गच्छतोस्यपथिमारुतेः पुरोगंधमादनमभूत्कुलाचलः ॥ वानरेंद्रइवगाढवीक्षिकावासनाभिरविमुक्तदृक्पथः ॥ ३० ॥ अले[2]केश
योषिदलकेशयैः सुमैः सुरभिप्रमोदसु[3]रभिंनभः सदां ॥ शिखरेसतस्यमहतीमुदग्दिशोमणिदर्पणीमिवददर्शवापिकां ॥ ३१ ॥
यक्षाधिपस्ययशसीवगृहीतदेहेदृष्ट्वाभयादपगतेसतिहंसयूथे ॥ कक्षानिवेशितगदः सविगाह्यतोयंफुल्लानिहल्लककुलान्यखिला

१ सजातिशंकिमैनाकः अयंमेसजातिः इतिशंकावान् मैनाकः २ अलकेशः अलकायाः कुबेरपुर्याः ईशः कुबेरः ३ सुरभिंकामधेनुं दात्री मित्यर्थः

न्यलावीत् ॥ ३२ ॥ गद्यं ॥ तदात्वएवतद्राक्षिणः कस्त्वंसाहासिन्नायुरग्रभूमिमारुरुक्षसीतिसमंततोनिरुंधानानन्वर्थतावलंबक
तयालोहितानांलोचनानांप्रतिबिंबैस्तांसरसींपुनरपिसौगंधिकांतवर्त्नीमिवकुर्वतः क्रोधवशान्नामयातुधानान्सभीमोरंहसासमुप
बृंहितासिंहनादाश्चिरतरमुपोषितस्यपरिघस्यपारणांपरिकल्पयांचक्रे ॥ पद्यं ॥ रक्षः सृतारक्तनदीमहाद्रेर्विष्ककपपंतीवियातिस्थिता
नां ॥ शरत्तटीधातुझरीतिबुद्धेः करावलंबंकलयांचकार ॥ ३३ पर्वतस्याग्रवस्तुभ्यः प्रवेस्तुंनेछतींदृशं ॥ उत्खायसमहायत्नादु
पासदिदुपत्यकां ॥ ३४ ॥ गद्यं ॥ तदानीमितरेष्वपिभ्रातृषुकमलपालिकासूनोः स्कंधभागाशिबिकामधिरुह्यतस्यैवकटकमाग
तेषुसत्सुमारुतिरादरेणरहसिविकासितांकुसुमसंहतिंमूर्त्तानुरागभ्रमदांप्रमदां प्रत्युपदामकरोत् ॥ पद्यं ॥ सरसीवकचेप्यस्याधा
र्त्तराष्ट्रकुलीकृते ॥ ऊषेतयावरतनोरूर्मिमत्यलिभासुरे ॥ ३५ ॥ इतिसौगंधिकाहरणं ॥ गद्यं ॥ अथकदाचिदाखेटायतटाटवी

१ सौगंधिकं सुगंधिरक्तकमलं २ प्रवस्तुं निर्गंतुं ३ धार्तराष्ट्रः हंसः दुःशासनश्च ४ ऊर्मिमति वीचीयुक्ते वक्रेच ५ अलिभासुरे अलिभिः भासुरं आलिवत्भा
सुरंच अथवा रलयोरभेदात् अरीणां भाकांतिः असवः प्राणाश्चतानूराति गृण्हाति द्रौपदी केशाकर्षण मेव कौरवनाशहेतुरितिभावः ६ आखेटाय मृगयायै.

मटतितस्मिन्बकाद्विषिजटोनामदुर्जटः सुरारिरुटजमुपेत्यवेदिकयावैतानतनूनपातइवदयितयासहत्रीनपितान्वीरान्स्कंधमानीय जवात्केनाचिदपदिशपथेनप्रतस्थे ॥ पद्यं ॥ गतागतेतत्रघटोत्कचेनजटेनचस्कंधधृतस्यराज्ञः ॥ पादार्पणालाभशुचावनंतत्पतत्रि नादैरिवरोदितिस्म ॥ ३६ ॥ वनंयियासोः कठिनेसभांतेजटासुरोधोनबभूवयस्य ॥ वनेविजृंभत्करुणेतुतस्यजटासुरोऽधोजानि धर्मसूनोः ॥ ३७ ॥ नीत्वाकिमद्यवनसीमनिदूरमेतानत्रैवहन्मिसहसेतिधियैवतिष्ठन् ॥ आलक्ष्यतायममरारिरनुष्णजंघोगंतुंप दात्पदमपिक्षितिपानुभावात् ॥ ३८ ॥ मध्येमार्गंवनांतान्मदगजगमनेमारुतौसंमुखेस्मिन्सार्धंतेनाथयोद्धुंधृतरभसमनास्तीव्रदर्प प्रसारः ॥ दैत्यस्तान्राजपुत्रान्क्षितितलमनयद्बाहुनास्कंधमध्यात्क्रोधांधोऽरत्निसीम्नासपुनरनिलभूर्दारुणंतस्यशीर्षे ॥ ३९ ॥ निपेतुषस्तस्यनिकृत्तमूर्ध्नोनितांतभारेणवनांतभूमिः ॥ निम्नाभवद्दूरमुष्यसंगेनिजैः प्रतीकैरिवसंकुचंती ॥ ४० ॥ निष्कंटकाभव

१ जटासुरोधः जटासुरोधः प्रतिबंधः २ विजृंभत्करुणे विजृंभंती विकसंती करुणा यस्मिन् पक्षे करुणाः वृक्ष विशेषाः ३ जटासुरोधः जटासुरः अधः. ४ निष्कंटका शत्रुरहिता.

त्सर्वानिहतेस्मिन्वनावानिः ॥ उ[१]त्कंटकाभवत्प्रीतिरुन्नत्यासातुपार्षती ॥ ४१ ॥ ततस्तेश्वेताद्रिंचिरमधिवसंतः कुरुवराः सिता
श्वस्यप्राप्त्यामुदमनुबभूवुर्निरवधिं ॥ कथाशेषीकारात्त्रिदशरिपुवर्गस्यबहुधाधनु[२]र्ब्रह्मोज्झत्वंशतमखभुजेस्थापितवतः ॥ ४२ ॥
तमनुक्रमभाषितेशयुद्धंसबहूकृत्यचलाचलेनमूर्ध्ना ॥ नृपतिः सहजैः सममहाद्रेर्न्यवृतद्वैतवनंनितांतत्दृष्टः ॥ ४३ ॥ नरेंद्रपुत्राः
सहथाज्ञसैन्यानकेवलंतत्रतपोधनानां ॥ नेत्रा[३]णिजग्हुर्नियमैः कृशांगानेदीयसीनांवनवीरुधांच ॥ ४४ ॥ तदनुसखलुमानसिर्व
साम्राज्यलक्ष्मींप्रचिकटयिषुरेषांप्राप्तकाश्योन्नतीनां ॥ कुरुनृपतितनूजोघोषयात्रापदेशादभजतबलसंघैरावृतस्तंवनांतं ॥ ४५ ॥
कर्णानिलैस्तत्रकरिव्रजानांचलत्सुसर्वेषुचमूरजस्सु ॥ र[४]जस्तुचित्ताश्रितमस्यराज्ञोबलादिवाचंचलमेवतस्थौ ॥ ४६ ॥ तत्ररज्जुन
हनस्यभाविनः स्थानसूचनकृतीइवांगदे ॥ धारयन्भुजयुगेनकौरवः सैनिकान्सविबभाजपंक्तिशः ॥ ४७ ॥ अभ्रंलिहस्यवटभूमिरु
हस्तलेसौस्थित्वाशृणोत्तदनुवैणिकगीतिरीतिं ॥ संगीतभंगिरसिकंसहबंधुवर्गैराकारयन्निवसुराधिपगायकेंद्रं ॥ ४८ ॥ गद्यं ॥

१ उत्कंटका उद्गतरोमांचा २ धनुर्ब्रह्मोज्झत्वं धनुर्वेदत्यागं अरात्यभावात् इंद्रेण धनुस्त्यक्तं ३ नेत्राणि नयनानि वस्त्राणिच. ४ रजः रजोगुणः.

तावदस्यधार्तराष्ट्रस्यचेष्टितरौक्ष्यंनिरीक्ष्यनितरांधांधः सुधांधः पतिनिदेशेनवनावनिदेशेऽवतीर्णंविधृतकृपाणबाणचापकलापतनु
त्रसेनश्चित्रसेनाश्चिरक्षुधितस्तरक्षुश्चमूरुतातिमिवचमूममूंनिवार्यक्ष्वेडयालोलयांचक्रे ॥ पद्यं ॥ भटेषुधावत्सुभयेनकर्णः क्रुधाहसन्कुं
जरमंजुचारः ॥ करेणविस्फारितकौलपृष्ठोजगामशत्रुंजगदेकवीरः ॥ ४९ ॥ स्वसमाननाम्न्यवयवेनटङ्कुणाद्धनुषश्च्युतैः सपदिदेव
गायिनां ॥ अतिरक्ततांगलतलैकवर्तिनीमखिलेवपुष्यपिचकारसायकैः ॥ ५० ॥ गगनेशिरश्चलयतः श्रवोंचलाद्गलितापिदूर
मवतंसमंजरी ॥ पुनरुन्नमद्भिरिषुपक्षवायुभिः पुरतोभवत्कलहजीविनोमुनेः ॥ ५१ ॥ हस्तैः प्रवीणैरखिलेपिकर्णेसुधांविमुंचन्सुर
गायिवर्गः ॥ अयुक्तमेतत्पुनरत्रकर्णेविषाक्तवर्गंविससर्जघोरं ॥ ५२ ॥ गद्यं ॥ तदनुविश्वातिशायिनोविश्वावसुकुमारस्यशरग
णेनसहजवक्रतेकृतपणबंधइवधावतिराधेयेक्रंदत्सुकुरुवृंदेषुसर्वेपिगर्वेणगंधर्वभटाः सुयोधनमायोधनधरणिमध्यभाजंरज्जुभिरवब
ध्यगर्जतोरभसवर्जंनिर्जरपथमनैषुः ॥ पद्यं ॥ नयत्स्वमुंवैरिषुनाकमार्गंविषादभाजांविपिनेकुरूणां ॥ तत्तादृशोव्रीडभरेपितेषामुत्तान

१ सुधांधःपतिः इंद्रः २ कालपृष्ठं कर्णधनुष्यं ३ प्रवीणैः कुशलैः अथवा प्रकृष्टावीणायेषुतैः ४ उत्तानभावं ऊर्ध्वंअवस्थानं दुःखेन मुखान्युन्नमय्य मुहुः उर्ध्वंनीयमानं सुयोधनमपश्यन्नित्यर्थः.

भावंनजहुर्मुखानि ॥ ५३ ॥ तस्यांतः पुरुसुभ्रुवोविगलितैर्वाष्पांबुभिः पंकिलैमार्गैर्मंदितवेगपादगतयोवक्षः स्खलत्पाणयः ॥ आजग्मुस्तमजातशत्रुमजहत्कारुण्यमंघ्रिद्वयेकुर्वंत्योनामितांघ्रियैवपुरतोदत्तार्द्धसाद्यांशिरः ॥ ५४ ॥ सगद्गदमेवमभिदधुश्च ॥ संद्रष्टुंतवपादमूलमधुनासर्वैः समंबंधुभिर्देवभ्रातरमागतंवनतलेलेशनेहेतोर्विना ॥ पापः कश्चनगायकोदिविषदांहाहंतबध्वादृढंनिः शंकैरुप[1]वीणितोनिजभटैरभ्रंनयत्युच्चकैः ॥ ५५ ॥ तदद्यनः कंठभुविस्नुषाणांतवैवपादंशरणंगतानां ॥ वास्तव्यतामंगलसूत्रिकायाः प्रसीददातुंप्रथमानकीर्ते ॥ ५६ ॥ गद्यं ॥ इतिताभिर्दीनभावंपुरोधायनिवेदितस्यराज्ञोनिदेशेनानिर्गत्यसत्वरमनुधावतांभ्रूदंडमिवकोदंडमपिकोपेनकुटिलीकुर्वतांभीमप्रभृतीनांक्ष्वेलितविस्फाराभ्यांतत्क्षणंवियदखिलंविकस्वरानिजगुणमासीत् ॥ ॥ पद्यं ॥ क्वगायकायूयमुपात्तवीणाः क्वचापधुर्याः कुरुवंशभूपाः ॥ अहोरणेचापलमीदृशंवः स्वमूलकंवापरमूलकंवा ॥ ५७ ॥ वृषांकमौलेर्व्रणचिन्हदायीवनेऽर्जुनोस्मिन्वसतीतिवार्त्ता ॥ पपातकर्णेभवतांनकिंचिद्यदीदृशंसाहसमातनुध्वे ॥ ५८ ॥ भ्राताधु

१ उपवीणितः वीणयागीतः.

कालिकींकुसुमपंक्तिमिवव्यतानीत् ॥ ६२ ॥ वीरव्रातैस्त्रिभुवनभवैर्विश्रुतेनः कुलेस्मिन्नुद्भूयत्वंबहुभिरनुजैरास्थितोप्याधिपत्यं ॥ एवंभंगंकिमिहभजसेवत्सनीचैः प्रणीतंराजन्यानांपरपरिभवोरा[1]जयक्ष्माहिकीर्तेः ॥६३॥ इत्थंनिगद्यसरलेनयुधिष्ठिरेणबंधाद्विमोच्य बकविद्विषताविसृष्टः ॥ मानंच्युतंमृगयमाणइवातिनम्रोवाचंयमेनसययौमहताबलेन ॥६४॥ यंप्रा[2]यंबहुमिच्छंतिजनाजीवितुमुत्सुकाः ॥ उपाविक्षत्तमेवासौपाथिप्राणान्समुज्झितुं ॥ ६५ ॥ तस्मिन्व्रतेस्वपनलब्धसुरारिसाह्यस्त्यागेतनोस्तदनुबंधु[3]तयानिषिद्धः ॥ तस्माद्वनात्पुनरपिप्रतिपद्यधैर्यंघुष्यद्बलोनिववृतेकुराजधानीं ॥ ६६ ॥ तत्रखलु ॥ कदापिमाबंधयगायकैर्मामितिविहव्यैरमृतायमानैः ॥ संप्रीणयन्निंद्रमथाभिमानीसपौंडरीकंक्रतुमाजहार ॥ ६७ ॥ भूपोपितांवनभुवंप्रविहायभेजेभूयः सकाम्यकतपोवनमंडलानि ॥ किर्मीरनाशमुदिताखिलतापसौघस्वाध्यायघोषमुखरीकृतादिङ्मुखानि ॥ ६८ ॥ मृदुभिर्वनवल्लिकंदमूलैर्विहितातिथ्यविधिः सतत्रपार्थः ॥ स्थितिमाचरतिस्मत्दृष्टचेतास्तृणबिंदोर्वचनेतपोवनेच ॥ ६९ ॥ प्रासूतयासदासिपट्टपटीरसंख्याः सैषास

१ राजयक्ष्मा क्षयरोगः २ प्रायंवयः अथवा प्रकृष्टं अयं शुभदैवं पक्षे प्रायोपवेशनं ३ बंधुतया बंधुसमूहेन.

मागवतीतिसकौतुकाश्च्यः ॥ वेणीधरामुटजसीमनियाज्ञसेनींविस्मित्यवल्कलवसंददृशुर्गृहिण्यः ॥ ७० ॥ तत्ताद्दक्षेकरेस्याद्विविध
वनभवंकंदमूलोपहारंदातुंलज्जापयोधेस्तलमभिममृशुर्धर्मदारामुनीनां ॥ यस्यस्पर्शानुभावादविरतमुदितैः पायसैरेवादिव्यैः
किंचिद्भांडंवनांतेतनुमतिथिजनस्यातनोदन्यथार्था[1] ॥ ७१ ॥ दिशिदिशिमृगयायैतेषुयातेषुजातुस्वयमुटजमवाप्तः सोमकेंद्रस्य
पुत्र्याः ॥ लपन[2]शशिमहिम्नालंघयामासवेलां[3]तरालितमकरांक[4]स्तत्क्षणंसिंधुराजः[5] ॥ ७२ ॥ गद्यं ॥ ततः क्रंदंतींकुररीमिवरुदतीं
मेनांपुरस्तादधिरोप्यसूतकरतोत्रदंडाध्यापितवेगतंत्रपारीणरथ्येनघनतरतज्जघनपयोधरभाराक्रमणाविनम्रीभूतपूर्वभागतयापार्थद
र्शनशंकया निकुब्जीभूयेवधावताशतांगेननि मिषचू षितप रिणाहवनीपथंजयद्रथंपुनरप्याश्रमपदमाश्रित्य निश मितप्रमदावार्त्तेन
दावार्तेनेवपूर्वजेन नियुक्तौजटारिकिरीटिनौरोषविद्रुमलताकिसलयै रिवलोचनैः शरासनमवकीर्यमृगयाविहारानिवृत्तमात्रेणचर

१ अन्यथार्थां तनुरित्यस्य अन्यथार्थः अतनुत्वं महतीं २ लपनं मुखं ३ वेलां मर्यादां कूलंच ४ मकरांकः कामः पक्षे मकरा एव अंकः भूषणं ५ सिंधुराजः जयद्रथः समुद्रश्च.

नासौनविसृज्यतेचेत्तथात्रसन्नह्यतुगांडिवोमे ॥ यथामहेंद्रः परिगृह्यवीणांस्वबाहुकीर्तिंस्वयमेवगायेत् ॥ गद्यं ॥ इतिविजयस्य
वीरवादेनपुनरपि निवर्तमानैर्वीणामंसेषु निबध्यबाणासनमेवकूजयद्भिस्तैर्नभश्चरैः सममेषांसकलवैमानिकपरिषदंगरुहवितीर्ण
निद्राभंगोमहान्संगरोभूत् ॥ पद्यं ॥ गंभीरगांडिवगुणाद्दलितैः पृषत्कैर्गंडस्थलेत्द्दिभुजेगमितव्रणास्ते ॥ गर्वंविहायचकितागग
नांतरालेगंधर्वभावसदृशंगमनंवितेनुः ॥ ५९ ॥ वीणाः समस्ताविजयेनकृत्तागंधर्वसैन्याद्दलिताबभूवुः ॥ आयुष्मतीकेवलमा
लुलोकेहस्ताग्रवीणादिविनारदस्य ॥ ६० ॥ एतावतीतियुधिमार्गणचारशक्तिः स्पष्टीबभूवसुरगायकपांडवानां ॥ तेषांययुः श
रकुलानिहिलक्ष्यमात्रंलक्ष्यंविभिद्यपुनराययुरंतमेषां ॥ ६१ ॥ गद्यं ॥ तत्रशक्रसुतस्यतादृशंविक्रममभिनंद्यकृतसंधानेनगंधर्वरा
जेनसमर्पितंपौरुषहीनमिदंनपुरस्करणीय मितिबंध मिषेणपश्चादुपनीतबाहुयुगुलंसुयोधनमादायतेभीमादयोवसुधाधिपस्यसंन्नि
धिमधिरोपयामासुः ॥ पद्यं ॥ तंवक्ष्यितत्रतरुमावरणंभजंतीसापार्षतीसविधवल्लिपरंपरासु ॥ हासैः करांगुलिबिलादसकृद्दलद्भिरा

१ गंधर्वभावः अश्वत्वं.

णेनद्रुतमन्वदुद्रुवतां ॥ ततः क्षणादेवकर्णपूरकुसुमसौरभजिघ्रत्सिजिनीकेनधनंजयेनसंपत्राकृतोधृतत्रासतयाविद्यामिवविनय विपर्ययः कृष्णांविमुच्यकृतपलायनः सदुर्मेधाः पुरः प्रधावितेनमागधाविरोधिनारुरुधे ॥ पद्यं ॥ कचेगृहीत्वाभुविपातितस्यक ठोरचारित्रपरस्यशत्रोः ॥ संताडनेमारुतिरात्मपाणेः सच्छात्रयामासपदंचवामं ॥ ७३ ॥ सौवीरभर्त्तुरथमूर्द्धानिपंचचूडाः क्लृप्ताः क्षुरेणपवनात्मभुवाविरेजुः ॥ इंगालधूमकलिकाइवशाम्यतोंतस्त्रासांबुभिः स्मरशरानलपंचकस्य ॥ ७४ ॥ विमतमनुजनीतंवी क्ष्यभूपः स्मितास्यः कृतनतिशिरसंतंकेशभारेत्दितोपि ॥ त्वदसुहरणमार्गेदुः शलैवार्गलानः क्वचिदपिकुरुमैवंकुत्सितेत्युत्सस र्ज ॥ ७५ ॥ दीनधीः सतपसाहिमशैलेद्रक्पथंपुरहराद्गृहयालोः ॥ आददेवरमथोविजयोद्वावंतरेणयुधिपांडवरोधं ॥ ७६ ॥ पार्था श्चकृच्छ्रादुत्तीर्णापार्षतींप्राप्यरेमिरे ॥ हेमंतात्पद्मिनीमुक्ताहेलेरविकरांकुराः ॥ ७७ ॥ अत्रांतरेज्वलितवर्णवपुः कदाचिदंगेषुश

१ सपत्राकृतः अतिव्यथितः. २ विनय विपर्ययः अविनयः औध्दत्यं ३ अर्गला विघ्नइत्यर्थः ४ विजयौ अर्जुनो जयश्च ५ हेलेः सूर्यस्य ६ अंगेषु अवयवेषु देशविशेषेषुच.

ब्दइवकर्णमवाप्यरात्रौ ॥ भासांनिधिः कृतनमस्करणायतस्मैप्रेम्णाशिषः प्रणिजगादयवीयसींगां ॥ ७८ ॥ अहमहरधिनाथो
ऽनुग्रहान्मेपृथायामयिजननमगास्त्वंवत्सकोशोगुणानां ॥ तदिदमिहरहस्यंशासनंगृह्यतांमेतनय[1]कुशलयोगेतातपादायतंते ॥७९॥
मुखसंधानविश्लेषमुक्तेकवचकुंडले ॥ तवैतेभूषणेशोभांतन्वातेपरदुर्लभां ॥ ८० ॥ एतानियाचितुमिहद्विजवेषगूढंमालब्धकामम
मराधिपतिंकथास्त्वं ॥ आज्ञापथात्स्खलसिचेदणुमात्रमस्माद्बध्योभविष्यसिसुखेनरणेरिपूणां ॥ ८१ ॥ इत्थंनिशम्यतां वाचंराधे
योरचितस्मितः ॥ हर्षादंजलिनासाकमाददेप्रतिभाषितं ॥ ८२ ॥ तव[2]र्यमेतिप्रथितेपिशब्देममार्यमेत्यर्थिजनेषुदानं ॥ निषेधरू
पेनिदधातिमार्गेपदंकथंवाभवदीयजिव्हा ॥ ८३ ॥ सततंसदर्थिसदसेबहुदातुंसकुतूहलस्यपुरुषस्यजगत्यां ॥ [3]उदकोर्मिकाकरधृ
ताहिविभूषाकनकोर्मिकातुपरमंगुलिभारः ॥ ८४ ॥ दिवसेशयः खलुशयैः[4] प्रतिकर्तुंधृतलालसोभवतिनार्थिषुदैन्यं ॥ प्रतिपाद
येत्सतुकथंपुरुषस्यप्रति[5]लोमवर्णनिजनामपदार्थं ॥ ८५ ॥ यशएवजन्मफलमात्मवतामिदमेषितव्यमतियत्नभरात् ॥ अपिभूषि

१ कुशलयोगे लब्धस्य परिपालनं अप्राप्तस्य प्रापणंच तयोः समाहारः तास्मिन् २ यः खलुददाति सोर्यमा ३ ऊर्मिका लहरी अंगुलीयकंच ४ शयः हस्तः ५ प्रतिलोम विपरीतं.

तंगुणगणैरपरैरयशस्विनंनजगदाद्रियते ॥ ८६ ॥ व्यापृतावितरणोपनिषत्सुव्याहरंतिहिविपश्चिदधीशाः ॥ स्पर्शनेनरहितावितिहेतोर्लुब्धकंचकुणपंचसमानौ ॥ ८७ ॥ दृष्टेवनीपकजनेवदनंस्मितेनदानांबुनाकरतलंयशसादिशश्च ॥ शुभ्रीकरोतिविवशःस्वयमेवदाताकस्तादृशंप्रातिनिवर्त्तयितुंक्षमेत ॥ ८८ ॥ वांछामनाप्तेनवनीपकेनसहासवोदातृजनस्ययांति ॥ तदद्यशक्रार्चनयाधृतासोर्भावीवधोमेपरमोहिलाभः ॥ ८९ ॥ यद्गेहप्रतिहारभूतलशिलाचिंतामणिः कल्पकायस्यारामहीरुहश्चसुरभिः साहोमधेनुः पुनः ॥ तादृग्याचतिचेदुपेत्यमघवासंपूर्यतत्कामनां त्रैलोक्यस्थवदान्यसंसदुपरिस्यामेषमेनिश्चयः ॥ ९० ॥ वीक्ष्यवंध्यवचनोपिगुणज्ञोविस्मयांबुनिधिवीचिषुमग्नः ॥ पद्मबंधुरितिवादिनमेनंपाटलस्मितरुचिर्गिरमूचे ॥ ९१ ॥ गद्यं ॥ अयेवत्सभवताभाषितंक्षममेवस्थूललक्ष्याणामीदृशंतवमतंपुनरापिममरसनांनिदेशावशेषपथपाथिनींनिर्मिमीते ॥ अथवात्वंशुनाशीरस्यमनीषितस्यपूरणात्प्रागेवपूर्वदेवगर्वनिर्वापणधूर्वहतयाकुलिशमपिचिरारूढकलंकाकुलजर्जरितधाराशतमातन्वतींतदीयांशक्ति

१ वितरणंदानं २ स्पर्शनेन दानेन स्पर्शेनच ३ स्थूललक्ष्याणां दानशौंडानां.

माधत्स्वेति ॥ ततस्तथेतिपरमंगीकृत्यपश्यतस्तनूजस्यसमक्षमचिरेणसमरीचिमालीचरमाचलशिखरपरिशील्यमानाविर्[1]हारामिहा
पिसमाचचार ॥ पद्यं ॥ कतिपयदिनेकालेयातेततोमरुतांपतिः सदसितनयंभानोरेत्यार्थिंचाटुशताकुले ॥ कवचमतुलंवाचाया
चत्सकुंडलमादरादयमापितथेत्युक्ताशाक्तिंततोजगृहेद्भुतां ॥ ९२ ॥ नकारमेतेवहतोरिपूममेत्यमर्षभारादिवशास्त्रधारया ॥ सुतोर
वेदं[2]शनकर्ण[3]वेष्टनेस्वयंसमुत्कृत्यददौबिडौजसे ॥ ९३ ॥ निशम्यतत्कल्पतरोंघ्रियाच्युतैश्चिराजितैस्त्यागयशोभरैरिव ॥ सुपर्वमु
क्तैः कुसुमैर्नकेवलंतदंगमंगाश्वसुगंधयोभवन् ॥ ९४ ॥ जाग्रत्सुसर्वावयवेषुतस्यकर्णस्यकर्णः पुनरर्थिनेस्वां ॥ हिरण्मयींयद्वित
तारभूषांतन्नामसाम्यंध्रुवमत्रहेतुः ॥ ९५ ॥ आपृच्छयतंतदनुनाकपतिः सुधर्मामासाद्यासिद्धमरुदप्सरसांसमाजे ॥ प्राशंसदस्यच
रितंसविधेसुरभ्यारोमंथमप्याविगणय्यानिशम्यमानं ॥ ९६ ॥ तावत्पार्थास्तेपिपुनः काम्यकसीमांहित्वासंघैर्भूविबुधानामनुयाताः ॥
तीर्थव्रातान्विस्मृतपूर्वानवगाढुंवध्वासार्द्धंद्वैतवनारण्यमवापुः ॥ ९७ ॥ गद्यं ॥ तत्रकदाचिदाश्रमद्वारिहामहाभागाममहोमसा

१ अंतर्धानमित्यर्थः २ दंशनं कवचं ३ कर्णवेष्टनं कुंडलं.

धनमपहृत्यहरिणोयमितस्ततोधावतीतिबाष्पायमाणस्यकस्यचिद्गृहमेधिनः शोकनिवारणायचक्रीकृत्यचापमनुधावतस्तान्पा
र्श्वलताताडनानुषक्तनवकिसलयजालमुत्प्लुत्यधावनवेगपवनबहिर्ज्वलितगर्भवन्हिशिखाकंदलमिवारणिंविषाणयोर्बिभ्राणः क
तिषुचित्पदेषुसुग्रहइवकतिषुचिद्दुरासदइवचित्रगतिः कोपिकृष्णसारोदूरमाकृष्यस्वयमंतरधात् ॥ तदनंतरंललाटंतपनरवंपचहे
लिधूलिभ्यांद्यावापृथिवीभ्यामु[1]दन्यावदान्यमहिमनिदिनयौवने[2]प्रकृतमर्थमिवपानीयमपिइतस्ततोविचिन्वद्भिरनुजैः सहकस्य
चिद्विशालस्यवनशालस्यमूलभुवंतच्छायमंडलमिवपांडवः शनैः शनैरुपससर्प ॥ पद्यं ॥ तत्रानिलैः कमलगंधिभिरुच्यमाना
माशांगतेषुसलिलायचिरायितेषु ॥ भीमादिषुक्षितिभुजापरितप्यभेजेतेषांपदानुसरणादथकापिवापी ॥ ९८ ॥ तस्यास्तटेकम
लिनीदलपत्रपाणींस्तान्पंक्तिशोनिपतितानवलोक्यवीरान् ॥ बाष्पांबुभिः प्रथमदर्शितमार्गएवतन्वानृपस्यधरणौसहसानिपेते
॥ ९९ ॥ सनृपतिर्ददृशेऽधिकवत्सलः सपदिमूर्छितधीर्नि[3]र्भृतांगकः ॥ स्वयमपिप्रविभज्यतदादशामनुभवन्निवतामनुजाश्रितां

१ उदन्यावदान्यमहिमनि उदन्यापिपासा तस्याः दातामहिमायस्यतस्मिन् २ प्रकृतं प्रस्तुतं अर्थं हरिणं ३ निभृतानि जडानि.

॥ १०० ॥ नासाविलोभनपटून्नवपुष्पगंधानादायतत्रमधुपैरनुसेव्यमानाः ॥ वर्द्धिष्णुचेतनमिमंनववापिकायाः कक्कोलमल्लपव
नाः कलयांबभूवुः ॥ १०१ ॥ गद्यं ॥ ततः क्षणादेवकिंचिदुद्भ्रम्यपरितः शून्यशून्यादिशोदशापिविलोकयमानः शनैः शनैरुपसृ
त्यशोकचंचलेनकरांचलेनतान्पर्यायवृत्यापरिमृश्यवनविहगमृगपानसौकर्यायदुरवतरांतांसरसींपरिपूरयितुमिवबाष्पधाराम
भिवर्षन्धर्मसूनरेवंविलपितुमारभत ॥ पद्यं ॥ वीराभवद्द्विपदिदेवपरंपरापिदूरापरान्प्रतिनरान्नगिरांप्रवृत्तिः[1] ॥ हाहादशेयमिहवो
द्यकुतोवतीर्णामामंतरेणाकिमिदंभवतांप्रयाणं ॥ १०२ ॥ दैवंकठोरचरितंदययाविहीनंमाद्रीसुतावहहमातृमुखानभिज्ञौ ॥ कंदां
कुराणिचफलानिचभक्षयित्वाकांतारसीमानिमयाचरितुंनसेहे ॥ १०३ ॥ स्वयमव्रणएवयोरणेव्रणमाधत्तहरस्यमस्तके ॥ व्रणमायुषि
पार्थतस्यतेविदधातिस्ममृधंविनैवकः ॥ १०४ ॥ वत्सद्वेषिनियुद्धजीवनभुजप्रख्यानिधेमाहृतेकर्णाकर्णिकयानिशम्यभवताप्राप्ता
मवस्थामिमां ॥ शोकेनानिशमेकचक्रनगरीभाजांचबाष्पायितुंस्वस्रीयैः[2] सहसौबलस्य[3] चमुदेकोप्येषकालोऽभवत् ॥ १०५ ॥ मय्य

१ अन्यजनान्प्रति वाणीप्रसारोन यत्रदेवाअनीशा स्तत्रजनानां कावार्ता २ स्वस्रीयैः भगिनीसुतैः ३ सौबलस्य शकुनेः

प्यसूनिहविमुंचतियाज्ञसेनीसाश्वापदामिषमबुद्धगतिर्भवेन्नः ॥ हामाद्रिकुंतियुवयोर्वनभूमिरेवपुत्रप्रसूतिविपदोः पदतांप्रपेदे ॥ १०६ ॥ कूटस्थशीतकरकुक्षिगतंकुरंगंकुर्वन्स्वजातिकृतकोपरसातिरेकं ॥ कोदंडमप्यगणयन्कुलिशास्त्रसूनोः क्कासौस्थितोवनमृगः कुलहानयेनः ॥ १०७ ॥ इत्थंविलप्यनृपतौस्वयमप्यमर्षामंतस्यहेतुरिदामित्युदकंसरस्याः ॥ पातुंप्रवृत्तवतिकोपिपुमानदृश्योगंभीरमाहगगनास्थितएववाचं ॥ १०८ ॥ राजन्मदुक्तिसरणेः प्रतिवाक्यदानंदेवोप्युपेक्ष्यजलमत्रनपातुमीष्टे ॥ एतेमदीयमवमत्यवचोवलेपात्पीतांभसः सपदिबिभ्रतिदीर्घनिद्रां ॥ १०९ ॥ तत्प्रत्युदीर्यसलिलंतुपिबेतिवक्तुः प्रश्नानसौदिविचरस्यपटूत्तरैः स्वैः ॥ प्रत्युद्ययौबहुमतैर्वनदेवतानामिंदोः करानिवतरंगकुलैः पयोधिः ॥ ११० ॥ तदनंतरं ॥ कटिलंबितवल्कलोजटालः कमनीयस्मितधौतयज्ञसूत्रः ॥ कुशबर्हवतंसितः सदेवः कुरुराजस्यपुरोऽवतीर्यतस्थौ ॥ १११ ॥ गद्यं ॥ सतुतत्रलोकातीतेनराकाशतामिवाकारयतानिजेनतेजसाकुड्मलीकृतकरकमलयुग्मंतमात्मसंभवंप्रेममेदुरमेवमवादीत् ॥ अयेवत्समांधर्ममवेहि ॥

१ बर्हं पत्रं २ आकारयता आव्हयता.

संप्रतिविमतजनवितीर्णंविविधंविपिनक्लेशमनुभवतोभवतोभावंबुभुत्सुरेवमाचरिषं ॥ तद्बहुधापरीक्षितेनभवतः शीलेनसमंजसे
नप्रश्नोत्तरेणचप्रसेदिवानस्मि ॥ तस्मान्ममानुग्रहेणस्वप्नान्निवृत्तैरिवभूयोप्युत्थितैरनुजन्मभिः सहत्रयोदशीशरदंरूपांतरवंतंभ
वंतंकोपिनजानीयादितिवरंचतमरणिंचविस्मयविस्मारितनयनपरिस्पंदनायनिजनंदनायप्र[1]तिपाद्यसपुमानंतर्दधे ॥ पद्यं ॥
तत्तादृशोभगवतोवचसानिकाममासाद्यमोदभरमाश्रममागतानां ॥ प्राप्तारणेर्द्विजवरस्यशुचेवसाकमंतंजगामस[2]मयोपिमहान
मीषां ॥ ११२ ॥ ॥इत्यनंतभट्टकविकृतौचंपूभारतेपंचमस्तबकः॥ ॥तदनुतेभरताव्य[3]वधाश्रयाच्चरमहा[4]यनलंघनकांक्षिणः॥ अति
चिरंरविभांडविवर्द्धितानुचरानिवतामटवींजहुः ॥ १ ॥ गद्यं ॥ तदनुतदनुचितवचनसाहसाधिगतवाह[5]साधिपवपुषंनहुषमौदर
द[6]मुनःशमनायचतुरर्णववारिकांक्षिणःपा[7]रिकांक्षिणः कोपोदिताच्छापोदधेरु[8]त्तरैरुत्तार्यतस्मादेवविस्मारितनिजविधिदुर्विलासा
दासादितवराः वरारोहयातयासहदु[9]ःसहनिजधामापिधानवैदग्ध्यमभ्यासितुकामाइवमात्स्यनगरस्यानतिसमीपपितृवनगामिनीं

१ प्रतिपाद्य दत्वा २ समयः संकटसमयः ३ व्यवधा अंतर्धानं ४ हायनंवर्षं ५ वाहसाधिपः अजगरराजः ६ दमुनाः अग्निः ७ पारिकांक्षिणः ऋषे
अगस्त्यस्य ८ उत्तरैः नौभिः प्रतिवाक्यैश्च ९ दुःसहनिजतेज आच्छानचातुर्यं तद्वत्याः शम्याः सकाशादवगंतुमिवेत्युत्प्रेक्षा

शमीमिभजन् ॥ पद्यं ॥ क्रमेणमत्स्येंद्रपुरोपकंठेकरालमापुः पितृकाननंते ॥ वधूद्रुहाभाविनिसूतजानांवधेप्रदेशस्यदिदृक्षयेव ॥ २ ॥
शमीतरौतत्रनिधायशस्त्रममीतदंतज्र्वदलग्निकल्पं ॥ जगाहिरेवेषमिवान्यमुच्चैर्ध्वजंविराटस्यपुरंप्रवीराः ॥ ३ ॥ समत्वमुत्कर्षानि
कर्षयोः स्वंसंदर्शयिष्यन्निवधर्मसूनुः ॥ क्रमेण[1]हंसः परमोहिभूत्वा[2]कंकत्वमापद्यतसद्यएव ॥ ४ ॥ त्रिदंडकाषायकमंडलूज्ज्वलोज
पस्फुरद्दंतपटोयुधिष्ठिरः ॥ उपानहंदारुमयींपदास्पृशन्नुपासदत्संसदिमेदिनीश्वरं ॥ ५ ॥ पुरार्जुनस्येवयतित्वमेतदस्यापिकामप्य
परांसपत्नीं ॥ संपादयेत्किंनुममेतिकृष्णातथाविधंवीक्ष्यनृपंशशंके ॥ ६ ॥ दृष्ट्वासमुत्थितोमात्स्योधृतप्रश्रयाविस्मयः ॥ तत्पाद
पांसुंफालांतेचक्रेतंपुनरासने ॥ ७ ॥ दुर्वीरगर्वासहनोथभीमो[3]दर्वीकरोदार्शितसू[4]दभावः ॥ शोणाधरालोलुपसूतसूनोः प्राणानि
लान्पाययितुंकिलासीत् ॥ ८ ॥ पितुः सखायंपरिपूज्यमेधैर्दिनेदिनेतृप्तिमिवोपनेतुं ॥ सूदाकृतिः सोपिययौविराटंवृकोदरोवृत्त

१ हंसः परमहंसः पक्षिविशेषश्च २ कंकत्वं कंकसंज्ञां बकत्वंच ३ दर्वीकरः दर्वीहस्तः सर्पश्च ४ सूदभावः पाचकत्वं नाशकत्वंच.

[OrderDescription]
,CREATED=24.12.19 14:39
,TRANSFERRED=2019/12/24 at 15:16:20
,PAGES=257
,TYPE=STD
,NAME=S0002387
,Book Name=M-2404-CHAMPU RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF

FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF

FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,